नं० २३८-घ
साहित्यदर्पणः
पत्राणि १०८

नं० २३८-घ

साहित्यदर्पणः

पत्राणि १०८

॥श्रीसरस्वत्यैनमः॥ ॥ग्रंथारंभेनिर्विघ्नेनप्रारिप्सितसमाप्तिकामोवाङ्मयाधिकृततयावाग्देवतायाःसांमुख्य
माधत्ते॥ ॥शरदिंदुसुंदररुचिश्चेतसिसामेगिरांदेवी॥ अपहृत्यतमःसंततमर्थानखिलान्प्रकाशयतु॥१॥ अस्य
ग्रंथस्यकाव्यांगतयाकाव्यफलेनैव फलवत्त्वमिति काव्यफलमाह॥ चतुर्वर्गफलप्राप्तिःसुखादल्पधियामपि॥ काव्या
देवयतस्तेन तत्स्वरूपंनिरूप्यते॥२॥ चतुर्वर्गफलप्राप्तिर्हि काव्यतोरामादिवत्प्रवर्तितव्यं नरावणादिवदित्यादि कृ
त्याकृत्यप्रवृत्तिनिवृत्त्युपदेशद्वारेणैवसुप्रतीतैव॥ उक्तंच॥ धर्मार्थकाममोक्षेषु वैचक्षण्यंकलासुच॥ करोतिकीर्तिंप्रीतिंच
साधुकाव्यनिषेवणमिति॥ किंच॥ काव्याद्धर्मप्राप्तिर्भगवन्नारायणस्तवादिना एकःशब्दःसुप्रयुक्तःसम्यक्ज्ञातःस्वर्गे
लोकेकामधुक्भवतीत्यादिवाक्येभ्यः सुप्रसिद्धैव॥ अर्थप्राप्तिःप्रत्यक्षसिद्धा। कामप्राप्तिश्चार्थद्वारैव। मोक्षप्राप्तिश्चैतज्ज
न्यफलाननुसंधानात्। मोक्षोपयोगिवाक्येषुव्युत्पत्त्याधायकत्वाच्च॥ चतुर्वर्गप्राप्तिर्हिवेदादिशास्त्रेभ्योनीरसतया दुःखा
देवपरिणतबुद्धीनामेवजायते॥ परमानंदसंदोहजनकतया सुखादेवसुकुमारबुद्धीनामपि पुनःकाव्यादेव। ननुतर्हि
परिणतबुद्धिभिःसत्सुवेदशास्त्रेषुकाव्येकिमितियत्नःकरणीयइत्यपिनवक्तव्यं। कटुकौषधोपशमनीयस्यरोगस्यसि
तशर्करोपशमनीयत्वे कस्यवारोगिणःसितशर्कराप्रवृत्तिःसाधीयसीनस्यात्। किंचकाव्यस्योपादेयत्वं माग्नेयेपुरा १
णेप्युक्तं। नरत्वंदुर्लभंलोकेविद्यातत्रसुदुर्लभा। कवित्वंदुर्लभंतत्रशक्तिस्तत्रसुदुर्लभा॥३॥ त्रिवर्गसाधनंनाट्यमिति॥

=निर्वेदाख्यसंचारिणो=
=अंग्रनात्.१=

विष्णुपुराणेच॥ काव्यालापाश्चयेकेचित् गीतकान्यखिलानिच॥ शब्दमूर्त्तिधरस्यैते विष्णोरंशामहात्मनः॥इति। तेन
हेतुनाकाव्यस्यस्वरूपंनिरूप्यते। एतेनाभिधेयंचप्रदर्शितं। तत्किंस्वरूपं तावत्काव्यमित्यपेक्षायांकश्चित्। तददोषौशब्दा
र्थौसगुणावनलंकृतीपुनःक्वापीत्येतदाह॥ तच्चिंत्यं॥तथाहि॥ यदिदोषरहितस्यैवकाव्यत्वांगीकारस्तदा न्यक्कारोह्यय
मेवमेयदरयस्तत्राप्यसौतापसः सोप्यत्रैवनिहंतिराक्षसभटान् जीवत्यहोरावणः।धिक्धिक्छक्रजितंप्रबोधितवा
ताकिंकुंभकर्णेनवा स्वर्गग्रामटिकाविलुंठनवृथोच्छूनैःकिमेभिर्भुजैः॥ अस्यश्लोकस्यविधेयाविमर्शदोषदुष्टतयाका
व्यत्वंनस्यात्। प्रत्युतध्वनित्वेनोत्तमकाव्यतास्यांगीकृता। तेनाव्याप्तिर्लक्षणदोषः। ननुकश्चिदेवांशोत्रदुष्टोनपुनःसर्वोपी
तिचेत्॥ तर्हियत्रांशेदोषः सोकाव्यत्वप्रयोजकोयत्रध्वनिः सउत्तमकाव्यत्वप्रयोजक इत्यंशाभ्यामुभयतआकृष्यमा
णमिदंकाव्यमकाव्यंवाकिमपिनस्यात्। नचकिंचिदेवांशंकाव्यस्यदूषयंतः श्रुतिदुष्टादयोदोषाः। किंतर्हिसर्वमेवका
व्यं॥तथाहि॥ काव्यात्मभूतस्यरसस्यानपकर्षकत्वेतेषांदोषत्वमपिनांगीक्रियते। अन्यथानित्यदोषानित्यदोषव्यव
स्थापिनस्यात्॥यदुक्तंध्वनिकृता॥ श्रुतिदुष्टादयोदोषा अनित्यायेचदर्शिताः। ध्वन्यात्मन्येवशृंगारे तेहेयाइत्युदाहृ
ताः। किंचैवंकाव्यंप्रविरलविषयंनिर्विषयंवास्यात्। सर्वथानिर्दोषस्यैकांतमसंभवात्। नन्वीषदर्थेनञःप्रयोगइ
तिचेत्। तर्हीषद्दोषौशब्दार्थौ काव्यमित्युक्तेनिर्दोषयोःकाव्यत्वंनस्यात्। सतिसंभवेईषद्दोषाविति चेत्॥ एतदपिकाव्य

साहित्यदर्पण

२

लक्षणे न वाच्यं रत्नादिलक्षणे कीटानुवेधपरीहारादिवत् । न हि कीटानुवेधादयो रत्नस्य रत्नत्वं व्याहन्तुमीशाः । किं तूपादेय
तातारतम्यमेव कर्त्तुं तद्वदत्रापि श्रुतिदुष्टादयः काव्यस्य ॥ उक्तं च ॥ कीटानुविद्धरत्नादि साधारण्येन काव्यता । दुष्टेष्वपि मता ।
यत्र रसाद्यनुगमः स्फुट इति ॥ किं च ॥ शब्दार्थयोः सगुणत्वविशेषणमनुपपन्नं गुणानां रसैकधर्मत्वस्य ये रसस्याङ्गिनो धर्माः
शौर्यादय इवात्मन इत्यादिना तेनैव प्रतिपादितत्वात् । रसाभिव्यञ्जकत्वेनोपचारत उपपद्यत इति चेत् ॥ तथाप्ययुक्तं ॥ त
थाहि ॥ तयोः काव्यत्वेनाभिमतयोः शब्दार्थयोः रसोऽस्ति न वा नास्ति चेद्गुणवत्त्वमपि नास्ति गुणानां तदन्वयव्यतिरेकानुविधायित्वा
त् । अस्ति चेत्कथं नोक्तं रसवन्ताविति विशेषणं । गुणवत्त्वान्यथानुपपत्त्यैतल्लभ्यत इति चेत् । तर्हि सरसावित्येव वक्तुं युक्तं न स
गुणाविति । न हि प्राणिमन्तो देशा इति वक्तव्ये शौर्यादिमन्तो देशा इति केनाप्युच्यते । ननु शब्दार्थौ सगुणावित्यनेन गुणाभि
व्यञ्जकौ शब्दार्थौ काव्ये प्रयोज्यावित्यभिप्राय इति चेत् ॥ न गुणाभिव्यञ्जकशब्दार्थवत्त्वस्यापि काव्ये उत्कर्षाधायकत्वं न तु स्व
रूपाधायकत्वं ॥ उक्तं हि ॥ काव्यस्य शब्दार्थौ शरीरं रसादिश्चात्मा गुणाः शौर्यादिवद्दोषाः काणत्वादिवद्रीतयोऽवयवसं
स्थानवदलङ्काराः कटककुण्डलादिवदिति । एतेनानलङ्कृती पुनः क्वापीति यदुक्तं तदपि परास्तं । अस्य ह्यर्थः सर्वत्र सालङ्का
रौ क्वचिदस्फुटालङ्कारौ अपि शब्दार्थौ काव्यमिति । सालङ्कारशब्दार्थयोरपि काव्ये उत्कर्षमात्राधायकत्वात् । एतेन वक्रो २
क्तिः काव्यजीवितमिति वक्रोक्तिजीवितकारोक्तमपि परास्तं । वक्रोक्तेरलङ्काररूपत्वात् । यच्च क्वचिदस्फुटालङ्कारत्वे

=विभावनाविशेषोक्तिमोरस्फुटनयात्तदुभयात्थ्यस्यालंकारद्वयस्संदेहस्यालंकारसंकरस्येत्यर्थः। ३

दाहृतं। यः कौमारहरः स एव च वरस्ता एव चैत्रक्षपा स्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदंबानिलाः। सा चैवास्मि
तथापि तत्र सुरतव्यापारलीलाविधौ रेवारोधसि वेतसीतरुतले चेतः समुत्कंठते॥ एतद्धि चिंत्यं॥ अत्र हि विभावनाविशेषो
क्तिमूलस्य संदेहालंकारस्य स्फुटत्वं। एतेन अदोषं गुणवत्काव्यमलंकारैरलंकृतं। रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिं
च विंदति। इत्यादीनामपि काव्यलक्षणत्वमपास्तं॥ यत्तु ध्वनिकारेणाप्युक्तं॥ काव्यस्यात्मा ध्वनिरिति। तत्किं वस्त्वलंकार
रसादिलक्षणस्त्रिविधध्वनिः काव्यस्यात्मा उत रसादिरूपमात्रो वा॥ नाद्यः॥ प्रहेलिकादावतिव्याप्तेः। द्वितीयश्चेदोमिति ब्रू
मः॥ ननु यदि रसादिमात्ररूपध्वनिः काव्यस्यात्मा तदा अत्ता एत्थ णिमज्जइ एत्थ अहं दिवसए पलोएहि मा पहिअ रत्तिअंध
अ सेज्जाए मह णिमज्जहिसि। इत्यादौ वस्तुमात्रव्यंजकत्वे कथं काव्यव्यवहार इति चेत् अत्रापि रसाभासवत्तयैवेति ब्रू
मः। अन्यथा देवदत्तो ग्रामं गच्छतीति तद्भृत्यस्य तदनुसरणरूपव्यंग्यावगतेरपि काव्यत्वं स्यात्॥ अस्त्विति चेत्॥ न रसवत एव
काव्यत्वांगीकारात् काव्यप्रयोजनं हि रसास्वादसुखपिंडद्वारेण वेदशास्त्रविमुखानां सुकुमारमतीनां राजपुत्रप्रभृतीनां
विनेयानां रामादिवत्प्रवर्तितव्यं न रावणादिवदित्यादि कृत्याकृत्यप्रवृत्तिनिवृत्त्युपदेश इति चिरंतनैरप्युक्तत्वात्॥ तथा चा
ग्नेयपुराणे॥ वाग्वैदग्ध्यप्रधानेपि रस एवात्र जीवितमिति व्यक्तिविवेककारेणाप्युक्तं। काव्यस्यात्मनि संगिनि रसादिरूपेन
कस्यचिद्विमतिरिति॥ ध्वनिकारेणाप्युक्तं॥ न हि कवेरितिवृत्तमात्रनिर्वाहेणात्मपदलाभ इतिहासादेरेव तत्सिद्धेरित्यादि। ननु तर्हि

=पुंश्चल्याः परपुरुष=
=विषयरतेः प्रकाशनात्॥ ५

=महिमभट्टेन॥ २=

गि

प्रबंधांतर्वर्त्तिनां केषामपि पद्यानां नीरसानां काव्यत्वं न स्यादिति चेन्न । रसवत्पद्यांतर्गतनीरसपदानामिव पद्यरसेन प्रबंधर
सेनैव तेषां रसवत्तांगीकारात् । यत्तु नीरसेष्वपि गुणाभिव्यंजकसद्भावाद्दोषाभावादलंकारसद्भावाच्च काव्यव्यवहारः स
रसवत्काव्यबंधसाम्याद्गौण एव ॥ यत्तु वामनेनोक्तं ॥ रीतिरात्मा काव्यस्येति तन्न । रीतेः संघटनाविशेषत्वात्संघटनायाश्चावय
वसंस्थानरूपत्वात् आत्मनश्च तद्भिन्नत्वात् ॥ यच्च ध्वनिकारेणोक्तं ॥ अर्थः सहृदयश्लाघ्यः काव्यात्मा यो व्यवस्थितः । वाच्यप्र
तीयमानाख्यौ तस्य भेदावुभौ स्मृताविति । तत्र वाच्यस्यात्मत्वं काव्यस्यात्मा ध्वनिरित्यादिस्ववचनविरोधादेवापास्तं ॥ तत्किं
पुनः काव्यमित्युच्यते ॥ वाक्यं रसात्मकं काव्यं । रसस्वरूपं निरूपयिष्यामः । रस एवात्मा साररूपतया जीवनाधायको यस्य
तेन विना तस्य काव्यत्वाभावस्य प्रतिपादितत्वात् । रस्यत इति रस इति व्युत्पत्तियोगाद्भावतदाभासादयोपि गृह्यंते ॥ तत्र रसो
यथा ॥ शून्यं वासगृहं विलोक्य शयनादुत्थाय किंचिच्छनैर्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखं । विस्रब्धं परिचुंब्य जा
तपुलकामालोक्य गंडस्थलीं लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुंबिता । अत्र संभोगशृंगाराख्यो रसः ॥ भावो यथा ॥
महापात्रराघवानंदसांधिविग्रहिकाणां । यस्यालीयत शल्कसीम्नि जलधिः पृष्ठे जगन्मंडलं दंष्ट्रायां धरणी नखे दितिसुताधी
शः पदे रोदसी । क्रोधे क्षत्रगणः शरे दशमुखः पाणौ प्रलंबासुरो ध्याने विश्वमसावधार्मिककुलं कस्मैचिदस्मै नमः । अत्र भग ३
वद्विषया रतिर्भावः ॥ रसाभासो यथा ॥ मधु द्विरेफः कुसुमैकपात्रे पपौ प्रियां स्वामनुवर्त्तमानः । शृंगेण संस्पर्शनिमीलिताक्षीं

।मृगीमकं रूपयतक्रूरमसारः॥ अत्रहि संभोगशृंगारस्य तिर्यग्विषयत्वादाभासः एवमन्यत्। दोषाः पुनः काव्ये किंस्वरू-
पा इत्युच्यते। दोषास्तस्यापकर्षकाः। श्रुतिदुष्टापुष्टार्थत्वादयः काणत्वखंजत्वादय इव देहद्वारेण व्यभिचारिभावादेः स्वश-
ब्दवाच्यत्वादयो मूर्खत्वादय इव साक्षात्काव्यात्मभूतं रसमपकर्षयंतः काव्यस्यापकर्षका इत्युच्यंते। एषां विशेषोदाहरणा-
नि वक्ष्यामः। गुणादयः किंस्वरूपा इत्युच्यते। उत्कर्षहेतवः प्रोक्ता गुणालंकाररीतयः। गुणाः शौर्यादिवत् अलंकाराः कटक-
कुंडलवत् रीतयोऽवयवसंस्थानविशेषवत् देहद्वारेणेव शब्दार्थद्वारेण तमेव काव्यस्यात्मभूतं रसमुत्कर्षयंतः काव्यस्यो-
त्कर्षका इत्युच्यंते॥ इह यद्यपि गुणानां रसधर्मत्वं तथापि गुणशब्दोऽत्र गुणाभिव्यंजकशब्दार्थयोरुपचर्यते। अतश्च गुणाभिव्यंज-
काः शब्दा रसस्योत्कर्षका इत्युक्तं भवतीति प्रागेवोक्तं। एषामपि विशेषोदाहरणानि वक्ष्यामः॥ ॥इति श्रीमन्नारायणचरणार-
विंदमधुव्रतसाहित्यार्णवकर्णधारध्वनिप्रस्थानपरमाचार्यकविसूक्तिरत्नाकराष्टादशभाषाविलासिनीभुजंगसांधिविग्र-
हिकमहापात्रश्रीविश्वनाथकविराजकृतौ साहित्यदर्पणे काव्यस्वरूपनिरूपणो नाम प्रथमः परिच्छेदः॥१॥ वाक्यस्वरूपमा-
ह॥ ॥वाक्यं स्याद्योग्यताकांक्षासत्तियुक्तः पदोच्चयः। योग्यता पदार्थानां परस्परसंबंधे बाधाभावः। पदोच्चयस्यैतदभावेपि
वाक्यत्वे गौरश्वः पुरुषो हस्तीत्यादावपि वाक्यं स्यात्। आसत्तिर्बुद्ध्यविच्छेदः। बुद्धिविच्छेदेपि वाक्यत्वे इदानीमुच्चरितस्य देवदत्तश- =संबंधपरैः२=बाधय= =समावः२=
ब्दस्य दिनांतरोच्चारितेन गच्छतीति पदेन संगतिः स्यात्। तत्राकांक्षायोग्यतयोरात्मधर्मत्वेपि पदोच्चयधर्मत्वमुपचारात्। वाक्यो-
वाक्यत्वे वह्निना सिंचतीत्यादावपि वाक्यं स्यात्। आकांक्षा प्रतीतिपर्यवसानविरहः। स च श्रोतुर्जिज्ञासारूपः। निराकांक्षस्य

च्चयो महावाक्यं। योग्यताकांक्षासत्तियुक्त इत्येव। इत्थं वाक्यं द्विधा मतं। इत्युक्तमिति वाक्यमहावाक्यत्वेन॥ उक्तं च॥ स्वार्थबो
धे समाप्तानामंगांगित्वाद्यपेक्षया। वाक्यानामेकवाक्यत्वं पुनः संहत्य जायत इति। तत्र वाक्यं यथा। शून्यं वासगृहमित्यादि॥ म
हावाक्यं यथा॥ रामायणमहाभारतरघुवंशादि। पदोच्चयो वाक्यमित्युक्तं। तत्किं पदलक्षणमित्यपेक्षायामाह। वर्णाः पदं प्रयोगार्हा
नन्वितैकार्थबोधकाः। यथा घटः। प्रयोगार्हा इति प्रातिपदिकव्यवच्छेदः। अनन्वितेति वाक्यमहावाक्ययोः। एकेति साकांक्षानेक
पदवाक्यानां। अर्थबोधका इति कचटतपेत्यादीनां। वर्णा इति बहुवचनमविवक्षितं। तत्रार्थो वाच्यश्च लक्ष्यश्च व्यंग्यश्चेति त्रि
धा मतः॥ एषां स्वरूपमाह॥ वाच्योऽर्थोऽभिधया बोध्यो लक्ष्यो लक्षणया मतः। व्यंग्यो व्यंजनया ताः स्युस्तिस्रः शब्दस्य शक्तयः। ता अ
भिधाद्याः। तत्र संकेतितार्थस्य बोधनादग्रिमाभिधा। उत्तमवृद्धेन मध्यमवृद्धमुद्दिश्य गामानय इत्युक्ते तं गवानयनप्रवृत्तमुपलभ्य
बालो वाक्यस्य सास्नादिमत्पिंडानयनमर्थ इति प्रथमं प्रतिपद्यते। अनंतरं गां बधान अश्वमानयेत्यादावावापोद्धाराभ्यां गोशब्द
स्य सास्नादिमानर्थ आनयति शब्दस्याहरणमर्थ इति संकेतमवधारयति। क्वचिच्च प्रसिद्धपदसमभिव्याहारात्॥ यथेह॥ प्रभि
न्नकमलोदरे मधूनि मधुकरः पिबतीत्यत्र। क्वचिदाप्तोपदेशात्। यथायमश्वशब्दवाच्य इत्यत्र। तं च संकेतितमर्थं बोधयंती शब्दस्य ४
शक्त्यंतरानंतरिता शक्तिरभिधा नाम॥ संकेतो गृह्यते जातौ गुणद्रव्यक्रियासु च। जातिर्गोपिंडादिषु गोत्वादिका। गुणो विशेषाधा
नहेतुः सिद्धो वस्तुधर्मः। शुक्लादयो हि गवादिकं सजातीयेभ्यः कृष्णगवादिभ्यो व्यावर्तयंति। द्रव्यशब्दा एकव्यक्तिवाचिनः। द

रिद्वरिणत्थकपित्थादयः। क्रियाः साध्यरूपाः वस्तुधर्माः पाकादयः। एषु ह्यधिश्रयणावश्रयणान्तादिः पूर्वापरीभूतो व्यापार
कलापः पाकादिवाच्यः। एष्वेव हि व्यक्त्युपाधिषु संकेतो गृह्यते न व्यक्तौ। आनंत्यव्यभिचारदोषापातात्॥ अथ लक्षणा॥ मुख्या
र्थबाधे तद्युक्तो ययान्योऽर्थः प्रतीयते। रूढेः प्रयोजनाद्वासौ लक्षणा शक्तिरर्पिता॥ कलिंगः साहसिक इत्यादौ कलिंगादिशब्दो दे
शविशेषादिरूपे स्वार्थेऽसंभवन् यया शक्त्या स्वसंयुक्तान् पुरुषादीन् प्रत्याययति यया च गंगायां घोष इत्यादौ गंगादिशब्दो जल
मयादिरूपार्थवाचकत्वात् प्रकृतेऽसंभवन् स्वस्य सामीप्यादिसंबंधसंबंधिनं तटादिं बोधयति। सा शब्दस्यार्पिता स्वाभाविकेत
रा ईश्वरानुद्भाविता वा शक्तिर्लक्षणा नाम। पूर्वत्र हेतुं रूढिः प्रसिद्धिरेव। उत्तरत्र गंगातटे घोष इति प्रतिपादनालभ्यस्य शीतत्वपाव
नत्वातिशयस्य बोधनरूपं प्रयोजनं। हेतुं विना पि यस्य कस्य चित्संबंधिनो लक्षणेति प्रसंगः स्यादित्यत उक्तं रूढेः प्रयोजना
द्वापीति। केचित्तु कर्मणि कुशल इति रूढावुदाहरंति तेषामयमाशयः॥ कुशं लातीति व्युत्पत्तिलभ्यः कुशग्राहिरूपो मुख्या
र्थः प्रकृतेऽसंभवन् विवेचकत्वसाधर्म्यसंबंधसंबंधिनं दक्षरूपमर्थं बोधयतीति तदन्येन मन्यते। कुशग्राहिरूपार्थस्य व्युत्प
त्तिलभ्यत्वेपि दक्षरूपस्यैव मुख्यार्थत्वात्। अन्यद्धि शब्दानां व्युत्पत्तिनिमित्तमन्यच्च प्रवृत्तिनिमित्तं व्युत्पत्तिलभ्यस्य मुख्यार्थत्वे
गौः शेते इत्यत्रापि लक्षणा स्यात्। गमेर्डोः इति गमेर्धातोर्डोप्रत्ययेन व्युत्पादितस्य गोशब्दस्य शयनकारिणि प्रयोगात्॥ तद्भे-
दानाह॥ मुख्यार्थस्येतराक्षेपो वाक्यार्थेऽन्वयसिद्धये। स्यादात्मनोऽप्युपादानादेषोपादानलक्षणा॥ रूढावुपादानलक्षणा

यथा॥ श्वेतोधावति। प्रयोजनेयथा। कुंताःप्रविशंति। अनयोर्हिश्वेतादिभिःकुंतादिभिश्चाचेतनतयाकेवलैर्धावनप्रवे
शनक्रियययोरन्वयमलभमानैरेतत्सिद्धये आत्मसंबंधिनोश्वादयःपुरुषादयश्चाक्षिप्यते। पूर्वत्रप्रयोजनाभावात् रूढिरुत्त
रत्रकुंतादीनामतिगहनत्वंप्रयोजनं। अत्रचमुख्यार्थस्यात्मनोप्युपादानं। लक्षणलक्षणायांतु परस्यैवोपलक्षणमित्यन
योर्भेदः॥ **इयमेवाजहत्स्वार्थेत्युच्यते॥** अर्पणंस्वस्यवाक्यार्थेपरस्यान्वयसिद्धये। उपलक्षणहेतुत्वादेषालक्षणलक्षणा। रू
ढिप्रयोजनयोर्लक्षणलक्षणायथा। कलिंगःसाहसिकोगंगायांघोषइतिच। अनयोर्हिपुरुषतटयोर्वाक्यार्थेन्वयसिद्धयेक
लिंगगंगाशब्दावात्मानमर्प्पयतः॥ **यथावा॥** उपकृतंबहुतत्रकिमुच्यते सुजनताप्रथितात्वतापरं। विदधदीदृशमेवसदा
सखे सुखितमास्वततःशरदांशतं। अत्रापकारादीनां वाक्यार्थेऽन्वयसिद्धयेउपकृतादयःशब्दाआत्मानमर्प्पयंति। अप
कारिणंप्रत्युपकारादिप्रतिपादनान्मुख्यार्थबाधः। वैपरीत्यलक्षणःसंबंधः। फलमपकारातिशयः। इयमेवजहत्स्वार्थेत्यु
च्यते। आरोपाध्यवसानाभ्यांप्रत्येकंताअपिद्विधा। ताःपूर्वोक्ताश्चतुर्भेदलक्षणाः॥ विषयस्यानिगीर्णस्यान्यतादात्म्यप्रतीतिकृ
त्। सारोपास्यान्निगीर्णस्य मतासाध्यवसानिका। रूढावुपादानलक्षणा॥ **सारोपायथा॥** अश्वःश्वेतोधावति। अत्रहिश्वेतगुण
वानश्वोऽनिगीर्णस्वरूपःस्वसमवेतगुणतादात्म्येनप्रतीयते। प्रयोजनेयथा॥ एतेकुंताःप्रविशंति। अत्रसर्वनाम्नाकुंतधारि ५
पुरुषनिर्देशात्सारोपत्वं॥ **रूढौलक्षणलक्षणासारोपायथा॥** कलिंगःपुरुषोयुध्यति। अत्रकलिंगपुरुषयोराधाराधेय:

अत्र तादर्थ्यलक्षणः संबंधः। एवमन्यत्रापि। निगीर्णस्य पुनर्विषयस्यान्यतादात्म्यप्रतीतिः साध्यवसाना। ३

संबंधः॥ प्रयोजने यथा॥ आयुर्घृतं। अत्रायुःकारणमपि घृतं कार्यकारणभावसंबंधादायुस्तादात्म्येन प्रतीयते। अन्यवैल
क्षण्येनाव्यभिचारेणायुःकरत्वं प्रयोजनं। यथा च राजकीये पुरुषे गच्छति राजासौ गच्छतीति। अत्र स्वस्वामिभावलक्षणः सं
बंधः। इन्द्रार्थासु स्थूणासु अमीन्द्राः। अस्याश्चतुर्षु भेदेषु पूर्वोदाहरणान्येव सादृश्येतरसंबंधाः। शुद्धास्ताः सकला अपि। सा
यथा चाग्रमात्रेऽवयवे हस्तोयं अत्रावयवावयविभावलक्षणः संबंधः। ब्राह्मणोपि तक्षासौ। अत्र तात्कर्म्यलक्षणः संबंधः। ×३×
हृश्पान्नुमता गौण्यस्तेन षोडश भेदिताः। पूर्वोक्ता अष्टभेदा लक्षणाः सादृश्येतरसंबंधाः कार्यकारणभावादयः॥ अत्र शुद्धा
नां पूर्वोदाहरणान्येव। रूढावुपादानलक्षणा सारोपा गौणी यथा। एतानि तैलानि हेमंतसुखानि। अत्र तैलशब्दस्तिलभव
स्नेहरूपमुख्यार्थमुपादायैव सार्षपादिस्नेहेषु वर्तते॥ प्रयोजने यथा॥ राजकुमारेषु तत्सदृशेषु च गच्छत्स्वेते राजकुमारा
गच्छंति। रूढावुपादानलक्षणा साध्यवसाना गौणी यथा॥ तैलानि हेमंते सुखानि। प्रयोजने यथा। राजकुमारा गच्छंति। रू
ढौ लक्षणलक्षणा सारोपा गौणी यथा। राजा गौडेंद्रं कंटकं शोधयति। प्रयोजने यथा। गौर्वाहीकः। रूढौ लक्षणलक्षणा
साध्यवसाना गौणी यथा। राजा कंटकं शोधयति। प्रयोजने यथा। गौर्जल्पति॥ अत्र केचिदाहुः॥ गोसहचारिणो गुणा जा
ड्यमांद्यादयो लक्ष्यंते। ते च गोशब्दस्य वाहीकार्थाभिधाननिमित्तं भवंति। तदयुक्तं। गोशब्दस्यागृहीतसंकेतं वाहीकार्थ
मभिधातुमसामर्थ्यात्। गोशब्दार्थमात्रबोधनाच्चाभिधाया विरतत्वात्। विरतायाश्च पुनरुत्थानाभावात्। अन्ये पुनर्गो

=गौडेंद्रं कंटकमित्यस्य प्रयोजनाभावाद्रूढिः। क्षुद्रदुःखदायित्वं साधर्म्यसंबंधः। कंटकमात्रस्य प्रसक्तेः स्वार्थपरित्यागाल्लक्षणलक्षणा। ४=

ति॰

शब्देन वाहीकार्थो नाभिधीयते । किंतु स्वार्थसहचारिगुणसाजात्येन वाहीकगता एव गुणा लक्ष्यंते । तदप्यन्ये न मन्यंते
। तथा ह्यत्र गोशब्दाद्वाहीकार्थः प्रतीयते न वा । आद्येपि गोशब्दादेव वा लक्षिताद्गुणाद्विनाभावद्वारा । तत्र न प्रथमः । वा
हीकार्थस्यासंकेतितत्वान्न द्वितीयः । अविनाभावलभ्यस्यार्थस्य शाब्देन्वये प्रवेशाभावात् । शाब्दी ह्याकांक्षा शब्देनैव पूर्यते ॥ न
द्वितीयः ॥ यदि गोशब्दाद्वाहीकार्थो न प्रतीयते तदास्य गोशब्दस्य च सामानाधिकरण्यमसमंजसं स्यात् । तस्मादत्र गोश
ब्दो मुख्यया वृत्त्या वाहीकशब्देन सहान्वयमलभमानोऽज्ञत्वादिसाधर्म्यसंबंधाद्वाहीकार्थं लक्षयति । वाहीकस्याज्ञत्वाद्य
तिशयबोधनं प्रयोजनं । इयं गुणयोगाद्गौणीत्युच्यते । पूर्वा तूपचारेणामिश्रणाच्छुद्धा । उपचारो हि नामात्यंतं विशकलितयोः
सादृश्यातिशयमहिम्ना भेदप्रतीतिस्थगनमात्रं । यथाग्निमाणवकयोः शुक्लपटयोस्तु नात्यंतं भेदप्रतीतिस्तस्मादेवमा
दिषु शुद्धैव लक्षणा । व्यंग्यस्य गूढागूढत्वाद्द्विधा स्युः फललक्षणाः । प्रयोजने या अष्टभेदा लक्षणा दर्शितास्ताः प्रयोजनरूप
व्यंग्यस्य गूढागूढतया प्रत्येकं द्विधा भूतत्वात् षोडशभेदाः । तत्र गूढो वाक्यार्थभावनापरिपक्वबुद्धिविभवमात्रवेद्यः । यथा ।
उपकृतं बहु तत्रेति । अगूढोतिस्पष्टतया सर्वजनबोध्यः ॥ यथा ॥ श्रीपरिचयाज्जडा अपि भवंत्यभिज्ञा विदग्धचरितानां । उ
पदिशति कामिनीनां यौवनमद एव ललितानि ॥ अत्रोपदिशतीत्यनेनाविःकरोतीति लक्ष्यते । आविःकारातिशयश्चाभि
धेयवत्स्फुटं प्रतीयते । धर्मधर्मिगतत्वेन फलस्यैता अपि द्विधा । एता अनंतरोक्ताः षोडशभेदा लक्षणाः फलस्य धर्मिगतत्वे ६

नधर्म्मगतत्वेनचप्रत्येकंद्विधाइतिलक्षणाद्वात्रिंशद्भेदाः॥क्रमेणोदाहरति॥ स्निग्धश्यामलकांतिलिप्तवियतो वेल्लद्बलाका।
घना वाताःशीकरिणःपयोदसुहृदामानंदकेकाःकलाः।कामंसंतुदृढंकठोरहृदयोरामोस्मिसर्वंसहे वैदेहीतुकथं
भविष्यतिहहाहादेविधीराभव॥ अत्रात्यंतदुःखसहिष्णुरूपेधर्मिणिलक्ष्ये तस्यैवातिशयःफलं।गंगायांघोषः।अत्रतटा
दिषुलक्ष्येषुशीतत्वपावनत्वा दिरूपस्यधर्मस्यातिशयःफलं। तदेवंलक्षणाभेदा श्चत्वारिंशन्मताबुधैः। रूढावष्टौफले
द्वात्रिंशदिति चत्वारिंशल्लक्षणाभेदाः॥किंच॥पदवाक्यगतत्वेन प्रत्येकंताअपिद्विधाताअनंतरोक्ताःतत्रपदगतत्वेयथा
गंगायांघोषःवाक्यगतत्वेयथा।उपकृतंबहुतत्रेति॥एवमशीतिप्रकारालक्षणा॥अथव्यंजना॥विरतास्वभिधाद्यासुयया
र्थोबोध्यतेपरः॥सावृत्तिर्व्यंजनानामशब्दस्यार्थादिकस्यच॥शब्दबुद्धिकर्म्मणांविरम्यव्यापाराभावइतिनयेनाभिधालक्षणा
तात्पर्याख्यासुतिसृषुवृत्तिषुस्वंस्वमर्थंबोध्यनिवृत्तासुययापरोर्थोबोध्यते साशब्दस्यार्थस्यप्रकृतिप्रत्ययादेश्चशक्तिर्व्यंज
नध्वननगमनप्रत्यायनादिव्यपदेशविषयाव्यंजनानामतत्र।अभिधालक्षणामूला शब्दस्यव्यंजनाद्विधा॥अभिधामूलामाह
॥अनेकार्थस्यशब्दस्यसंयोगाद्यैर्नियंत्रिते॥एकत्रार्थेन्यधीहेतुर्व्यंजनासाभिधाश्रया॥आद्यशब्दाद्विप्रयोगादयः॥उक्तंहि
संयोगोविप्रयोगश्चसाहचर्यंविरोधिता॥अर्थःप्रकरणंलिंगं शब्दस्यान्यस्यसंनिधिः॥सामर्थ्यमौचितीदेशः कालोव्यक्तिः
स्वरादयः।शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः इति॥सशंखचक्रोहरिरित्यत्रशंखचक्रसंयोगेनहरिशब्दोविष्णुमेव।

न्निधत्ते। अशंखचक्रो हरिरिति तद्वियोगेऽच्युतमेव। भीमार्ज्जुनावित्यर्ज्जुनः पार्थः। कर्णार्ज्जुनाविति कर्णः सूतपुत्रः। स्थाणुं वंद
इति स्थाणुः शिवः। सर्वं जानाति देव इति देवो भवान्। कुपितो मकरध्वज इति मकरध्वजः कामः। देवः पुरारातिरिति पुराराति
:शिवः। मधुना मत्तः कोकिल इति मधुर्वसंतः। पातु वो दयितामुखमिति मुखं सांमुख्यं। भाति गगने चंद्र इति चंद्रः शशी। नि
शि चित्रभानुरिति चित्रभानुर्वह्निः। भाति रथांगमिति नपुंसकव्यक्त्या रथांगं चक्रं। स्वरस्तु वेद एव विशेषप्रतीतिकृन्न काव्य
इति तस्य विषयो नोदाहृतः॥ इदं च केऽप्यसहमाना आहुः॥ स्वरोऽपि काक्वादिरूपः काव्ये विशेषकृदेव। उदात्तादिरूपोऽपि
मुनेः पाठोक्तदिशा शृंगारादिरसविशेषप्रतीतिकृदेवेति तद्विषयमुदाहरणमुचितमेवेति। तन्न। स्वराः काक्वादय उदात्ताद
यो वा व्यंग्यरूपमेव विशेषं प्रत्याययंति। न खलु प्रकृतोक्तमनेकार्थशब्दस्यैकार्थनियंत्रणरूपं विशेषं। किंच। यदि यत्र क्वचिद
नेकार्थशब्दानां प्रकरणादिनियमाभावादनियंत्रितयोरर्थयोरनुरूपस्वरवशेनैकत्र नियमनं वाच्यं तदा तथाविधस्थले
श्लेषानंगीकारप्रसंगो न च तथा॥ अत एवाहुः। श्लेषनिरूपणप्रस्तावे काव्यमार्गे स्वरो न गण्यते इति च नय इत्यलमुपजीव्या
नां व्याख्यानेषु कटाक्षनिक्षेपेण। आदिशब्दादेतावन्मात्रस्तनी स्यादित्यादौ हस्तादिचेष्टाभिः स्तनादीनां कमलकोरकाद्याका
रत्वं। एवमेकस्मिन्नर्थेऽभिधया नियंत्रिते या शब्दस्यान्यार्थबुद्धिहेतुः॥ साभिधामूला व्यंजना॥ यथा मम तातपादानां महापा
त्रचतुर्दशभाषाविलासिनीभुजंगमहाकवीश्वरचंद्रशेखरसांधिविग्रहिकाणां। दुर्गालंघितविग्रहो मनसिजं संमीलयंस्तेजसा प्रोद्यद

जकलोगृहीतगरिमा विषमृतो सो गिरिः। तस्यत्रेशाकृते कृणो गिरिगुरौ गाढां रुचिं धारयन् गामाक्रम्य विभूतिभूषितत-
नू राजत्युमावल्लभः। अत्रप्रकरणेनाभिधया उमावल्लभशब्दस्योमानाममहादेवीवल्लभस्तानुदेवनृपतिरूपेऽर्थे नियन्त्रिते
व्यंजनयैव गौरीवल्लभरूपोऽर्थो बोध्यते एवमन्यत्र। लक्षणामूलामाह॥ लक्षणोपास्यते यस्य कृते तत्तु प्रयोजनं। यया प्रत्या-
य्यते सा स्याद्व्यंजना लक्षणाश्रया। गंगायां घोष इत्यादौ जलमयाद्यर्थबोधनादभिधायां तटाद्यर्थबोधनाच्च लक्षणायां विरता-
यां यया शीतत्वपावनत्वातिशयादिर्बोध्यते सा लक्षणामूला व्यंजना। एवं शाब्दीं व्यंजनामुक्त्वा आर्थीमाह॥ वक्तृबोद्धव्यवा-
क्यानामन्यसंनिधिवाच्ययोः प्रस्तावदेशकालानां काकोश्चेष्टादिकस्य च॥ वैशिष्ट्यादन्यमर्थं या बोधयेत्सार्थसंभवा। व्यं-
जनेति संबध्यते। तत्र वक्तृवाक्यप्रस्तावदेशकालवैशिष्ट्ये यथा ममैव॥ कालो मधुः कुपित एव च पुष्पधन्वा धीरा वहन्ति रति-
खेदहराः समीराः। केलीवनीयमपि वञ्जुलकुञ्जमञ्जु दूरे पतिः कथय किं करणीयमद्य। अत्र एतं देशं प्रति शीघ्रं प्रच्छन्नका-
मुकस्त्वया प्रेष्यतामिति सखीं प्रति कयाचिद्द्योत्यते॥ बोद्धव्यवैशिष्ट्ये यथा॥ निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो ने-
त्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः। मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडागमे वापीं स्नातुमितो गतासि न पुनस्त-
स्याधमस्यान्तिकं॥ अत्र तदन्तिकमेव गतासीति विपरीतलक्षणया लक्ष्यते। तस्य रन्तुमिति व्यंग्यं प्रतिपाद्यदूतीवैशिष्ट्याद्बोध्यते
॥अन्यसंनिधिवैशिष्ट्ये यथा॥ उअ णिच्चलनिप्पंदा भिसिणीपत्तम्मि रेहइ बलाआ णिम्मलमरगअभाअणपरिट्ठिआ संख

सुनिशंकं। अत्रबलाकायानिष्पंदत्वेनविश्रब्धत्वंतेनास्यदेशस्यविजनत्वमतःसंकेतस्थानमेतदितिकयापिसन्निहितंप्रछन्न
कामुकंप्रत्युच्यते। अत्रैवस्थाननिर्जनत्वरूपव्यंग्यार्थवैशिष्ट्यंप्रयोजकं॥ भिन्नकंठध्वनिर्धीरैःकाकुरित्यभिधीयत इत्यु
क्तप्रकारायांकाकोर्भेदाआकरेभ्योज्ञातव्याः॥ एतद्वैशिष्ट्येयथा॥ गुरुपरतंत्रतयाबतदूरतरंदेशमुद्यतोगंतुं। अलिकुल
कोकिलललितेनैष्यतिसखिसुरभिसमयेसौ॥ अत्रनैष्यतीत्यपितुएष्यत्येवेतिकाक्वाव्यज्यते॥ चेष्टावैशिष्ट्येयथा॥ संके
तकालमनसंविटंज्ञात्वाविदग्धया। हसन्नेत्रार्पिताकूतं लीलापद्मंनिमीलितं। अत्रसंध्यासंकेतकालइतिपद्मनिमीलना
दिचेष्टयाकयाचिद्द्योत्यते। एवंवक्त्रादीनांव्यस्तसमस्तानांवैशिष्ट्येबोद्धव्यं। त्रैविध्यादियमर्थानां प्रत्येकंत्रिधामता। अर्था विद्
नांवाच्यलक्ष्यव्यंग्यत्वेनत्रिरूपतयासर्वाअप्यनंतरोक्ताव्यंजनास्त्रिविधाः॥ तत्रवाच्यार्थस्यव्यंजनायथा॥ कालोमधुरित्यादि
लक्ष्यार्थस्ययथा॥ निःशेषच्युतचंदनेत्यादि॥ व्यंग्यार्थस्ययथा॥ उअणिच्चलेत्यादि। प्रकृतिप्रत्ययादिव्यंग्यत्वंप्रपंचयिष्यते।
शब्दबोध्योव्यनक्त्यर्थः शब्दोप्यर्थांतराश्रयः। एकस्यव्यंजकत्वेतदन्यस्यसहकारिता॥ यतः॥ शब्दोव्यंजकत्वेऽर्थांतरमपेक्ष
ते। अर्थोपिशब्दंतदेकव्यंजकत्वेतदन्यस्यसहकारितावश्यमेवांगीकार्या। अभिधादित्रयोपाधिवैशिष्ट्यात्त्रिविधोमतः। शब्दो
पिवाचकस्तद्वल्लक्षकोव्यंजकस्तथा। अभिधोपाधिकोवाचकः। लक्षणोपाधिकोलक्षकः। व्यंजनोपाधिकोव्यंजकः। किंच॥
॥ तात्पर्याख्यांवृत्तिमाहुः पदार्थान्वयबोधने। तात्पर्यार्थंतदर्थंच वाक्यंतद्बोधकंपरे। अभिधयाएकैकपदार्थबोधनविरमा ८

वाक्यार्थरूपस्य पदार्थानामन्वयबोधिका तात्पर्यं नाम वृत्तिस्तदर्थश्च तात्पर्यार्थस्तद्बोधकं च वाक्यमित्यभिहितान्वयवा
दिनां मतं॥ ॥इति श्रीसाहित्यदर्पणे वाक्यस्वरूपनिरूपणो नाम द्वितीयः परिच्छेदः॥२॥ ॥अथ कोयं रस इत्युच्यते॥
॥विभावेनानुभावेन व्यक्तः संचारिणा तथा। रसतामेति रत्यादिः स्थायी भावः सचेतसां। विभावादयो वक्ष्यंते सात्त्विकाश्चानु
भावरूपत्वान्न पृथगुक्ताः व्यक्तो दध्यादिन्यायेन रूपांतरपरिणतः। व्यक्तीकृत एव रसः न तु दीपेन घट इव पूर्वसिद्धो व्यज्य
ते॥ तदुक्तं लोचनकारैः॥ रसाः प्रतीयंत इति त्वोदनं पचतीतिवद्व्यवहार इति। अत्र च रत्यादिपदोपादानादेव प्राप्ते स्थायित्वे
पुनः स्थायिपदोपादानं रत्यादीनामपि रसांतरेष्वस्थायित्वप्रतिपादनार्थं। ततश्च हासक्रोधादयः शृंगारवीरादौ व्यभिचारिण
एव॥ तदुक्तं॥ रसावस्थः परं भावः स्थायितां प्रतिपद्यत इति। अस्य स्वरूपकथनगर्भं तदास्वादप्रकारः कथ्यते। सत्वोद्रेकादख
ण्डस्वप्रकाशानंदचिन्मयः। वेद्यांतरस्पर्शशून्यो ब्रह्मास्वादसहोदरः। लोकोत्तरचमत्कारप्राणः कैश्चित्प्रमातृभिः। स्वाका
रवदभिन्नत्वेनायमास्वाद्यते रसः। रजस्तमोभ्यामस्पृष्टं मनः सत्वमिहोच्यत इत्युक्तप्रकारो बाह्यमेयविमुखतापादकः कश्च
=तमसो॰२पा॰= नांतरधर्मः सत्वं सत्वोद्रेको रजस्तमसी अभिभूयाविर्भावः तत्र च हेतुस्तथाविधालौकिककाव्यार्थपरिशीलनं। अखंड इत्ये
क एवायं विभावादिरत्यादिप्रकाशसुखचमत्कारात्मकः। ॥अत्र हेतुं वक्ष्यामः॥ स्वप्रकाशत्वाद्यपि वक्ष्यमाणरीत्या चिन्मय
इति स्वरूपार्थे मयट्। चमत्कारश्चित्तविस्ताररूपो विस्मयापरपर्यायः। तत्प्राणत्वं चास्मद्वृद्धप्रपितामहसहृदयगोष्ठीगरि
=अस्येति॰ अस्यास्वादस्योपचारः॥ आस्वादनेऽस्यानतिरिक्तत्वात्॰६=

ष्टकविपंक्तितमुख्यश्रीमन्नारायणपादैरुक्तं । तदाह धर्मदत्तः स्वग्रंथे रसे सारश्चमत्कारः सर्वत्राप्यनुभूयते तच्चमत्कारसारत्वे
सर्वत्राप्यद्भुतो रसः ॥ अतस्माद्भुतमेवाह कृती नारायणो रसमिति । केचित्त्विति भाक्तनपुण्यशालिनिः ॥ यदुक्तं ॥ पुण्यवंतः प्र
मिण्वंति योगिवद्रससंततिं । यद्यपि स्वादः काव्यार्थसंभेदादात्मानंदसमुद्भवः इत्युक्तदिशा रसस्य स्वादानतिरिक्तत्वं तथापि र
सः स्वाद्यते इति काल्पनिकं भेदमुररीकृत्य कर्मकर्त्तरि वा प्रयोगः ॥ तदुक्तं ॥ रस्यमानतामात्रसारत्वात्प्रकाशशरीरादनन्य ए
व हि रस इति । एवमन्यत्राप्येवंविधस्थलेषूपचारेण प्रयोगो ज्ञेयः । नन्वेतावता रसस्याज्ञेयत्वमुक्तं भवति । व्यंजनायाश्च ज्ञानरूप
त्वाद्द्वयोरैक्यमापतितं । ततश्च ज्ञानेनान्यधीहेतुः सिद्धेर्थे व्यंजको मतः । यथा दीपोन्यथाभावे को विशेषोस्य कारका दित्युक्तदि
शा घटप्रदीपवद्व्यंग्यव्यंजकयोः पार्थक्यमेवेति कथं रसस्य व्यंग्यतेति चेत्सत्यमुक्तं ॥ अत एवाह ॥ विलक्षण एवायं कृतिज्ञप्ति
भेदेभ्यः स्वादनाख्यः कश्चिद्व्यापारः अत एव हि रसास्वादनचमत्करणादयो विलक्षणा एव व्यपदेशा इति । अभिधादिविलक्षण
मात्रव्यापारसाधनग्राहिभिरस्माभिः रसादीनां व्यंग्यत्वमुक्तं भवतीति । ननु तर्हि करुणादीनां रसा दुःखत्वाद्रसत्वं न स्यादित्युच्यते । करु
णादावपि रसे जायते यत्परं सुखं सचेतसामनुभवः प्रमाणं तत्र केवलं । आदिशब्दाद्बीभत्सभयानकादयः । तथाप्यसहृदया
नां मुखमुद्रणाय पक्षांतरमुच्यते । किं च तेषु यदा दुःखं न कोपि स्यात्तदुन्मुखः । नहि कश्चित्सचेतन आत्मनो दुःखाय प्रवर्त्तते । करु
णादिषु च सकलस्यापि साभिनिवेशप्रवृत्तिदर्शनात्सुखमयत्वमेव ॥ अनुपपत्त्यंतरमाह ॥ तथा रामायणादीनां भविता दुःखहे

युता। करुणरसस्य दुःखहेतुत्वे करुणरसप्रधानरामायणादिप्रबंधानामपि दुःखहेतुत्वं स्यात्॥ ननु कथं दुःखकारणेभ्यः
सुखोत्पत्तिरित्याह। हेतुत्वं हर्षशोकादेर्गतेभ्यो लोकसंश्रयात्। शोकहर्षादयो लोके जायंतां नाम लौकिकाः। अलौकिक-
विभावत्वं प्राप्तेभ्यः काव्यसंश्रयात्। सुखं संजायते तेभ्यः सर्वेभ्योपीति का क्षतिः। ये खलु रामवनवासादयो लोके दुःखकार-
पु णानीत्युच्यंते ते एव काव्यनाट्यसमर्पिता अलौकिकविभावनादिव्यापारवत्तया कारणशब्दवाच्यत्वं परिहायालौकिकविभा-
वशब्दवाच्यत्वं भजंते। तेभ्यश्च सुरतेदंतघातादिभ्य इव सुखमेव जायते। अतश्च लौकिकशोकहर्षादिकारणेभ्यो लौकिकशो-
कहर्षादयो जायंत इति लोक एव नियमः॥ काव्ये पुनः सर्वेभ्योपि विभावादिभ्यः सुखमेव जायत इति नियमान्न कश्चिद्दोषः।
कथं तर्हि हरिश्चंद्रादिचरितस्य काव्यनाट्ययोरपि दर्शनश्रवणाभ्यामश्रुपातादयो जायंत इत्युच्यते॥ अश्रुपातादयस्तद्व-
द्रुतत्वाच्चेतसो मताः॥ कथं काव्यतः सर्वेषामीदृशी रसाभिव्यक्तिर्न जायत इत्याह॥ न जायते तदास्वादो विना रत्यादिवासनां
वासनाश्चेदानीतनी प्राक्तनी च रसास्वादहेतुः। तत्र यद्याद्या न स्यात्तदा श्रोत्रियजरन्मीमांसकादीनामपि स्यात्। यदि द्विती-
या न स्यात्तदा यद्रागिणामपि केषांचिद्रसबोधो न दृश्यते तन्न स्यात्॥ उक्तं च धर्मदत्तेन॥ सवासनानां सभ्यानां रसस्यास्वाद-
नं भवेत्। निर्वासनास्तु रंगांतःकाष्ठकुड्याश्मसन्निभाः॥ इति ननु कथं रामादिरत्याद्युद्बोधकारणैः सामाजिकरत्युद्बोध इत्युच्यते
व्यापारोस्ति विभावादेर्नाम्ना साधारणीकृतिः। तत्प्रभावेन यस्यासन् पाथोधिप्लवनादयः। प्रमाता तदभेदेन स्वात्मानं प्र-

तिपद्यते। कथंमनुष्यमात्रस्यसमुद्रलंघनादावुत्साहोद्बोध इत्युच्यते॥ उत्साहादिसमुद्बोधः साधारण्याभिमानतः। नृणा
मपिसमुद्रादिलंघनादौनदुष्यति। रत्यादयोपिसाधारण्येनप्रतीयंतइत्याह। साधारण्येनरत्यादिरपितद्वत्प्रतीयते। रत्यादेर
पिस्वात्मगतत्वेनप्रतीतौसभ्यानांव्रीडातंकादिर्भवेत्। परगतत्वेनत्वरस्यतापत्तिः। विभावादयोपिसाधारण्येनप्रतीयंत इ
त्याह॥ परस्यनपरस्येतिनममेतिममेतिच। तदास्वादेविभावादेः परिच्छेदोनविद्यते। ननुतथापिकथमेवमलौकिकत्वते
षांविभावादीनामित्युच्यते॥ विभावनादिव्यापारमलौकिकमुपेयुषां। अलौकिकत्वमेतेषां भूषणंनतुदूषणं॥ आदिशब्दा
दनुभावनसंचारणे॥ तत्रविभावनंरत्यादेर्विशेषेण स्वादांकुरणयोग्यतानयनं॥ अनुभावनमेवंभूतस्यरत्यादेःसमनंत
रमेवरसादिरूपतयाभावनं। संचारणंतथाभूतस्यैवतस्यसम्यक्चारणं। विभावादीनांयथासंख्यं कार्यकारणसहका
त५ रित्वेकथंत्रयाणामपिरसोद्बोधकारणमित्युच्यते। कारणकार्यसंचारिरूपा अपिहिलोकतः। रसोद्बोधेविभावाद्याः का
रणान्येवतेमताः। ननुकथंतर्हिरसास्वादेतेषामेकःप्रतिभास इत्युच्यते॥ प्रतीयमानःप्रथमंप्रत्येकंहेतुरुच्यते। ततःसं
वलितःसर्वोविभावादिःसचेतसां। प्रपानकरसन्याया चर्व्यमाणोरसोभवेत्॥ यथा खंडमरीचादीनांसंमेलनादपूर्वइ
वकश्चिदास्वादःप्रपानकरसेसंजायते विभावादिसंमेलनादिहापितथेत्यर्थः। ननुयदिविभावानुभावव्यभिचारिभिर्मिलि १०
तैरेवरसस्तत्कथंतेषामेकस्यद्वयोर्वासद्भावेरसःस्यादेवेत्युच्यते॥ सद्भावश्चेद्विभावादेर्द्वयोरेकस्यवाभवेत्। झटित्यन्यस

तामियाद्रसस्यै ६

माक्षेपे तदा दोषो न विद्यते। अन्यसमाक्षेपश्च प्रकरणादिवशात्॥ यथा॥ दीर्घाक्षं शरदिन्दुकान्ति वदनं बाहू नतावंसयोः
संक्षिप्तं निविडोन्नतस्तनमुरः पार्श्वे प्रमृष्टे इव मध्यः पाणिमितो नितम्बि जघनं पादावुदग्राङ्गुली छन्दो नर्तयितुर्यथैव मनसः स्पृ
ष्टं तथास्या वपुः। अत्र मालविकामभिलषतोऽग्निमित्रस्य मालविकारूपविभावमात्रवर्णनेऽपि संचारिणामौत्सुक्यादीनामनु
भावानां च नयनविकासादीनामौचित्यादेवाक्षेपः एवमन्याक्षेपेऽप्यूह्यम्। अनुकार्यगतो रस इति वदतः॥ प्रत्याह॥ पारमित्याल्लौकि
कत्वात्सान्तरायतया तथा। अनुकार्यस्य रत्यादेरुद्बोधो न रसो भवेत्। सीतादिदर्शनादिजो रामादिरत्युद्बोधो हि परिमितो लौ
किको नाट्यकाव्यदर्शनादेः सान्तरायस्तस्मात्कथं रसरूपतद्धर्मत्रयविलक्षणधर्मकत्वात्। अनुकर्तृगतत्वं चास्य निरस्यति
शिक्षाभ्यासादिमात्रेण राघवादेः सरूपताम्। दर्शयन्नर्तको नैव रसस्यास्वादको भवेत्॥ किं च॥ काव्यार्थभावनेनायमपि सभ्यप
दास्पदम्। यदि पुनर्नटोऽपि काव्यार्थभावनया रामादिरूपतामात्मनो दर्शयेत्तदा सोऽपि सभ्यमध्य एव गण्यते॥ नायं ज्ञाप्यः॥ स्व
सत्तायां प्रतीत्यव्यभिचारतः। यो हि ज्ञाप्यो घटादिः स सन्नपि कदाचिदज्ञातो भवति न ह्ययं तथा प्रतीतिमन्तरेणाभावात्। यस्मा
देष विभावादिसमूहालम्बनात्मकः। तस्मान्न कार्यः। यदि रसः कार्यः स्यात्तद्विभावादिज्ञानकारणक एव स्यात्। ततश्च रसप्रतीति
काले विभावादयो न प्रतीयेरन्। कारणज्ञानकार्यज्ञानयोर्युगपद्दर्शनात्। न हि चन्दनस्पर्शज्ञानं तज्जन्यसुखज्ञानं चैक
दा भवति। रसस्य विभावादिसमूहालम्बनात्मकतयैव प्रतीतेर्न विभावादिज्ञानकारणत्वमित्यभिप्रायः॥ नो नित्यः पूर्व

साहित्यदर्पण ११ ॥ संवेदनोज्झितेः। असंवेदनकाले हि नभावोप्यस्य विद्यते। नखलु नित्यस्य वस्तुनोऽसंवेदनकालेऽसंभवः। नापि भविष्यन्
साक्षादानंदमयप्रकाशरूपत्वात्। कार्यज्ञाप्यविलक्षणभावाच्च नवर्तमानोपि विभावादिपरामर्शविषयत्वात्सचेतसां प
रानंदमयत्वेन संवेद्यत्वादपि स्फुटं ननिर्विकल्पकज्ञानं तस्यग्राहकमिष्यते। तथाभिलापसंसर्गयोग्यत्वविरहान्नच सा
विकल्पकसंवेद्यः। सविकल्पकज्ञानसंवेद्यानां हि वचनप्रयोगयोग्यता नतु रसस्य। तथा साक्षात्कारतया नच परोक्षस्त
त्प्रकाशो नापरोक्षः शब्दसंभवात्। तत्कथमकीदृशस्य तत्वमश्रुतादृष्टपूर्वनिरूपणप्रकारस्येत्याह। तस्मादलौकिकः सत्यं
वेद्यः सहृदयैरयं। तत्किं प्रमाणं तु नस्तस्य सद्भावे इत्याह॥ प्रमाणं चर्वणैवात्र स्वाभिन्ने विदुषां मतं। चर्वणास्वादनं तच्च
स्वादः काव्यार्थसंवेदात्मानंदसमुद्भवः इत्युक्तप्रकारं। ननु यदि रसो नकार्यस्तत्कथं महर्षिणा विभावानुभावव्यभिचारि
संयोगाद्रसनिष्पत्तिरिति लक्षणं कृतं। उच्यते॥ निष्पत्त्या चर्वणस्यैव निष्पत्तिरुपचारतः। यद्यपि रसाभिन्नतया चर्वणस्या
पि नकार्यत्वं तथापि तस्य कादाचित्कतया कार्यत्वमुपचर्यते। अवाच्यत्वादिकं तस्य वक्ष्ये व्यंजनरूपणे। तस्य श्रादिशब्दा
त्लक्ष्यत्वादि। ननु यदि मिलिता रत्यादयो रसस्तत्कथमस्य स्वप्रकाशत्वं कथं वाखंडत्वमित्याह। रत्यादिज्ञानतादात्म्यादेव य
स्माद्रसो भवेत्। अतोस्य स्वप्रकाशत्वमखंडत्वं च सिध्यति। यदि रत्यादिप्रकाशशरीरातिरिक्तं स्यात्तदेवास्य स्वप्रकाशत्वं ११
नसिध्येत् नच तथा तादात्म्यांगीकारात्। उक्तं हि॥ यद्यपि रसानन्यतया चर्वणापि नकार्या। तथापि कादाचित्कतया कार्य

त्वमुपकल्प्य तदेकात्म्यत्वेनादिवासनापरिणतेरूपं रत्यादिस्तागेव्यवहारइति । सुखादितादात्म्यांगीकारेचास्माकीनं सि-
द्धांतन्नाग्यामधिश्राय्य दिव्यवर्षसहस्रं प्रमोदनिद्रामुपेयादिति च । अस्तित्वेपिस्वप्रमात्रावासनोपनीतरत्यादितादात्म्येनगो-
चरीकृतइतिच ज्ञानस्यस्वप्रकाशत्वमनंगीकुर्वतामुपरिवेदांतिभिरेवपातनीयोदंभः । तादात्म्यादेवास्याखंडत्वं रत्यादयो
हि प्रथममेकैकशःप्रतीयमानाःसर्वेप्येकीभूताःस्फुरंतएवरसतामापाद्यंते ॥ तदुक्तं ॥ विभावाअनुभावाश्च सात्विकाव्य-
भिचारिणः प्रतीयमानाःप्रथमं खंडशोयांत्यखंडतां ॥ परमार्थतस्त्वखंडएवायंवेदांतप्रसिद्धब्रह्मतत्त्ववद्वेदितव्यइतिच । अ-
यकेतेविभावानुभावव्यभिचारिणएवइत्यपेक्षायांविभावानाह ॥ रत्याद्युद्बोधकालोकेविभावाःकाव्यनाट्ययोः । येहिलोकेरा-
मादिगतरत्याद्युद्बोधकारणानिसीतादयस्तएवकाव्यनाट्यनिवेशिताःसंतोविभाव्यतेआस्वादांकुरणप्रादुर्भावयोग्याःक्रिय-
तेसामाजिकरत्यादिभावाएभिरितिविभावाइत्युच्यते ॥ तदुक्तं हरिणा ॥ शब्दोपहितरूपांस्तान् बुद्धेर्विषयतांगतान् प्रत्यक्षा-
निवकंसादीन्साधनत्वेनमन्यतइति । तद्भेदावाह । आलंबनोद्दीपनाख्यौतस्यभेदावुभौमतौ ॥ स्पष्टं ॥ तत्रआलंबनोनायका-
दिस्तमालंब्यरसोदयात् । आदिशब्दान्नायकप्रतिनायकादयः । योयस्यरसस्यविभावः सतत्स्वरूपवर्णनेवक्ष्यते । तत्रना-
यकः त्यागीकृतीकुलीनःसुश्रीकोरूपयौवनोत्साही । दक्षोनुरक्तलोकस्तेजोवैदग्ध्यशीलवान्नेता । दक्षः प्रियकारी शी-
लसद्वृत्तं एवमादिगुणसंपन्नोनेतानायकोभवति ॥ तद्भेदानाह ॥ धीरोदात्तोधीरोद्धतस्तथाधीरललितश्च धीरप्रशांतइत्ययमु-

साहित्यदर्पण. १२

कः। अथमस्यचतुर्भेदः॥स्पष्टं॥ तत्रधीरोदात्तः। अविकत्थनःक्षमावानतिगंभीरोमहासत्वः। स्थेयान्निगूढमानोधीरोदात्तोदृढ
व्रतःकथितः। अविकत्थनोऽनात्मश्लाघापरः महासत्वोहर्षशोकाद्यनभिभूतस्वभावः। निगूढमानोविनयछन्नगर्वः। दृढव्रतो
ङ्गीकृतनिर्वाहकः। यथारामयुधिष्ठिरादिः। अथधीरोद्धतः। मायापरःप्रचण्डश्चपलोऽहंकारदर्पभूयिष्ठः। आत्मश्लाघानिरतोधी
रैर्धीरोद्धतःकथितः॥यथाभीमसेनादिः॥अथधीरललितः। निश्चिन्तोमृदुरनिशं कलापरोधीरललितःस्यात्। यथारत्नावल्यां
वत्सराजः। अथधीरप्रशान्तः। सामान्यगुणैर्भूयान्। द्विजादिकोधीरशान्तःस्यात्। यथामालतीमाधवादौमाधवः॥ एषांचशृंगा
रिरूपत्वेनेदानाह। एभिर्दक्षिणधृष्टानुकूलशठस्वरूपिभिस्तुषोडशधा॥ तत्रतेषांधीरोदात्तादीनांप्रत्येकंदक्षिणधृष्टानुकूलश
ठत्वेषोडशप्रकारोनायकः। एषुत्वेकमहिलासमरागोदक्षिणःकथितः। द्वयोस्त्रिचतुःप्रभृतिषुवानायिकासुतुल्यानुरागोद
क्षिणनायकः॥यथा॥स्नातातिष्ठतिकुन्तलेश्वरसुतावारोङ्गराजस्वसुः। द्यूतेरात्रिरियंजिताकमलयादेवीप्रसाद्याद्यच।
इत्यन्तःपुरसुन्दरीःप्रतिमयाविज्ञायविज्ञापिते॥ देवेनाप्रतिपत्तिमूढमनसाद्वित्राःस्थितंनाडिकाः। कृतागाअपिनिःशंकस्त
र्जितोपिनलज्जितः। दृष्टदोषोपिमिथ्यावाक्कथितोधृष्टनायकः॥यथाभम॥शोणंवीक्ष्यमुखंविचुम्बितमहंयातःसमीपंततः
पादेनप्रहृतंतयासपदितंधृत्वासहासेमयि। किंचित्तत्रविधातुमक्षमतयाबाष्पंत्यजन्त्याःसखे। ध्यातश्चेतसिकौतुकंवित १२
नुतेकोपोपिवामभ्रुवः। अनुकूलएकनिरतः। एकस्यांनायिकायामनुरक्तोनुकूलनायकः॥यथा॥अस्माकंसखिवाससी

=विम्बनितिपाठः। विम्बं मदितवकामिनीजघनाणांइयतावत्रघाटिनिक्षेपाभावमात्रेणदुःस्थितंदुःस्थितं मन्यामहे॥२॥ प्रासंगिकं वृत्तानिमिदृशं चनास्मिन्॥१॥

न रुचिरे ग्रैवेयकं नोज्ज्वलं। नो वक्रा गतिरुद्धतं न हसितं नैवास्ति कश्चिन्मदः। किं त्वन्येऽपि जना वदंति सुभगोऽप्यस्याः पति
र्नान्यतो दृष्टिं निक्षिपतीति सर्वमियता मन्यामहे दुःस्थितं। शठोऽयमेकत्र बद्धभावो यः दर्शितबहिरनुरागो विप्रियमन्यत्र
गूढमाचरति यः पुनरेकस्यामेव नायिकायां बद्धभावो द्वयोरपि नायिकयोर्बहिर्दर्शितानुरागोऽन्यस्यां नायिकायां गूढं वि
प्रियमाचरति स शठनायकः॥ यथा॥ शठोऽन्यस्याः काञ्चीमणिरणितमाकर्ण्य सहसा यदाश्लिष्यन्नेव प्रशिथिलभुजग्रंथिर
भवः तदेतत्क्वाचक्षे घृतमधुमय त्वद्बहुवचो विषेणाघूर्णंती किमपि न सखी मे गणयति॥ एषां त्रैविध्यात्सर्वेषामुत्तममध्य
माधमत्वेन उक्ता नायकभेदाश्चत्वारिंशन्नयाष्टौ च॥ सर्वेषामुक्तं षोडशभेदानां॥ अथ प्रसंगात्तेषां सहायानाह॥ दूरानुव
र्तिनि स्यात्तस्य प्रवेशः संगिके तिवृत्ते च किंचिन्नगुणहीनः सहाय एवास्य पीठमर्दाख्यः॥ तस्य नायकस्य बहुव्यापिनि प्रसं
गगते तिवृत्तेऽनंतरोक्तैर्नायकसामान्यगुणैः किंचिदूनः पीठमर्दनामा सहायो भवति॥ यथा रामादीनां सुग्रीवादयः॥ अ
थ शृंगारविषये सहायाः॥ शृंगारस्य सहायाः विटचेटविदूषकाद्याः स्युः भक्ता नर्मसु निपुणाः कुपितवधूमानभंजनाः शु
द्धाः आदिशब्दान्मालाकाररजकतांबूलिकगांधिकादयः तत्र विटः संभोगहीनसंपद्विटस्तु धूर्तः कलैकदेशज्ञः॥ वेषोप
चारकुशलो वाग्मी मधुरोऽथ बहुमतो गोष्ठ्यां चेटः कलहप्रसिद्ध एव कुसुमवसंताद्यभिधः कर्मवपुर्वेषभाषाद्यैः हास्यक
रः कलहरतिर्विदूषकः स्यात्स्वकर्मज्ञः स्वकर्म भोजनादि॥ अथ चिंतनसहायमाह॥ मंत्री स्यादर्थानां चिंतायां अर्था

स्तत्रावापादय। यत्वत्र सहायकथनप्रस्तावे मंत्री स्वस्य चोभयस्य वापि सखा तस्यार्थचिंतन इति केनचिल्लक्षणं कृतं तदपिरा
ज्ञोर्थचिंतनोपायलक्षणप्रकरणे लक्षितव्यं नतु सहायकथनप्रस्तावे नायकस्यार्थचिंतने मंत्री सहाय इत्युक्तेपि नाय
कस्यार्थत एव सिद्धत्वात्॥ यदप्युक्तं॥ मंत्रिणा ललितः शेषा मंत्रिस्वायत्तसिद्धयः तदपि लक्षणकथने नैव धीरललितस्य मं
त्रिमात्रायत्तार्थचिंतनोपपत्तेर्गतार्थं नचार्थचिंतने तस्य मंत्री सहायः किंतु स्वयमेव निष्पादकस्तस्यार्थचिंतनाद्यभावात्
अथांतःपुरसहायाः। तद्वदवरोधे वामनषंढकिरातम्लेछाभीराः शकारकुब्जाद्याः। मदमूर्खताभिमानी दुःकुलतैश्वर्यसं
पन्नः सोयमनूढाभ्राता राज्ञः श्यालः शकार इत्युक्तः। आद्यशब्दान्मूकादयः तत्र षंढवामनकुब्जादयो॥ यथा रत्नावल्यां॥ न
ष्टं वर्षवरैर्मनुष्यगणनाभावादपास्य त्रपा मंतः कंचुकिकंचुकस्य विशति त्रासादयं वामनः। पर्यंताश्रयिभिर्निजस्य सदृ
शं नाम्नः किरातैः कृतं कुब्जा नीचतयैव यांति शनकैरात्मेक्षणाशंकिनः। शकारो मृच्छकटिकादिषु प्रसिद्धः। अन्येपि यथा
दर्शनं ज्ञेयाः। अथ दंडसहायाः। दंडे सुहृत्कुमाराटविकाः सामंतसैनिकाद्याश्च दुष्टनिग्रहो दंडः॥ स्पष्टं॥ अथ धर्मसहायाः
ऋत्विक्पुरोधसः स्युर्ब्रह्मविदस्तापसास्तथा धर्मे ब्रह्मविदो वेदविद आत्मविदो वा अत्र चोत्तमाः पीठमर्दाद्याः आदिशब्दा
न्मंत्रिपुरोहितादयः मध्यो विटविदूषकौ तथा शकारचेटाद्या अधमाः परिकीर्तिताः आद्यशब्दात्ताम्बूलिकगांधिकादयः॥ १३
अथ प्रसंगाद्दूतानां विभागगर्भं लक्षणमाह॥ निसृष्टार्थो मितार्थश्च तथा संदेशहारकः कार्यप्रेष्यस्त्रिधा दूता दूत्यश्चापि तथा

विधाः। अत्रकार्यप्रेष्योऽहंतवइतिलक्षणंतत्र। उभयोर्भावमुन्नीय स्वयंवदतिचोत्तरं सुश्लिष्टंकुरुतेकार्यंनिसृष्टार्थस्तु
सस्मृतः। उभयोरपियेनप्रेषितोयद्वदतिकंचपत्रदितः मितार्थभाषीकार्यस्यसिद्धिकारीमितार्थकः। यावद्भाषितसंदेशहारी
संदेशहारकः॥ अथसात्त्विकानायकगुणाः॥ शोभाविलासोमाधुर्यंगांभीर्यंधैर्यतेजसी। ललितौदार्यमित्यष्टौ सात्त्विकाः
पौरुषागुणाः। तत्रशूरतादक्षतासत्यं महोत्साहोऽनुरागिता। नीचेघृणाधिकेस्पर्धायतःशोभेतितांविदुः॥ तत्रानुरागितायथा
॥ अहमेवमतोमहीपतेरिति सर्वःप्रकृतिष्वचिंतयत्। उदधेरिवनिम्नगाशतेष्वभवन्नास्यविमाननाक्वचित्। एवमन्यदप्यू
ह्यं विलासः धीरादृष्टिर्गतिश्चित्रा विलासेसस्मितंवचः॥ यथा॥ दृष्टिस्तृणीकृतजगत्त्रयसत्त्वसारा धीरोद्धतानमयतीवगतिर्ध
रित्री कौमारकेऽपिगिरिवद्गुरुतांदधानो॥ वीरोरसः॥ किमयमेत्युतदर्पएव संक्षोभेष्वप्यनुद्वेगो माधुर्यंपरिकीर्तितं ऊ
ह्यमुदाहरणं। व्यवसायादचलनं धैर्यंविघ्नेमहत्यपि॥ यथा॥ श्रुताप्सरोगीतिरपिक्षणेऽस्मिन् हरःप्रसंख्यानपरोबभूव।
आत्मेश्वराणांनहिजातुविघ्नाःसमाधिभेदप्रभवोभवंति। शोकक्रोधहर्षाद्यैर्गांभीर्यंनिर्विकारिता॥ यथा॥ आहूतस्याभिषे
कायविसृष्टस्यवनायच। नमयालक्षितस्तस्यस्वल्पोऽप्याकारविभ्रमः। अधिक्षेपापमानादेःप्रयुक्तस्यपरेणयत्। प्राणात्य
येऽप्यसहनं तत्तेजःसमुदाहृतं वाग्वेषयोर्मधुरता तद्वच्छृंगारचेष्टितंललितं दानंसप्रियभाषणमौदार्यंशत्रुमित्रयोःसम
ता। एषामप्युदाहरणान्यूह्यानि॥ अथनायिकात्रिभेदा॥ स्वाऽन्यासाधारिणीस्त्रीति नायकसामान्यगुणैर्भवति यथासंभ

लज्जापर्याप्तप्रसाधनानि परचिंतानिष्पिपासानि। अविनयदुर्मेधानि धन्यानां गेहे कलत्राणि। १

साहित्यदर्प्पण
१४
14

वैर्युक्ता। नायिका पुनर्नायकसामान्यगुणैस्त्यागादिभिर्यथासंभवैर्युक्ता भवति। सा च स्वस्त्री अन्या साधारणस्त्रीति त्रि
भेदा। तत्र स्वस्त्री। विनयार्जवादियुक्ता गृहकर्मपरा पतिव्रता स्वीया॥ यथा॥ लज्जापज्जत्तपसाहणाइं परतत्तिणिप्पिपासा
इं। अविणअदुम्मेहाइं धण्णाणं घरे कलत्ताइं। सापि कथिता त्रिभेदा मुग्धा मध्या प्रगल्भेति। तत्र प्रथमावतीर्णयौवनमदन
विकारा रतौ वामा॥ कथिता मृदुश्च माने समधिकलज्जावती मुग्धा। तत्र प्रथमावतीर्णयौवना यथा॥ मम तातपादानां। म
ध्यस्य प्रथिमानमेति जघनं वक्षोजयोर्मंदता। दूरं यात्युदरं च रोमलतिका नेत्रार्जवं धावति। कंदर्पं परिवीक्ष्य नूतनमनोराज्या
भिषिक्तं क्षणा। दंगानीव परस्परं विदधते निर्लुंठनं सुभ्रुवः। प्रथमावतीर्णमदनविकारा॥ यथा॥ मम प्रभावतीपरिणये। दत्ते
सालसमंथरं भुवि पदं निर्याति नांतःपुरान्नोद्दामं हसति क्षणात्कलयति ह्रीयंत्रणां कामपि। किंचिद्भावगभीर वक्रिमलव
स्पृष्टं मनाग्भाषते। सभ्रूभंगमुदीक्षते प्रियकथामुल्लापयंतीं सखीं॥ रतौ वामा यथा॥ दृष्टा दृष्टिमधो ददाति कुरुते नालापमा
भाषिता। शय्यायां परिवृत्य तिष्ठति बलादालिंगिता वेपते। निर्यांतीषु सखीषु वासभवनान्निर्गंतुमेवेहते। जाता वामतयैव सं
प्रति मम प्रीत्यै नवोढा प्रिया। माने मृदु यथा॥ सा पत्युः प्रथमेपराधसमये सख्योपदेशं विना। नो जानाति सविभ्रमांगवलनं व
क्रोक्तिसंसूचनं। स्वच्छैरच्छकपोलपालिगलितैः पर्यस्तनेत्रोत्पला। बाला केवलमेव रोदिति गलल्लोलोदकैरश्रुभिः॥ समधिक १४
लज्जावती यथा॥ दत्ते सालसमित्यत्रैव श्लोके। अत्र समधिकलज्जावत्त्वेनापि रसाय रतिवामताया विच्छित्तिविशेषवत्तया

पुनः कथनं ॥ अथ मध्या ॥ मध्या विचित्रसुरता प्ररूढस्मरयौवना । ईषत्प्रगल्भवचना मध्यमव्रीडिता तथा ॥ विचित्रसुर
तायथा ॥ कांते तथा कथमपि प्रथितं मृगाक्ष्या चातुर्यमुद्धतमनोभवया रतेषु । तत्कूजितान्यनुवदद्भिरनेकवारं । शिष्या
यितं गृहकपोतशतैर्यथास्याः ॥ प्ररूढस्मरा यथा तत्रैव ॥ प्ररूढयौवनायथा ॥ नमनेत्रे खंजनगंजने सरसिजप्रत्यर्थिपाणिद्व
यं वक्षोजौ करिकुंभविभ्रमकरीमत्युन्नतिं गच्छतः । कांतिः कांचनचंपकप्रतिनिधिर्वाणी सुधास्पर्द्धिनी ॥ स्मेरेंदीवरदामसो
दरवपुस्तस्याः कटाक्षच्छटा । एवमन्यत्रापि ॥ अथ प्रगल्भा ॥ स्मरांधा गाढतारुण्या । समस्तरतिकोविदा । भावोन्नता दरव्रीडा । प्रग
ल्भाक्रांतनायका ॥ स्मरांधायथा ॥ धन्यासि या कथयसि प्रियसंगमेपि । विश्रब्धचाटुकशतानि रतांतरेषु ॥ नीवीं प्रति प्रणिहिते
तु करे प्रियेण । सख्यः शपामि यदि किंचिदपि स्मरामि ॥ गाढतारुण्यायथा ॥ अभ्युन्नतस्तनभरो नयने सुदीर्घे । वक्रे भ्रुवावतित
रां वचनं ततोपि । मध्योधिकं तनुरनूनगुरुर्नितंबो ॥ मंदा गतिः किमपि चाद्भुतयौवनायाः ॥ विविधसुरतज्ञायथा ॥ क्वचित्तांबूला
क्तः क्वचिदगुरुपंकांकमलिनः । क्वचिच्चूर्णोद्गारी क्वचिदपि च सालक्तकपदः । वलीभंगाभोगैरलकपतितैः शीर्णकुसुमैः स्त्रियाः
सर्वावस्थं कथयति रतं प्रच्छदपटः ॥ भावोन्नतायथा ॥ मधुरवचनैः सभ्रूभंगैः कृतांगुलितर्जनैः । रभसरचितैरंगन्यासैर्महोत्स
वबंधुभिः । असकृदसकृत्स्फारस्फारैरपांगविलोकितैस्त्रिभुवनजये सा पंचेषोः करोति सहायतां ॥ अथ दरव्रीडायथा ॥ ध
न्यासि या कथयसीत्यत्रैव ॥ आक्रांतनायकायथा ॥ स्वामिन्भंगुरयालकं सतिलकं । भालं विलासिन्कुरु । प्राणेश त्रुटितं

पयोधरतटेहारंस्तनयोर्जय॥ इत्युक्त्वासुरतावसानसमयेसंपूर्णचंद्रानना। स्पृष्टातेनतथैवजातपुलकाप्राप्तापुनर्मोहनं
॥मध्याप्रगल्भयोर्भेदांतराण्याह॥ तेधीराचाप्यधीराच धीराधीरेतिषड्विधे। तेमध्याप्रगल्भे। तत्रसोत्प्रासवक्रोक्त्या। मध्याधीरावदे
त्क्रुधा। धीराधीरातुरुदितैरधीरापरुषोक्तिभिः॥ तत्रमध्याधीरायथा॥ तदवितथमवादीर्यन्ममत्वंप्रियेतिप्रियजनपरिभुक्तं
यद्दुकूलंदधानः। मदधिवसतिमागाःकामिनांमंडनश्री। र्व्रजतिहिसफलत्वंवल्लभालोकनेन॥ मध्यैवधीराधीरायथा॥ बाले
नाथविमुंचमानिनिरुषंरोषान्मयाकिंकृतं। खेदोस्मासुनमेपराध्यतिभवान्सर्वेपराधामयि। तत्किंरोदिषिगद्गदेनवच
साकस्याग्रतोरुद्यते। नन्वेतन्ममकातवास्मिदयितानास्मीत्यतोरुद्यते॥ इयमेवाधीरायथा॥ सार्धंमनोरथशतैस्तववधूर्तकां
ता। सैवस्थितामनसिकृत्रिमभावरम्या। अस्माकमस्तिनकथंचिदिहावकाश। स्तस्मात्कृतंचरणपातविडंबनाभिः। प्रगल्भाय
दिधीरास्याच्छन्नकोपाकृतिस्तदा। उदास्तेसुरतेतत्रदर्शयंत्यादरान्बहिः॥ तत्रप्रियेयथा॥ एकत्रासनसंस्थितिःपरिहृताप्रत्यु
द्गमाद्दूरतः। तांबूलाहरणच्छलेनरभसाश्लेषोपिसंविघ्नितः। आलापोपिनमिश्रितःपरिजनंव्यापारयंत्यांतिके। कांतंप्रत्युपचा
रतश्चतुरयाकोपःकृतार्थीकृतः। धीराधीरातुसोल्लुंठभाषितैःखेदयेदमुं॥ यथा॥ मम। अनलंकृतोपिसुंदरहरसियतोमेमनः
प्रसन्नं। किंपुनरलंकृतस्त्वं। संप्रतिनखरक्षतैस्तस्याः॥ तर्जयेत्ताडयेदन्या॥ अत्राप्यधीराप्रगल्भाणांवीक्षमुखमित्यत्रैव। अत्रचस
र्वत्ररुषेत्यनुवर्तते। प्रत्येकंताअपिद्विधा। कनिष्ठज्येष्ठरूपत्वान्नायकप्रणयंप्रति। ताअनंतरोक्ताःषड्भेदानायिकाः॥ यथा॥ १५

दृष्ट्वैकासनसंस्थिते प्रियतमे पश्चादुपेत्यादरादेकस्या नयने निमील्य विहितक्रीडानुबंधच्छलः। ईषद्वक्रितकंधरः स
पुलकप्रेमोल्लसन्मानसामंतर्हासलसत्कपोलफलकां धूर्तोपरां चुंबति। मध्याप्रगल्भयोर्भेदास्तेन द्वादश कीर्तिताः
मुग्धा त्वेकैव तेन स्युः स्वीयाभेदास्त्रयोदश। परकीया द्विधा प्रोक्ता परोढा कन्यका तथा। तत्र यात्रादिनिरतान्योढा कुलटा
गलितत्रपा॥ यथा॥ स्वामी निःश्वसितेप्यसूयति मनोजिघ्रः सपत्नीजनः। श्वश्रूरिंगितदैवतं नयनयोरीहालिहो यातरः। तद्दू
रादयमंजलिः किमनुना दृष्टंगितेनावेन ते वैदग्धीमधुरप्रबंधरसिकव्यर्थोयमत्रश्रमः। अत्र द्विमम पुरिणेतान्नाच्छादनदा
तृतया स्वाम्येव न तु वल्लभस्त्वं तु वैदग्धीमधुरबधरसिकतया मम वल्लभोसीत्यादि व्यंग्यपार्थ्यवशादस्याः परकामुकविष
प६ यारतिः प्रतीयते। कन्या त्वजातोपयमा सलज्जा नवयौवना। अस्याः पित्राद्यायत्तत्वात्परकीयत्वं॥ यथा मालतीमाधवादौ मा
लत्यादि॥ धीराकलाप्रगल्भा स्याद्वेश्या सामान्यनायिका। निर्गुणानपि न द्वेष्टि न रज्यति गुणिष्वपि। वित्तमात्रं समालोक्य सा
रागं दर्शयेद्बहिः। काममंगीकृतमपि परिक्षीणधनं नरं। मात्रा निःकाशयेदेषा पुनःसंधानकांक्षया। तस्कराः पुंडकामूर्खाः
ःसुखप्राप्तधनास्तथा। लिंगिनः छिन्नकामाद्या आसां प्रायेण वल्लभाः। एषापि मदनायत्ता क्वापि सत्यानुरागिणी। रक्तायां वा वि
रक्तायां रतमस्यां सुदुर्लभं। प्रच्छन्नये कामयंते ते प्रच्छन्नकामाः पुंडुको वा तपुंढुकादिः। तत्र रागहीना यथा। लटकमेलका
दौ मदनमंजर्यादिः। रक्ता यथा मृच्छकटिकादौ वसंतसेनादिः। पुनः अवस्थाभिर्भवत्यष्टावेताः षोडशभेदिताः। स्वाधीनप

ईर्ष्यका तद्वत्खण्डिताथाभिसारिका कलहान्तरिता वि लब्धा प्रोषितभर्तृका अन्या वासकसज्जा स्याद्विरहोत्कण्ठिता तथा न
त्र कान्तो रतिगुणाकृष्टो न जहाति यदन्तिकं विचित्रविभ्रमासक्ता सा स्यात्स्वाधीनभर्तृका ॥ यथा ॥ अस्माकं सखि वाससी
न रुचिरे इत्यादि पार्श्वमेति प्रियो यस्या अन्यसंभोगचिह्नितः सा खण्डितेति कथिता धीरैरीर्ष्याकषायिता ॥ यथा ॥ तदवि
तथमवादीरि अभिसारयते कान्तं या मन्मथवशंवदा स्वयं वाभिसरत्येषा धीरैरुक्ताभिसारिका ॥ क्रमाद्यथा ॥ न च मेवगच्छ
ति यथा लघुतां करुणां यथा स कुरुते च मयि निपुणं तथैनमभिगम्य वदेरभिदूतिका विदिति संदिदिशे उज्झितमकरकंकण
क्वणमिदं बधान दृढमेखला यत्नेन प्रतिपादिता मुखरयोर्मञ्जीरयोर्मूकता आरब्धे रभसान्मया प्रियसखि क्रीडाभिसारोत्सवे ॥
चण्डालस्तिमिरावगुण्ठनपटाक्षेपं विधत्ते विधुः संलीना स्वेषु गात्रेषु मूकीकृतविभूषणा अवगुण्ठनसंवीता कुलजाभिस
रेद्यदि विचित्रोज्ज्वलवेषा तु रणन्नूपुरकंकणा प्रमोदस्मेरवदना स्याद्वेश्याभिसरेद्यदि मदस्खलितसंलापा विभ्रमोत्फुल्ल
लोचना आविद्धगतिसंचारा स्यात्प्रेष्याभिसरेद्यदि तत्राद्ये उज्झितमित्यादि ॥ अन्ययोरूह्यमुदाहरणं ॥ प्रसंगादभिसारिका॥
नां स्थानानि कथ्यन्ते क्षेत्रं वाटी भग्नदेवालयो दूतीगृहं वनं ॥ मालामेचाः ॥ श्मशानानि नद्यादीनां तटी यथा एवं कृताभिसारा
णां पुंश्चलीनां विनोदने स्थानान्यष्टौ तथा ध्वान्तच्छन्ने कुत्रचिदाश्रयः चाटुकारमपि प्राणनाथं रोषादपास्य या पश्चात्तापमवाप्नो॥ १६
ति कलहान्तरिता तु सा ॥ यथा मम नात पादान्तं ॥ नो चाटुश्रवणे कृतं न च दृशा हारोऽन्तिके वीक्षितः कान्तस्य प्रियहेतवे निजसखी

वाच्योपि दूरीकृताः। पादांते विनिपत्य तत्क्षणमसौ गच्छन्मया मूढया। पाणिभ्यामवरुध्य हंत सहसा कंठे कथं नार्पितः॥ प्रि-
यः कृत्वापि संकेतं यस्या नायाति संनिधिं। विप्रलब्धा तु सा ज्ञेया नितांतमवमानिता॥ यथा॥ उत्तिष्ठ दूति यामो यामो यातस्तथा-
पि नायातः। याऽतः परमपि जीवेत् जीवितनाथो भवेत्तस्याः। नानाकार्यवशाद्यस्या दूरदेशं गतः पतिः। सा मनोभवदुःखार्त्ता भवे-
त्प्रोषितभर्तृका॥ यथा॥ तां जानीयाः परिमितकथां जीवितं मे द्वितीयं दूरीभूते मयि सहचरे चक्रवाकीमिवैकां। गाढोत्कंठां गुरु-
षु दिवसेष्वेषु गच्छत्सु बालां जातां मन्ये शिशिरमथितां पद्मिनीं वान्यरूपां॥ कुरुते मंडनं यस्याः सज्जिते वासवेश्मनि। सा तु वासक-
सज्जा स्याद्विदितप्रियसंगमा॥ यथा राघवानंदानां॥ विदूरे केयूरे कुरु करयुगे रत्नवलयैरलं गुर्वी। ग्रीवाभरणलतिकेयं
किमनया। नवामेकामेकावलिमयि मयि त्वं विरचये। न पथ्यं नेपथ्यं बहुतरमनंगोत्सवविधौ॥ आगंतुं कृतचित्तोपि दैवान्नाया-
ति यत्प्रियः। तदनागमदुःखार्त्ता विरहोत्कंठिता तु सा॥ यथा॥ किं रुद्धः प्रिययाकयाचिदथवा सख्या ममोद्वेजितः। किं वा कार-
णगौरवं किमपि यन्नाद्यागतो वल्लभः। इत्यालोच्य मृगीदृशा करतले विन्यस्य वक्त्रांबुजं। दीर्घं निःश्वसितं चिरं च रुदितं क्षिप्ताश्च
पुष्पस्रजः॥ इति साष्टाविंशतिशतमुत्तममध्यमाधमस्वरूपतः। चतुरधिकाशीतियुतं शतत्रयं नायिकाभेदानां स्यात्। इह च
परस्त्रियोः कन्यकान्योढे संकेतात्पूर्वं विरहोत्कंठिते पश्चाद्विदूषकादिना सहाभिसरंत्यावभिसारिके। कुतोपि संकेतमप्राप्ते ना-
यके विप्रलब्धे इति त्र्यवस्थैवानयोः। अस्वाधीनप्रिययोरवस्थांतरायोगादिति कश्चित्। क्वचिदन्योन्यसांकर्यमासां लक्ष्येषु

दृश्यते॥यथा॥नखलुवयममुष्यदानयोग्याःपिबतिचपातिचयासकौरहस्त्वां।विटविटपममुंददस्वतस्यैभवतुयतःसदृ
शोश्चिराययोगः।तवकितवकिमाहितैर्वृथानःक्षितिरुहपल्लवपुष्पकर्णपूरैः।ननुजनविदितैर्भवद्व्यलीकैश्चिरपरिपूरित
मेवकर्णयुग्मं।इतिगदितवतीरुषाजघानस्फुरितमनोरमपक्ष्मकेसरेण।श्रवणनियमितेनकांतमन्यासममसितांबुरु
हेणचक्षुषाच।इयंवक्रोक्त्यापरुषवचनेनकर्णोत्पलताडनेनधीरमध्यतांधीरमध्यतांधीरप्रगल्भतात्रिःसंकीर्यते।अन्यत्राप्ये
वमूह्यं।इतराअप्यसंख्यास्तानोक्ताविस्तरशंकयातातानायिकाः॥अथासामलंकाराः॥यौवनेसत्वजास्तासामष्टाविंशतिसं
ख्यकाः।अलंकारास्तत्रभावहावहेलास्त्रयोंगजाः।शोभाकांतिश्चदीप्तिश्चमाधुर्यंचप्रगल्भता।औदार्यंधैर्यमित्येतेसप्तैव
स्युरयत्नजाः।लीलाविलासोविच्छित्तिर्बिब्बोकःकिलकिंचितं।मोट्टायितंकुट्टमितंविभ्रमोललितंमदः॥विहृतंतपनंमौग्ध्यं
विक्षेपश्चकुतूहलं।हसितंचकितंकेलिरित्यष्टादशसंख्यकाः।स्वभावजाःस्युर्भावाद्याःदशपुंसांभवंत्यपि।पूर्वेभावादयो
धैर्यांतादशनायकानामपिसंभवंति।किंतुसर्वेप्यमीनायिकाश्रयाएवविच्छित्तिविशेषंपुष्णंति।निर्विकारात्मकेचित्तेभावःप्र
थमविक्रिया।जन्मनःप्रभृतिनिर्विकारेमनसिउद्बुद्धमात्रोविकारोभावः।यथासएवसुरभिःकालःसएवमलयानिलः।सैवेय
मबलाकिंतुमनोन्यदिवलक्ष्यते॥अथहावः॥भ्रूनेत्रादिविकारैस्तुसंभोगेच्छाप्रकाशकः।भावएवाल्पसंलक्ष्यविकारोहावउच्य १७
ते॥यथा॥विवृण्वतीशैलसुतापिभावमंगैःस्फुटद्बालकदंबकल्पैः।साचीकृताचारुतरेणतस्थौमुखेनपर्यस्तविलोचनेन॥

अथ हेला ॥ हेलात्यंतसमालक्ष्यविकारः स्यात्स एव तु तथा तहसेज्झतिपअत्ता सव्वंगविब्भमासअला संसइअमुद्धभावा हो
इ चिरं जह सहीणंपि ॥ अथ शोभा ॥ रूपयौवनलालित्यभोगाद्यैरंगभूषणं शोभा प्रोक्ता ॥ तत्रैव यौवनशोभा यथा असंभृतं
मंडनमंगयष्टेरनासवाख्यं करणं मदस्य कामस्य पुष्पव्यतिरिक्तमस्त्रं बाल्यात्परं साथ वयः प्रपेदे एवमन्यत्रापि ॥ अथ कांतिः
सैव कांतिर्मन्मथाप्यायितद्युतिः मन्मथोन्मेषेणातिविस्तीर्णशोभैव कांतिरुच्यते यथा नेत्रे खंजनगंजने त्यादि ॥ अथ दीप्तिः ॥ कां
तिरेवातिविस्तीर्णा दीप्तिरित्यभिधीयते यथा मम चंद्रकलानाटिकायां चंद्रकलावर्णनं ॥ तारुण्यस्य विलासः समधिकतारुण्य
संपदोहासः धरणितलस्याभरणं युवजनमनसो वशीकरणं ॥ अथ माधुर्यं ॥ सर्वावस्थाविशेषेषु माधुर्यं रमणीयता ॥ यथा ॥ स
रसिजमनुविद्धं शैवलेनातिरम्यं मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति इयमधिकमनोज्ञा वल्कलेनापि तन्वी किमिव हि म
धुराणां मंडनं नाकृतीनां ॥ अथ प्रगल्भता ॥ निःसाध्वसत्वं प्रागल्भ्यं समाश्लिष्टाः समाश्लेषैश्चुंबिताश्चुंबनैरपि दष्टाश्च दशनैः कांतं
दासीकुर्वंति योषितः ॥ अथ औदार्यं विनयः सदा ॥ यथा ॥ न ब्रूते परुषां गिरं वितनुते न भ्रूयुगं भंगुरं नोत्तंसं क्षिपति क्षितौ श्रवणा
तः सा मे स्फुटेप्यागसि कांता गर्भगृहे गवाक्षविवरव्यापारिताक्ष्या बहिः सख्या वक्त्रमभिप्रयच्छति परं पर्यश्रुणी लोचने ॥ अथ धै
र्यं ॥ मुक्तात्मश्लाघना धैर्यं मनोवृत्तिरचंचला ॥ यथा ॥ ज्वलतु गगने रात्रौ रात्रावखंडकलः शशी दहतु मदनः किं वा मृत्योः परेण
विधास्यति मम तु दयितः श्लाघ्यस्तातो जनन्यमलान्वया कुलममलिनं नत्वेवायं जनो न च जीवितं ॥ अथ लीला ॥ अंगैर्वेषैरलंका

रैःप्रेमन्निर्वचनैरपि । प्रीतिप्रयोजितैर्लीलां प्रियस्यानुकृतिं विदुः ॥ यथा ॥ मृणालव्यालवलया वेणीबंधकपर्द्दिनी हरा
नुकारिणी पातु लीलया पार्वती जगत् ॥ अथ विलासः ॥ यानस्थानासनादीनां मुखनेत्राणिकर्मणां । विशेषस्तु विलासः
स्यादिष्टसंदर्शनादिना ॥ यथा ॥ अत्रांतरे किमपि वाग्विभवातिवृत्त । वैचित्र्यमुल्लसितविभ्रममायताक्ष्याः । तद्भूरिसात्विकवि
कारमपास्तधैर्यमाचार्यकं विजयिमान्मथमाविरासीत् ॥ अथ विच्छित्तिः ॥ स्तोकाप्याकल्परचना विच्छित्तिः कांतिपोषकृत् ।
यथा । स्वच्छांभस्नपनविविक्तमंगमोष्ठस्तांबूलद्युतिविशदो विलासिनीनां । वासश्च प्रतनु विविक्तमस्त्वितीयानाकल्पो यदि
कुसुमेषुणा न शून्यः ॥ अथ विब्बोकः ॥ विब्बोकस्त्वतिगर्वेण । वस्तुनीष्टेप्यनादरः ॥ यथा ॥ यासां सत्यपि सद्गुणानुसरणे दोषा
नुवृत्तिः परा । याः प्राणान्वरमर्प्पयंति न पुनः संपूर्णदृष्टिं प्रिये । अत्यंताभिमतेपि वस्तुनि विधिर्यासां निषेधात्मक । स्तास्त्रैलोक्य
विलक्षणप्रकृतयो वामाः प्रसीदंतु ते ॥ अथ किलकिंचितं ॥ स्मितशुष्करुदितहसितत्रासक्रोधश्रमादीनां । साकर्य्यं किल
किंचित । मभीष्टतमसंगमादिजाद्धर्षात् । यथा पाणिरोधमविरोधितवांछं । भर्त्सनाश्च मधुरस्मितगर्भाः । कामिनः स्म कुरुते
करभोरू । र्हारि शुष्करुदितं च सुखेपि ॥ अथ मोट्टायितं ॥ तद्भावभाविते चित्ते । वल्लभस्य कथादिषु । मोट्टायितमिति प्राहुः
कर्णकंडूयनादिकं ॥ यथा ॥ सुभग त्वत्कथारंभे । कर्णकंडूतिलालसा । उज्जृंभवदनांभोजा भिनत्यंगानि सांगना ॥ अथ कु
ट्टमितं ॥ केशस्तनाधरादीनां । ग्रहे हर्षेपि संभ्रमात् । प्राहुः कुट्टमितं नेति । शिरःकरविधूननं । यथा पल्लवोयमिति साम्यसपक्षं

दष्टवत्यधरबिंबमभीष्टे पर्यकूजि सरुजेव तरुण्या स्फारलोलवलयेन करेण ॥ अथ विभ्रम ॥ त्वरया हर्षरागादेर्दयिता
गमनादिषु अस्थाने भूषणादीनां विन्यासो विभ्रमो मतः ॥ यथा ॥ श्रुत्वायांतं बहिः कांतमसमाप्तविभूषया भालेंजनं दृशोर्ला
क्षा कपोले तिलकः स्मृत ॥ अथ ललितं ॥ सुकुमारतयांगानां विन्यासो ललितं भवेत् ॥ यथा ॥ गुरुतरकलनूपुरानुनादं सुल
लितनर्तितवामपादपद्मा इतरदनतिलोलमाददाना पदमथ मन्मथमंथरं जगाम ॥ अथ मदः ॥ मदो विकारः सौभाग्ययौव
नाद्यवलेपजः यथा ॥ मा गर्वमुद्वह कपोलतले चकास्ति कांतस्वहस्तलिखिता मम मंजरीति अन्यापि किं न सखि भाजनमी
दृशानां वैरी न चेद्भवति वेपथुरंतरायः ॥ अथ विकृतं ॥ वक्तव्यकालेप्यवचो व्रीडया विकृतं मतं ॥ यथा ॥ दूरागतेन कुशलं
पृष्टा नोवाच सा मया किंचित् पर्यश्रुणी तु नयने तस्याः कथयांबभूवतुः सर्वं ॥ अथ तपनं ॥ प्रियविच्छेदे स्मरावेगोत्थचे
ष्टितं ॥ यथा ॥ श्वासान्मुंचति भूतले विलुठति त्वन्मार्गमासेवते दीनं रोदिति विक्षिपत्यत इतः क्षामां भुजावल्लरीं किंच प्राण
समानकांक्षितवती स्वप्नेपि तं संगमं निद्रां वांछति न प्रयच्छति पुनर्दग्धो विधिस्तामपि ॥ अथ मौग्ध्यं ॥ अज्ञानादिव या पृच्छा प्र
तीतस्यापि वस्तुनः वल्लभस्य पुरः प्रोक्तं मौग्ध्यं तत्तत्ववेदिभिः ॥ यथा ॥ के द्रुमास्ते क्व वा ग्रामे संति केन प्ररोपिताः नाथ मत्कंक
णन्यस्तं येषां मुक्ताफलं फलं ॥ अथ विक्षेपः ॥ भूषणानामर्धरचना वृथा विश्वगवेक्षणं रहस्याख्यानमीषच्च विक्षेपो दयितांतिके
॥ यथा ॥ धम्मिल्लमर्धमुक्तं कलयति तिलकं तथासकलं किंचिद्वदति रहस्यं चकितं विश्वग्विलोकते तन्वी ॥ अथ कुतूहलं ॥

साहित्यदर्पण· १८ 19

रम्यवस्तुसमालोके लोलता स्यात्कुतूहलं ॥ यथा ॥ प्रसाधिकालंबितमग्रपादमाक्षिप्य काचिद्द्रवरागमेव । उत्सृष्टलीला
गतिरागवाक्षादलक्तकांकां पदवीं ततान ॥ अथ हसितं ॥ हसितं तु वृथाहासो यौवनोद्भेदसंभवः ॥ यथा ॥ अकस्मादेव तन्वं
गी जहास यदियं पुनः । नूनं प्रसूनबाणोस्यां स्वाराज्यमधितिष्ठति ॥ अथ चकितं ॥ कुतोपि दयितस्याग्रे चकितं भयसंभ्रमः ॥ य
था ॥ त्रस्यन्ती चलशफरी विघट्टितोरूर्वामोरूरतिशयमाप विभ्रमस्य । क्षुभ्यन्ति प्रसभमहो विनापि हेतो लीलाभिः किमु सति
कारणे रमण्यः ॥ अथ केलि ॥ विहारे सह कांतेन क्रीडितं केलिरुच्यते । व्यपोहितुं लोचनतो मुखानिलैरपारयंतं किल पुष्परं
जः । पयोधरेणोरसि काचिदुन्मनाः प्रियं जघानोन्नतपीवरस्तनी ॥ अथ मुग्धाकन्यकयोरनुरागेंगितानि ॥ दृष्ट्वा दर्शयति व्रीडां सं
मुखं नैव पश्यति । प्रच्छन्नं वा भ्रमंतं वातिक्रांतं पश्यति प्रियं । बहुधा पृच्छ्यमानापि मंदं मंदमधोमुखी । सगद्गदस्वरं किंचित्प्रियं प्रा
येण भाषते । अन्यैः प्रवर्तितां शश्वत्सावधाना च तत्कथां । शृणोत्यन्यत्र दत्ताक्षी प्रिये बालानुरागिणी ॥ अथ सकलानामपि नायि
कानामनुरागेंगितानि ॥ चिराय सविधे स्थानं प्रियस्य बहु मन्यते । विलोचनपथं चास्य न गच्छत्यनलंकृता । कापि कुंतलसं
व्यानसंयमव्यपदेशतः । बाहुमूलं स्तनौ नाभिपंकजं दर्शयेत्स्फुटं । आनंदयति वाग्जालैः प्रियस्य परिचारकान् । विश्वसित्य
स्य मित्रेषु बहु मानं करोति च । सखीमध्ये गुणान्ब्रूते स्वधनं प्रददाति च । सुप्ते स्वपिति दुःखेस्य दुःखं धत्ते सुखे सुखं ॥ स्थिता दृ १९
ष्टिपथे शश्वत्प्रिये पश्यति दूरतः । आभाषते परिजनं संमुखं स्मरविक्रियं । यत्किंचिदपि संवीक्ष्य कुरुते हसितं मुधा । कर्णकंडू

यनं तद्व त्कबरीमोक्षसंयमौ जृंभते स्फोटयत्यंगं बालमाश्लिष्य चुंबति भाले तथास्वयस्याया आरभते तिलकक्रियां अं
गुष्ठाग्रेण लिखति सकटाक्षं निरीक्षते दशति स्वाधरौ चापि ब्रूते प्रियमधोमुखी न मुंचति च तं देशं नायको यत्र तिष्ठति आग
च्छति गृहं तस्य कार्यव्याजेन केनचित् दत्तं किमपि कांतेन धृत्वांगे बहु मन्यते नित्यं हृष्यति तद्योगे वियोगे मलिना कृशा मन्य
ते बहु तच्छीलं तत्प्रियं मन्यते प्रियं प्रार्थयत्यल्पमूल्यानि सुप्ता न परिवर्तते विकारान्सात्वि नस्य संमुखी नाधिगच्छति भाषते। ×का×
सूनृतं स्निग्धमनुरक्तानितं बिनी एतेष्वधिकलज्जानि चेष्टितानि नवस्त्रियाः मध्यव्रीडानि मध्यायाः सुसमानत्रपाणि तु अन्यस्त्रि
याः प्रगल्भाया स्तथा स्युर्वीरयोषितः ॥दिग्मात्रं यथा मम॥ अतिकगतमपि मामियमालोकयती वदंत दृष्टापि सरसनखक्षतल
क्षितमाविःकुरुते भुजामूलं ॥तथा॥ लेखप्रस्थापनैः स्निग्धैर्वीक्षितैर्मृदुभाषितैः दूतीसंप्रेषितैर्नार्या भावाभिव्यक्तिरिष्यते दू
त्यश्च दूत्यः सखी नटी दासी धात्रेयी प्रतिवेशिका बाला प्रव्रजिता कारुः शिल्पिन्याद्याः स्वयं तथा कारुः रजकी प्रभृतिः शिल्पि
नी चित्रकारादिस्त्री आदिशब्दात्तांबूलिकगांधिकप्रभृतयः तत्र सखी ॥यथा॥ श्वासान्मुंचतीत्यादि स्वयं दूती यथा मम पथिअ अपि
आसित्र विलक्खी असिजासिता किमसत्तो एमणंपि वारउद्द अत्थिघरेथणरसंपिअत्ताणं एताश्च नायिकाविषये नायिकाम
पि इत्सोत्तवंति ॥दूतीगुणानाह॥ कलाकौशलमुत्साहो भक्तिश्चित्तज्ञतास्मृतिः माधुर्यं नर्मविज्ञानं वाग्मिता चेति तद्गुणाः एता
अपि यथौचित्या दुत्तमाधममध्यमाः एता दूत्यः ॥अथ प्रतिनायकः॥ धीरोद्धतः पापकारी व्यसनी प्रतिनायकः यथा रामस्य राव

साहित्यदर्पण.

२०

णः॥ अथोद्दीपनविभावाः॥ उद्दीपनविभावास्ते रसमुद्दीपयंति ये। ते च आलंबनस्य चेष्टाद्याः। देशकालादयस्तथा। चेष्टादी
त्यादिशब्दाद्रूपभूषणादयः। कालादीत्यादिशब्दाद्रूपभूषणादयः। कालादीत्यादिशब्दाद्रूपभूषणादयः। कालादीत्यादिशब्दाच्चंद्र
चंदनकोकिलालापभ्रमरझंकारादयः। तत्र चेष्टाद्यो यथा। मम। करमुदयमहीधरस्तनाग्रे गलिततमःपटलांशुके निवेश्य। विक
सितकुमुदेक्षणं विचुंबत्ययममरेशदिशो मुखं सुधांशुः। योयस्य रसस्योद्दीपनविभावः स तत्स्वरूपवर्णने वक्ष्यते॥ अथानुभावाः॥ ×निरूप×४
उद्बुद्धं कारणैः स्वैः स्वैर्बहिर्भावं प्रकाशयन्। लोके यः कार्यरूपः सोऽनुभावः काव्यनाट्ययोः। यः खलु लोके सीतादिरामचंद्रा
दिभिः स्वैरालंबनोद्दीपनकारणैः रामादेरुद्बुद्धं रत्यादिकं बहिः प्रकाशयन् कार्यमित्युच्यते स काव्यनाट्ययोः पुनरनुभावः॥
[illegible]॥ उक्ताः स्त्रीणामलंकारा अंगजाश्च स्वभावजाः। तद्रूपाः सात्त्विका भावास्तथा चेष्टाः परा अपि। तद्रूपा अनुभाव
रूपाः। अत्र च योयस्य रसस्यानुभावः स तत्स्वरूपवर्णने वक्ष्येत॥ अथ सात्त्विकाः॥ विकाराः सत्त्वसंभूताः सात्त्विकाः परिकीर्तिताः।
सत्त्वं नाम स्वात्मविश्रामप्रकाशकारी कश्चनांतरो धर्मः। सत्त्वमात्रोद्भवत्वात्ते भिन्ना अप्यनुभावतः॥ गोबलीवर्दन्यायेनेति शेषः॥ [illegible]
[illegible]॥ स्तंभः स्वेदोऽथ रोमांचः स्वरभंगोऽथ वेपथुः। वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विकाः स्मृताः॥ तत्र॥ स्तंभश्चेष्टाप्रतीघातो भयह
र्षामयादिभिः। वपुर्जलोद्गमः स्वेदो रतिघर्मश्रमादिभिः। हर्षाद्भुतभयादिभ्यो रोमांचो रोमविक्रिया। मदसंमदहर्षादेर्वैस्वर्यं ग
द्गदं विदुः। रागरोषश्रमादिभ्यः कंपो गात्रस्य वेपथुः। विषादमदरोषादेर्वर्णान्यत्वं विवर्णता। अश्रु नेत्रोद्भवं वारि क्रोधदुःखप्रह २०

र्षजं । प्रलयः सुखदुःखाभ्यां चेष्टाज्ञाननिराकृतिः ॥ यथा मम ॥ तनुस्पर्शादस्या दरमुकुलिते हन्त नयने उदञ्चद्रोमाञ्चं व्रजति ज
डतामङ्गमखिलं । कपोलौ घर्मार्द्रौ ध्रुवमुपरताशेषविषयं मनः सान्द्रानन्दं स्पृशति झटिति ब्रह्म परमं । एवमन्यत् ॥ अथ व्यभिचा
रिणः ॥ विशेषादाभिमुख्येन चरन्तो व्यभिचारिणः । स्थायिन्युन्मग्ननिर्मग्नास्त्रयस्त्रिंशच्च ते मताः । स्थिरतया वर्तमाने हि रत्यादौ नि
र्वेदादयः । प्रादुर्भावतिरोभावाभ्यामाभिमुख्येन चरणाद्व्यभिचारिण उच्यन्ते ॥ के ते इत्याह ॥ निर्वेदावेगदैन्यश्रममदजडता औग्र्य
मोहौ विबोधः । स्वप्नापस्मारगर्वा मरणमलसतामर्षनिद्रावहित्थाः ॥ औत्सुक्योन्मादशङ्कास्मृतिमतिसहिता व्याधिसंत्रासल
ज्जाहर्षासूयाविषादाः सधृतिचपलता ग्लानिचिन्तावितर्काः ॥ तत्र निर्वेदः ॥ तत्त्वज्ञानापदीर्ष्यादेर्निर्वेदः स्वावमाननं । दैन्यचिं
ताश्रुनिःश्वासवैवर्ण्योच्छ्वसितादिकृत् । तत्र तत्त्वज्ञानान्निर्वेदो यथा । मृत्कुम्भवालुकारन्ध्रपिधानरचनार्थिना । दक्षिणावर्तशङ्खो
ऽयं हन्त चूर्णीकृतो मया । आवेगः संभ्रमस्तत्र हर्षजे पिण्डिताङ्गता । उत्पातजे स्रस्तताङ्गे चेद्धूमाद्याकुलिताङ्गजे । राजविद्रवजादेस्तु शस्त्र
नागादियोजनं । गजादेः स्तम्भकम्पादिः पांस्वाद्याकुलतानिलात् । इष्टाद्धर्षाः शुचो निष्टाज्ज्ञेयाश्चान्ये यथायथं ॥ तत्र शत्रुजो यथा ॥
अर्घ्यमर्घ्यमिति वादिनं नृपं सोऽनवेक्ष्य भरताग्रजो यतः । क्षत्रकोपदहनार्चिषं ततः संदधे दृशमुदग्रतारकां । एवमन्यदप्यूह्यं
॥ अथ दैन्यं ॥ दौर्गत्यादेरनौजस्यं दैन्यं मलिनतादिकृत् ॥ यथा ॥ वृद्धोऽन्धः पतिरेष मञ्चकगतः स्थूणावशेषं गृहं कालोऽभ्यर्णजला
गमः कुशलिनी वत्सस्य वार्तापि नो । यत्नात्संचिततैलबिन्दुघटिका भग्नेति पर्याकुला । दृष्ट्वा गर्भभरालसां निजवधूं श्वश्रूश्चिरं रोदि

ते ॥ अथ श्रमः ॥ खेदो रत्यध्वगत्यादेः श्वासनिद्रादिकृच्छ्रमः ॥ यथा ॥ सद्यः पुरीपरिसरेऽपि शिरीषमृद्वी सीता जवात्त्रिचतुराणि
पदानि गत्वा । गन्तव्यमस्ति कियदित्यसकृद्ब्रुवाणा रामाश्रुणः कृतवती प्रथमावतारं ॥ अथ मदः ॥ संमोहानंदसंभेदो मदो म
द्योपयोगजः । अमुना चोत्तमः शेते मध्यो हसति गायति । अधमप्रकृतिश्चापि परुषं वक्ति रोदिति ॥ यथा ॥ प्रातरेव मदनेन ग
४ सुइ× तानां वाक्यरचना रमणीया । गूढसूचितरहस्यसहासः सुभ्रुवां प्रववृते परिहासः ॥ अथ जडता ॥ अप्रतिपत्तिर्जडता स्यादिष्टानि
ष्टदर्शनश्रुतिभिः । अनिमिषनयननिरीक्षणतूष्णींभावादयस्तत्र । यथा मम कुवलयाश्वचरितप्राकृतकाव्ये । णवरिअ तं
जुअजुअलं । अण्णोण्णणिहिदसजलमंथरदिट्ठं । आलेक्खअप्पिअं विअ खणमेत्तं तत्थ संठिअं मुअसण्णं ॥ अथोग्रता ॥ शौर्या
पराधादिभवं भवेच्चंडत्वमुग्रता । तत्र स्वेदशिरःकंपतर्जनाताडनादयः ॥ यथा ॥ प्रणयिसखीसलीलपरिहासरसाधिगतै
र्ललितशिरीषपुष्पहननैरपि ताम्यति यत् । वपुषि वधाय तत्र तव शस्त्रमुपक्षिपतः पततु शिरस्यकांडयमदंड इवैष भुजः ॥ अथ
मोहः ॥ मोहो विचित्तता भीतिदुःखावेगानुचिंतनैः । घूर्णनागात्रपतनभ्रमणादर्शनादिकृत् ॥ यथा ॥ तीव्राभिषंगप्रभवेन वृत्तिं
मोहेन संस्तंभयतेन्द्रियाणां । अज्ञातभर्तृव्यसना मुहूर्तं कृतोपकारेव रतिर्बभूव ॥ अथ विबोधः ॥ निद्रापगमहेतुभ्यो विबोधश्चे
तनागमः । जृंभांगभंगनयनमीलनांगावलोककृत् ॥ यथा ॥ चिररतिपरिखेदप्राप्तनिद्रासुखानां चरममपि शयित्वा पूर्वमेव २१
प्रबुद्धाः । अपरिचलितगात्राः कुर्वते न प्रियाणामशिथिलभुजचक्राश्लेषभेदं तरुण्यः ॥ अथ स्वप्नः ॥ स्वप्नो निद्रामुपेतस्य वि

षयानुत्तवस्तुयः। कोपावेशनयस्मानिसुखदुःखादिकारकः॥ यथा॥ मामाकाशप्रणिहितभुजं निर्दयाश्लेषहेतो र्लब्धाया
स्ते कथमपि मया स्वप्नसंदर्शनेषु। पश्यंतीनां न खलु बहुशो न स्थलीदेवतानां। मुक्तास्थूलास्तरुकिशलयेष्वश्रुलेशाः पतंति॥ अ
थापस्मारः॥ मनःक्षेपस्त्वपस्मारो ग्रहाद्यावेशनादिजः। भूपातकंपप्रस्वेदफेनलालादिकारकः॥ यथा॥ आश्लिष्टभूमिं रसितार
मुच्चै र्लोलद्भुजाकारबृहत्तरंगं। फेनायमानं पतिमापगानां असावपस्मारिणमाशशंके॥ अथ गर्वः॥ गर्वो मदः प्रभावश्री वि
द्यासत्कुलतादिजः। अवज्ञासविलासांगदर्शनाविनयादिकृत॥ यथा॥ धृतायुधो यावदहं तावदन्यैः किमायुधैः। यद्वा न सिद्ध
मस्त्रेण मम तत्केन सेत्स्यति॥ अथ मरणं॥ शराद्यै र्मरणं जीवत्यागोंगपतनादिकृत॥ यथा॥ राममन्मथशरेण ताडिता दुःसहे
न हृदये निशाचरी। गंधवद्रुधिरचंदनोक्षिता जीवितेशवसतिं जगाम सा॥ अथालस्यं॥ आलस्यं श्रमगर्भाद्यै र्जाड्यं जृंभासिता
दिकृत॥ यथा॥ न तथा भूषयत्यंगं न तथा भाषते सखी। जृंभते मुहुरासीना बाला गर्भभरालसा॥ अथामर्षः॥ निंदाक्षेपाप
मानादे रमर्षोभिनिवेशिता। नेत्ररागशिरःकंपभ्रूभंगोत्तर्जनादिकृत॥ यथा॥ प्रायश्चित्तं चरिष्यामि पूज्यानां वो व्यतिक्रमात्।
न त्वेवं दूषयिष्यामि शस्त्रग्रहमहाव्रतं॥ अथ निद्रा॥ चेतःसंमीलनं निद्राक्लमश्रममदादिजं। जृंभाक्षिमीलनोच्छ्वासगात्रभं
गादिकारणं॥ यथा॥ सार्थकानर्थकपदं ब्रुवती मंथराक्षरं। निद्रार्धमीलिताक्षी सा लिखितेवास्ति मे हृदि॥ अथावहित्था॥
भयगौरवहर्षादे र्लज्जाद्याकारगुप्तिरवहित्था। व्यापारांतरशक्त्यन्यथाभाषणालोकनादिकरी॥ यथा॥ प्रायश्चित्तं चरिष्या

एवंवादिनि देवर्षौ पार्श्वे पितुरधोमुखी। लीलाकमलपत्राणि गणयामास पार्वती॥ अथौत्सुक्यं॥ इष्टानवाप्तेरौत्सुक्यं
कालक्षेपासहिष्णुता। चित्ततापत्वरास्वेद दीर्घनिःश्वसितादिकृत्॥ यथा॥ यः कौमारहर इत्यादि। अत्र यत्काव्यप्रकाश
कारेण रसस्य प्राधान्यमुक्तं तद्रसनधर्मत्वाद्ध्वनिवादिनोवस्यापि रसशब्दवाच्यत्वेन गतार्थं मंतव्यं॥ अथोन्मादः॥ चित्त
संमोह उन्मादः कामशोकभयादिभिः। अस्थानहासरुदितगीतप्रलपनादिकृत्॥ यथा॥ मम भ्रातर्द्विरेफ त्ववता भ्रमता
समंता। त्प्राणाधिका प्रियतमा मम वीक्षिता किं। झंकारमनुभूय सानंदं ब्रूषे किमोमिति सखे कथयाशु तन्मे। किंकिं व्य
वस्यति कृतोस्थि च कीदृशीयं॥ अथशंका॥ परक्रौर्यात्मदोषाद्यैः शंकानर्थस्य चिंतनं। वैवर्ण्यकंपवैस्वर्य पार्श्वालोकास्य
शोषकृत्॥ यथा मम॥ प्राणेशेन प्रहितनखरे ष्वंगकेषु क्षपांते। जातातंका रचयति चिरं चंदनालेपनानि। धत्ते लाक्षामस
कृदधरे दत्तदंतावघाते। क्षामांगीयं चकितमभितश्चक्षुषी विक्षिपंती॥ अथस्मृतिः॥ सदृशज्ञानचिंताद्यैर्भ्रूसमुन्नासनादि
कृत्। स्मृतिः पूर्वानुभूतार्थविषयं ज्ञानमुच्यते॥ यथा मम॥ मयि सकपटं किंचित्क्वापि प्रणीतविलोचने। किमपि नयनेप्र
तेति तिर्यग्विजृंभिततारकं। स्मितमुपगतामाली दृष्ट्वा सलज्जमवांचितं कुवलयदृशः स्मेरं स्मेरं स्मरामि तदाननं॥ अथ
मतिः॥ नीतिमार्गानुसृत्यादेरर्थनिर्धारणं मतिः। स्मेरता धृतिसंतोषौ बहुमानश्च तद्भवाः॥ यथा॥ असंशयं क्षत्रपरिग्रहक्ष २२
मा यदार्यमस्यामभिलाषि मे मनः। सतां हि संदेहपदेषु वस्तुषु प्रमाणमंतःकरणप्रवृत्तयः॥ अथव्याधि॥ व्याधिर्ज्वरादिवा

ताद्यैर्नर्मीछोत्कंपनादिकृत् तत्र दादमयत्वे नर्मीछादयः शैत्यमयत्वे उत्कंपनादयः स्पष्टमुदाहरणं ॥ अथ त्रासः ॥ नि
र्घातविद्युदुल्काद्यैस्त्रासः कंपादिकारकः यथा परिस्फुरन्मीनविघट्टितोरवः सुरांगनास्त्राससविलोलदृष्टयः उपाययुः
कंपितपाणिपल्लवाः सखीजनस्यापि विलोकनीयतां ॥ अथ व्रीडा ॥ धार्ष्ट्याभावो व्रीडा वदनानमनादिकृद्दुराचारात् ॥ अथ
मयि सकपटमित्यादि ॥ अथ हर्षः ॥ हर्षस्त्विष्टावाप्तेर्मनः प्रसादोश्रुगद्गदादिकरः ॥ यथा ॥ समीक्ष्य पुत्रस्य पिता चिरात्सुखं
निधानकुंभस्य युवेव दुर्गतः मुदा शरीरे प्रबभूव नात्मनः पयोधिरिंदूदयमूर्छितो यथा ॥ अथासूया ॥ असूयान्यगुणर्द्धी
नां औद्धत्यादसहिष्णुता दोषान्वेषविस्तेदावज्ञाक्रोधेंगितादिकृत् ॥ यथा ॥ अथ तत्र पांडुतनयेन सदसि विहितं मधुद्वि
षः मानमसहत न चेदिपतिः परवृद्धिमत्सरि मनो हि मानिनां ॥ अथ विषादः ॥ उपायाभावजन्मा तु विषादः सत्वसंक्षयः
निश्वासोच्छ्वाससंतापसहायान्वेषणादिकृत् ॥ यथा मम ॥ एसा कुडिलघणेण चिउरकप्पेण तुह णिबद्धा वेणी मह सहि
दावइ मइ आअसजिट्ठिव्व कालउरइव्व हिअअं ॥ अथ धृतिः ॥ ज्ञानाभीष्टागमाद्यैस्तु संपूर्णस्पृहता धृतिः सौहित्यवच
नोल्लाससहासप्रतिभादिकृत् ॥ यथा ॥ कृत्वा दीननिपीडनं निजजने बद्धा वचो विग्रहं नैवालोक्य गरीयसीरपि चिरादा
मुष्मिकीर्यातनाः द्रव्यौघाः परिसंचिताः खलु मया यस्याः कृते सांप्रतं नीवारांजलिनापि केवलमहो सेयं कृतार्था तनुः ॥ अ
थ चपलता ॥ मात्सर्यद्वेषरागादेश्चापल्यं त्वनवस्थितिः तत्र भर्त्सनपारुष्यस्वच्छंदाचरणादयः ॥ यथा ॥ अन्यासु तावदुप

मर्द्दसदासुरतंग लोलं विनोदयमनः सुमनोलतासु मुग्धामजातरजसं कलिकामकाले बालां कदर्थयसि किं नव
मल्लिकायाः॥ अथ ग्लानिः॥ रत्यायासमनस्तापक्षुत्पिपासादिसंभवा ग्लानिर्निःप्राणताकंपकार्श्यानुत्साहतादिकृत्॥ य
था॥ किसलयमिव मुग्धं बंधनाद्विप्रलूनं हृदयकुसुमशोषी दारुणो दीर्घशोकः ग्लपयति परिपांडुक्षाममस्याः शरीरं
शरदिज इव घर्मः केतकीगर्भपत्रं॥ अथ चिंता॥ ध्यानं चिंताहितानाप्तेः शून्यताश्वासतापकृत्॥ यथा मम॥ कमलेण विद्
मिएण संजोअंती विरोहिणं ससिबिंबं करअलपल्लत्थमुही किं चिंतसि सुमुहि अंतराहिदहिअआ॥ अथ वितर्कः॥
तर्को विचारः संदेहाद्भ्रूशिरोंगुलिनर्तकः॥ यथा॥ किं रुद्धः प्रिययेत्यादि एते च त्रयस्त्रिंशद्भेदा इति यदुक्तं तदुपलक्षण
मित्याह रत्यादयोप्यनियते रसे स्युर्व्यभिचारिणः॥ तथाहि॥ शृंगारेनुछिद्यमानतयावस्थानाद्रतिरेव स्थायिशब्दवाच्या
हासः पुनरुत्पद्यमानो व्यभिचार्येव व्यभिचारिलक्षणयोगात्॥ तदुक्तं॥ रसावस्थः परं भावः स्थायितां प्रतिपद्यत इति त
त्कस्य स्थायिनः कुत्र रसे संचारितेत्याह शृंगारवीरयोर्हासो वीरे क्रोधस्तथा मतः शांते जुगुप्सा कथिता व्यभिचारितया
पुनः इत्याद्यन्यत्समुन्नेयं स्वयं भावितबुद्धिभिः॥ अथ स्थायिभावः॥ अविरुद्धा विरुद्धा वा यं तिरोधातुमक्षमाः आस्वा
दांकुरकंदोसौ भावः स्थायीति संमतः॥ तदुक्तं॥ स्रक्सूत्रवृत्त्या भावानामन्येषामनुगामकः न तिरोधीयते स्थायी तैर
सौ पुष्यते परमिति तद्भेदानाह॥ रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा जुगुप्सा विस्मयश्चेत्थमष्टौ प्रोक्ताः शमो

प्रिये रतिर्मनोऽनुकूलेऽर्थे मनसः प्रवणायितं वागादिवैकृतैश्चेतो विकासो हास इष्यते इष्टनाशादिभिश्चेतो वैक्लव्यं
शोकशब्दभाक् कार्यारंभेषु संरंभः स्थेयानुत्साह इष्यते प्रतिकूलेषु तैक्ष्ण्यस्यावबोधः क्रोध इष्यते रौद्रशक्त्या तु जनितं
चित्तवैक्लव्यजं भयं दोषेक्षणादिभिर्गर्हा जुगुप्सा विषयोद्भवा विविधेषु पदार्थेषु लोकसीमातिवर्तिषु विस्फारश्चेतसो
यस्तु स विस्मय उदाहृतः शमो निरीहावस्थायां स्वात्मविश्रामजं सुखं यथा मालतीमाधवे रतिः लटकमेलके हासः रा
मायणे शोकः महाभारते शमः एवमन्येऽपि एते ह्येतेषु उत्तरोत्तरा उत्पद्यमाने स्थैर्यैर्विरुद्धैरविरुद्धैश्च भावैरनुच्छिन्नाः प्र
स्तुतपरिपुष्टा एव सहृदयानुभवसिद्धाः किंच नानाभिनयसंबद्धान् भावयंति रसान्यतः तस्माद्भावा अमी प्रोक्ताः स्थायि
संचारिसात्त्विकाः यदुक्तं सुखदुःखादिभिर्भावैर्भावस्तद्भावभावनं ॥ अथ रसभेदानाह ॥ शृंगारहास्यकरुणरौद्रवीरभया
नकाः बीभत्साद्भुत इत्यष्टौ रसाः शांतस्तथा मतः तत्र शृंगं हि मन्मथोद्भेदस्तदागमनहेतुजः उत्तमप्रकृतिप्रायो रसः शृंगार
इष्यते परोढां वर्जयित्वा तु वेश्यां चाननुरागिणीं आलंबनं नायिकाः स्युर्दक्षिणाद्याश्च नायकाः चंद्रचंदनरोलंबरुता
द्युद्दीपनं मतं भ्रूविक्षेपकटाक्षादिरनुभावः प्रकीर्तितः त्यक्त्वौग्र्यमरणालस्यजुगुप्सा व्यभिचारिणः स्थायिभावो रतिः श्या
मवर्णोऽयं विष्णुदैवतः ॥ यथा ॥ शून्यं वासगृहमित्यादि अत्रोक्तस्वरूपः पतिरुक्तरूपा च बाला आलंबनविभावौ शून्यं वास
गृहमुद्दीपनविभावः चुंबनमनुभावो लज्जा हासो व्यभिचारिणौ एतैरभिव्यक्तः सहृदयहृदये रतिभावः शृंगाररसरूपतां न

जति ॥ तद्भेदानाह ॥ विप्रलंभोथ संभोग इत्येष द्विविधो मतः । तत्र तु रतिः प्रकृष्टा नाभीष्टमुपैति विप्रलंभोसौ । अभीष्टं नायकं
नायिकां वा स च पूर्वराग १ मान २ प्रवास ३ करुणात्मकश्चतुर्धा स्यात् । तत्र श्रवणाद्दर्शनाद्वापि मिथः संरूढरागयोः । द
शाविशेषोऽप्राप्तौ यः पूर्वरागः स उच्यते । श्रवणं तु भवेत्तत्र । दूतबंदिसखीमुखात् । इंद्रजाले च चित्रे च । साक्षात्स्वप्ने च दर्श
नं । अभिलाषश्चिंतास्मृतिगुणकथनोद्वेगसंप्रलापाश्च । उन्मादश्च व्याधिर्जडता मृतिरित्यत्र कामदशाः । अभिलाषः स्पृहा चिं
ता । प्राप्त्युपायादिचिंतनं । उन्मादश्चापरिच्छेदश्चेतनाचेतनेष्वपि । अलक्ष्यवाक्प्रलापः स्याच्चेतसो भ्रमणाद्भृशं । व्याधिस्तु दीर्घ
निःश्वासपांडुताकृशतादयः । जडता हीनचेष्टत्वमंगानां मनसस्तथा । शेषं स्पष्टं ॥ क्रमेणोदाहरणं ॥ प्रेमार्द्राः प्रणयस्पृशः
परिचयादुद्गाढरागोदयाः । स्तास्ता मुग्धदृशो निसर्गमधुराश्चेष्टा भवेयुर्मयि । यास्वंतःकरणस्य बाह्यकरणव्यापाररोधी ।
क्षणाद् । आशंसापरिकल्पितास्वपि भवत्यानंदसांद्रो लयः । अत्र मालतीसाक्षाद्दर्शनप्ररूढरागस्य माधवस्याभिलाषः । क
णमीक्षे कुरंगाक्षीं । साक्षाल्लक्ष्मीं मनोभुवः । इति चिंताकुलः कांतो । निद्रां नैति निशीथिनीं ॥ अत्र कस्याश्चिन्नायिकाया इंद्र
जालदर्शनेन प्ररूढरागस्य नायकस्य चिंता । इदं मम । मयि सकपटमित्यादौ नायकस्य स्मृतिः ॥ नेत्रे खंजनगंजने इत्यादौ गु
णकथनं । श्वासान्मुंचतीत्यादावुद्वेगः । त्रिभागशेषासु निशासु च क्षणं ॥ निमील्य नेत्रे सहसा व्यबुध्यत । क्व नीलकंठ व्रजसी २४
त्यलक्ष्यवागसत्यकंठार्पितबाहुबंधना ॥ अत्र प्रलापः ॥ भ्रातर्द्विरेफेत्यादावुन्मादः । पांडुक्षामं वदनं सरसं हृदयं । तवा

लसंचयवक्त्रः। आवेदयति नितांतं क्षेत्रियरोगं सखि मंदंतः॥ अथ व्याधिः॥ णिससिअलसअसूणीए। एणीदिअंसव्वविणिच्च
लंअंगं। दीहोणीससहरो। एहोसाहेदिदीअइइसिपरं॥ अथ जडता॥ इदं मम। रसविच्छेदहेतुत्वान्मरणं नैव वर्ण्यते। जातप्रा
यं तु तद्वाच्यं। चेतसाकांक्षितं तथा। वर्ण्यतेपि यदि प्रत्युज्जीवनं स्याददूरतः॥ अत्राद्यं यथा॥ शेफालिकां विदलितामवलोक्य
तन्वी। प्राणान्कथंचिदपि धारयितुं प्रवृत्ता। आकर्ण्य संप्रति रुतं चरणायुधानां। किं वा भविष्यति न वेद्मि तपस्विनी सा॥ द्वि
तीयं यथा॥ रोलंबाः परिपूरयंतु परितो झंकारकोलाहलैर्मंदंमंदमुपैतु चंदनवनीजातो नभस्वानपि। माद्यंतः कलयंतु चू
तशिखरे केलीपिकाः पंचमं। प्राणाः सत्वरमश्मसारकठिना गच्छंतु गच्छंत्वमी। ममैतौ। तृतीयं यथा। कादंबर्यां महाश्वे
ता पुंडरीकवृत्तांते। एष च प्रकारः करुणविप्रलंभविषय इति वक्ष्यामः। केचित्तु नयनप्रीतिः प्रथमं। चित्तासंगस्ततोथ सं
कल्पः। निद्राछेदस्तनुता विषयनिवृत्तिस्त्रपानाशः। उन्मादो मूर्छा मृतिरित्येताः। स्मरदशा दशैव स्युरित्याहुः तत्र च। आदौ
वाच्यः स्त्रिया रागः। पश्चात्पुंसस्तदिंगितैः। इंगितान्युक्तानि। यथा रत्नावल्यां सागरिकावत्सराजयोः। आदौ पुरुषानुरागे संभ
वत्यप्येवमधिकं ह्लादयंगमतां भवति। नीलीकुसुंभमंजिष्ठैः पूर्वरागोपि च त्रिधा। न चातिशोभते यन्ना। पैति प्रेम मनोगतं। त
न्नीलीरागमाख्याति। यथा श्रीरामसीतयोः। कुसुंभरागं तत्प्राहुः। यदपैति च शोभते। मंजिष्ठरागमाहुस्तं। यन्नापैत्यतिशोभ
ते॥ अथ मानः॥ मानः कोपः स तु द्वेधा। प्रणयेर्ष्यासमुद्भवः॥ द्वयोः प्रणयमानः स्यात्। प्रमोदे सुमहत्यपितिशोभते॥ अथ मानः

मानः कोपः स तु द्वेधा प्रणयेर्ष्यासमुद्भवः । द्वयोः प्रणयमानः स्यात्प्रमोदे सुमहत्यपि ॥ प्रेम्णः कुटिलगामित्वात्कोपो यः
कारणं विना । द्वयोरिति नायकस्य नायिकायाश्च प्रणयमानोऽपि वर्णनीयः । यथा एकस्मिन्शयने पराङ्मुखतया वीतो-
त्तरं तामन्यतो रन्योन्यस्य हृदि स्थितेऽप्यनुनये संरक्षतोर्गौरवं । दंपत्योः शनकैरपांगवलनान्मिश्रीभवच्चक्षुषो र्भग्नो मानक-
लिः सहासरभसव्यासक्तकंठग्रहः ॥ पत्युरन्यप्रियासंगे दृष्टेथानुमिते श्रुते । ईर्ष्यामानो भवेत्स्त्रीणां तत्र त्वनुमितिस्त्रिधा ॥
उत्स्वप्नायितभोगांकगोत्रस्खलनसंभवा तत्र दृष्टे ॥ यथा ॥ नवनखपदमंगं गोपयस्यंशुकेन स्थगयसि पुनरोष्ठं पाणि-
ना दंतदष्टं । प्रतिदिशमपरस्त्रीसंगशंसी विसर्पन्नवपरिमलगंधः केन शक्यो वरीतुं । एवमन्यत्र । साम भेदोऽथ दानं च न-
त्युपेक्षे रसांतरं । तद्भंगाय पतिः कुर्यात्षडुपायानिति क्रमात् । तत्र प्रियवचः साम भेदस्तत्सख्युपार्जनं । दानं व्याजेन भूषा-
देः पादयोः पतनं नतिः । सामादौ तु परिक्षीणे स्यादुपेक्षावधारणं । रभसत्रासहर्षादेः कोपभ्रंशो रसांतरं ॥ यथा ॥ नो चाटु-
श्रवणेत्यादि । अत्र हि सामादयः पंच सूचिताः रसांतरं तूह्यं ॥ अथ प्रवासः ॥ प्रवासो भिन्नदेशत्वं कार्याच्छापाच्च संभ्रमात् । त-
त्रांगचेलमालिन्यमेकवेणीधरं शिरः । निश्वासोच्छ्वासरुदितभूमिपातादि जायते । किंच । अंगेष्वसौष्ठवं तापः पांडुता कृश-
ताऽरुचिः । अधृतिः स्यादनालंबस्तन्मयोन्मादमूर्छनाः । मृतिश्चेति क्रमाज्ज्ञेया दश स्मरदशा इह । अंगासौष्ठवमापत्ति स्ताप-
स्तु विरहज्वरः । अरुचिर्वस्तुवैराग्यं सर्वत्रारागिताधृतिः । अनालंबनता चापि शून्यता मनसः स्मृता । तन्मयस्तत्प्रकाशो हि

बाह्याभ्यन्तरतस्तथा॥ शोषस्यार्थ॥ एकदेशतो यथा। मम तातपादानां। चिंतानिस्तिमितं मनः। करतले लीना कपोलस्थ-
ली प्रत्यूषक्षणदेशपांडुवदनं श्वासैकखिन्नोऽधरः। अन्तःशीतलपद्मिनीकिशलयैर्नापैति तापः शमं कोऽस्याः प्रार्थितदु-
र्लभोऽस्ति सदृते दीनां दशामीदृशीं। भावी भवन्भूत इति त्रिधा स्यात्तत्र कार्यजः। कार्यजस्य बुद्धिपूर्वकत्वात्त्रैविध्यं॥ तत्र
भावी यथा॥ मम यामः सुंदरि याहि पांथ दयिते शोकं वृथा मा कृथाः। शोकस्ते गमने कुतो मम ततो बाष्पं कथं मुंचति शी-
घ्रं न व्रजसीति मां गमयितुं कस्मादियं ते त्वरा। भूयानस्य सह त्वया जिगमिषोर्जीवस्य मे संभ्रमः। भवन्यथा। प्रस्थानं वल-
यैः कृतं प्रियसखैरस्रैरजस्रं गतं धृत्या न क्षणमासितं व्यवसितं चित्तेन गंतुं पुरः। यातुं निश्चितचेतसि प्रियतमे सर्वे समं प्र-
स्थिता गंतव्ये सति जीवित प्रियसुहृत्सार्थः किमुत्सृज्यते। भूतो यथा। चिंतानिस्तिमितमित्यादि। शापाद्यथा। तां जानीया इत्या-
दि। संभ्रमो दिव्यमानुषनिर्घातोत्पातादिजः। यथा विक्रमोर्वश्यामुर्वशीपुरूरवसोः। अत्र पूर्वरागोक्तानां अभिलाषादीनां॥
अत्रोक्तानां चाङ्गसौष्ठवादीनामनुसंधानं यत्र संभवेऽपि चिरंतनप्रसिद्ध्या विविच्य प्रतिपादनं॥ अथ करुणः॥ यूनोरेकतरस्मिन्
गतवति लोकांतरं पुनर्लभ्ये। विमनायते यदैकस्तदा भवेत्करुणविप्रलंभाख्यः। यथा कादंबर्यां पुंडरीकमहाश्वेतावृ-
त्तांते। पुनरलभ्ये शरीरांतरेण वा लभ्ये तु करुणाख्यो रसः। किंचात्राकाशसरस्वतीभाषणानंतरमेव शृंगारः संगमप्रत्याशा-
या रतेरुद्भवात्। प्रथमं तु करुण एवेत्यभियुक्ता मन्यन्ते। यच्चात्र संगमप्रत्याशानंतरमेव तो विप्रलंभशृंगारस्य प्रवासा

ख्येरुवेङ्गेदएवेतिकेचिदाङ्कः तदन्येमरणरूपविशेषसंभवाद्भिन्नमपिमन्यते ॥ अथ संभोगः ॥ दर्शनस्पर्शनादीनि
निषेवेतेविलासिनौ यत्रानुरक्तावन्योन्यं संभोगोयमुदाहृतः ॥ आदिशब्दादन्योन्याधरपानचुंबनादयः यथा शून्यंवा
सगृहमित्यादि संख्यातुमशक्यतयाचुंबनपरिरंभणादिबहुभेदात् अयमेकएवधीरैःकथितःसंभोगशृंगारः तत्रस्या
दृतुषट्कंचंद्रादित्यौतथास्तमयः जलकेलिवनविहारप्रभातमधुपानयामिनीप्रवृत्तिः अनुलेपनभूषाद्याः वाच्यंशुचिमे
ध्यमन्यच्च ॥ तथाचभरतः ॥ यत्किंचिल्लोकेशुचिमेध्यमुज्ज्वलंदर्शनीयं तत्सर्वंशृंगारेणोपमीयते उपमीयतेउपयुज्यते किं
च कथितश्चतुर्विधोसावानन्तर्यात्तुपूर्वरागादेः ॥ यदुक्तं ॥ नविनाविप्रलंभेन संभोगःपुष्टिमश्नुते कषायितेहिवस्त्रादौ भू
यान्रागोविवर्द्धतइति तत्रपूर्वरागानंतरंसंभोगोयथा कुमारसंभवे पार्वतीपरमेश्वरयोःप्रवासानंतरं संभोगोयथा
ममतातपादानां क्षेमंतेननुपक्ष्मलाक्षिकिमस्याखेमंमदंगंदढ एतादृक्कृशताकुतस्तुदपुणो पुठंशरीरंकुदो केनाहं
दृश्युलःप्रियेपणइणीदेहस्ससम्मिस्सणा त्वत्तःसुन्दुनकापिमेजइदंखेमंकुदोपुच्छसि एवमन्यत्राप्यूह्यं ॥ अथहास्यः ॥ वि
कृताकारवाग्वेषचेष्टादेःकुहकाद्भवेत् हास्येहास्यस्थायिभावः श्वेतःप्रमथदैवतः ॥ विकृताकारवाक्चेष्टं यदालोक्य
हसेज्जनः तदत्रालंबनंप्राहुः तच्चेष्टोद्दीपनंमता अनुभावोक्षिसंकोचवदनस्मेरतादयः निद्रालस्यावहित्थाद्या अत्र
स्युर्व्यभिचारिणः ज्येष्ठानांस्मितहसिते मध्यानांविहसितावहसिते नीचानामपहसितं तथातिहसितंतदेषषड्भेदः ॥

ईषद्विकाशिनयनं । स्मितं स्यात्स्पंदिताधरं । किंचिल्लक्ष्यद्विजं तत्र । हसितं कथितं बुधैः । मधुरस्वरं विहसितं । सांसशिरःकं
पमवहसितं । अपहसितं साश्राक्षं । विक्षिप्तांगं भवत्यतिहसितं । यथा । गुरोर्गिरः पंचदिनान्यधीत्य वेदांतशास्त्राणि दिनत्र
यं च । अमी समाघ्रात वितर्कवादाः । समागताः कुक्कुटमिश्रपादाः । अस्य लटकमेलकप्रभृतिषु परिपोषो द्रष्टव्यः । यस्य हासः
स चेत्क्वापि । साक्षान्नैव निबध्यते । तथाप्येष विभावादि । साधर्म्यादुपलभ्यते । अभेदेन विभावादेः साधारण्यात्प्रतीयते । सा
माजिकैस्ततो हास्यरसोयमनुभूयते । एवमन्येष्वपि रसेषु बोद्धव्यं ॥ अथ करुणः ॥ इष्टनाशादनिष्टाप्तेः करुणाख्यो रसो
भवेत् । धीरैः कपोतवर्णोयं कथितो यमदैवतः । शोकोत्र स्थायीभावः स्यात् । शोच्यमालंबनं मतं । तदादाहादिकाव
स्था । भवेदुद्दीपनं पुनः । अनुभावो दैवनिंदा । भूपातक्रंदितादयः । वैवर्ण्योच्छ्वासनिश्वास । स्तंभप्रलपनानि च । निर्वेदमो
हापस्मार । व्याधिग्लानिस्मृतिश्रमाः ॥ विषादजडतोन्माद । चिंताद्या व्यभिचारिणः । शोच्यं विनष्टबंधुप्रभृति यथा मम राघ
विलासे । विपिने क्व जटानिबंधनं । तव चेदं क्व मनोहरं वपुः ॥ अनयोर्घटना विधेः । स्फुटं ननु खड्गेन शिरीषकर्तनं । अत्र हि
रामवनवासजनितशोकार्त्तस्य दशरथस्य निंदा । एवं बंधुवियोगविभवनाशादावप्युदाहार्य्यं । परिपोषस्तु महाभा
रते स्त्रीपर्वणि द्रष्टव्यः ॥ अस्य करुणविप्रलंभाद्भेदमाह ॥ शोकस्थायितया भिन्नो । विप्रलंभादयं रसः । विप्रलंभे रति
स्थायी । पुनः संभोगहेतुकः ॥ अथ रौद्रः ॥ रौद्रः क्रोधस्थायीभावो । रक्तो रुद्राधिदैवतः । आलंबनमरिस्तत्र । तच्चेष्टोद्दी

पतनं मतं। मुष्टिप्रहारपातन विकृतच्छेदावदारणैश्चैव संग्रामसंभ्रमाद्यैरस्योद्दीप्तिर्भवेत्प्रौढा। भ्रूविभंगोष्ठनिर्दंश। बाहु
स्फोटनतर्जनाः। आत्मावदानकथन मायुधोत्क्षेपणानि च। अनुभावास्तथाक्षेप क्रूरसंदर्शनादयः। उग्रतावेगरोमां
च स्वेदवेपथवो मदः। मोहामर्षादयश्चात्र भावाः स्युर्व्यभिचारिणः॥ यथा॥ कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं मनुज
पशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः। नरकरिपुणा सार्द्धं तेषां सभीमकिरीटिनामयमहमसृङ्मेदो मांसैः करोमि दिशां बलिं
॥ अस्य च युद्धवीराद्भेदमाह। रक्तास्यनेत्रता चात्र भेदिनी युद्धवीरतः॥ अथ वीरः॥ उत्तमप्रकृतिर्वीर उत्साहस्थायिभावकः।
महेन्द्रदैवतो हेम वर्णोयं समुदाहृतः। आलंबनविभावास्तु विजेतव्यादयो मताः। विजेतव्यादिचेष्टाद्यास्तस्योद्दीपनरूपि
णः। अनुभावास्तु तत्र स्युः सहायान्वेषणादयः। संचारिणस्तु धृतिमति गर्वस्मृतितर्करोमांचाः। स च दानधर्मयुद्धैर्दयया
च समन्वितश्चतुर्धा स्यात्। स च वीरः दानवीरो धर्मवीरो युद्धवीरो दयावीरश्चेति चतुर्विधः॥ तत्र दानवीरो यथा परशुरामः॥
त्यागः सप्तसमुद्रमुद्रितमही निर्व्याजदानावधिरिति। अत्र परशुरामस्य त्यागे उत्साहः स्थायीभावः। संप्रदानभूतब्राह्मणै
रालंबनविभावैः पात्रप्राप्तिसाध्वाद्यादिभिरुद्दीपनविभावैर्विभावितः सर्वाध्यवसायादिभिरनुभावैरनुभावितो हर्षधृत्या
दिसंचारिभिः पुष्टिं नीतो दानवीरतां भजते॥ धर्मवीरो यथा॥ युधिष्ठिरः। राज्यं च वसु देहश्च भार्या भ्रातृसुताश्च ये। यच्च लोके म २१
मायत्तं तद्धर्माय सदोद्यतं॥ युद्धवीरो यथा॥ रामचंद्रः। भो लंकेश्वर दीयतां जनकजा रामः स्वयं याचते कोयं ते मतिविभ्रमः स्म

×ते×१

रनयं नाद्यापि किंचिद्विकृतं । नैवं चेत्त्वरदूषणत्रिशिरसां कंठासृजां पंकिलः पत्री नैष सदिष्यते मम धनुर्ज्याबंधबंधूकृतः ॥
दयावीरो यथा ॥ जीमूतवाहनः ॥ शिरामुखैः स्यन्दत एव रक्तं मद्यापि देहे मम मांसमस्ति तृप्तिं न पश्यामि तवापि तावत् किं भक्ष-
णात्त्वं विरतो गरुत्मन् । एषापि विभावादयः पूर्ववदादरेण वक्तव्याः ॥ अथ भयानकः ॥ भयानको भयस्थायिभावः कालाधि-
दैवतः । स्त्रीनीचप्रकृतिः कृष्णो मतस्तत्त्वविशारदैः । यस्मादुत्पद्यते भीतिस्तदत्रालंबनं स्मृतं । चेष्टा घोरतरास्तस्य भवेदु-
द्दीपनं पुनः । अनुभावोऽत्र वैवर्ण्यगद्गदस्वरभाषणं । पुलकस्वेदरोमांचकंपदिक्प्रेक्षणादयः । जुगुप्सावेगसंमोहसंत्रास-
ग्लानिदीनता । शंकापस्मारसंभ्रांतिमृत्याद्या व्यभिचारिणः । यथा नष्टं वर्षवरैरित्यादि ॥ अथ बीभत्सः ॥ जुगुप्सास्थायिभावस्तु
बीभत्सः कथ्यते रसः । नीलवर्णो महाकालदैवतोऽयमुदाहृतः । दुर्गंधिमांसपिशितमेदांस्यालंबनं मतं । तत्रैव कृमिपाता-
द्यमुद्दीपनमुदाहृतं । निष्ठीवनास्यवलननेत्रसंकोचनादयः । अनुभावास्तत्र मतास्तथा स्युर्व्यभिचारिणः । मोहोऽपस्मार
आवेगो व्याधिश्च मरणादयः ॥ यथा ॥ उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूच्छोफभूयांसि मांसान्यंसस्फिक्पृष्ठपिंडाद्यवय-
वसुलभान्युग्रपूतीनि जग्ध्वा । आर्तः पर्यस्तनेत्रः प्रकटितदशनः प्रेतरंकः करंकादंकस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यम-
व्यग्रमत्ति ॥ अथाद्भुतः ॥ अद्भुतो विस्मयस्थायिभावो मन्मथदैवतः । पीतवर्णो वस्तु लोकातिगमालंबनं मतं । गुणानां त-
स्य महिमा भवेदुद्दीपनं पुनः । स्तंभस्वेदोऽथ रोमांचगद्गदस्वरसंभ्रमाः । तथा नेत्रविकासाद्या अनुभावाः प्रकीर्तिताः । वि-

तर्कावेगसंत्रासीति हर्षाद्या व्यभिचारिणः ॥ यथा ॥ दोर्दण्डाञ्चितचन्द्रशेखरधनुर्दण्डावभङ्गोद्यत टङ्कारध्वनिरार्यबालचरि
तप्रस्तावनाडिण्डिमः । द्राक्पर्यस्तकपालसंपुटमिलद्ब्रह्माण्डभाण्डोदर भ्राम्यत्पिण्डितचण्डिमा कथमहो नाद्यापि विश्राम्यति
॥ अथ शान्तः ॥ शान्तः शमस्थायिभाव उत्तमप्रकृतिर्मतः । कुन्देन्दुधवलच्छायः श्रीनारायणदैवतः । अनित्यत्वादिनाशेष
वस्तुनिःसारता तु या । परमार्थस्वरूपं वा तस्यालम्बनमिष्यते । पुण्याश्रमहरिक्षेत्रतीर्थरम्यवनादयः । महापुरुषसंगाद्या
स्तस्योद्दीपनरूपिणः । रोमाञ्चाद्याश्चानुभावास्तथा स्युर्व्यभिचारिणः । निर्वेदहर्षस्मरणमतिभूतदयादयः ॥ यथा ॥ रथ्या
न्तश्चरतस्तथा धृतजरत्कन्थालवस्याध्वगैः सत्रासं च सकौतुकं च सदयं दृष्टस्य तैर्नागरैः । निर्व्याजीकृतचित्सुधारसमुदा नि
द्रायमाणस्य ते निःशङ्कः करटः कदा करपुटीभिक्षां विलुण्ठिष्यति । पुष्टिश्च महाभारतादौ द्रष्टव्या निरहंकाररूपत्वात् दया
वीरादिरेष नो । दयावीरादौ हि जीमूतवाहनादावन्तरा मलयवत्याद्यनुरागादेरन्ते च विद्याधरचक्रवर्तित्वाद्याप्तेर्दर्शनादहं
कारोपशमो न दृश्यते । शान्तश्च सर्वाकारेणाहंकारप्रशमैकरूपत्वान्न तत्रान्तर्भवति । अतश्च नागानन्दे शान्तरसप्रधानत्व
मपास्तं । न यत्र दुःखं न सुखं न चिन्ता न द्वेषरागौ न च काचिदिच्छा । रसः स शान्तः कथितो मुनीन्द्रैः सर्वेषु भावेषु शमप्रधानः ।
इत्येवंरूपस्य शान्तस्य मोक्षावस्थायामेवात्मस्वरूपापत्तिलक्षणायां प्रादुर्भावात्तत्र च संचार्यादीनामभावात् कथं रसत्व २८
मिति ॥ उच्यते ॥ युक्तवियुक्तदशायामवस्थितो यः शमः स एव यतः । रसतामेति तदस्मिन्संचार्यादेः स्थितिश्च न विरुद्धा । य

अस्मिन्सुखाभावोप्युक्तस्तस्य वैषयिकसुखपरत्वान्न विरोधः ॥ उक्तं हि ॥ यच्च कामसुखं लोके यच्च दिव्यं महत्सुखं । तृष्णा
क्षयसुखस्यैते नार्हतः षोडशीं कलां । सर्वाकारमहंकाररहितत्वं व्रजंति चेत् । अत्रांतर्भावमर्हंति । दयावीरादयस्तथा । आ
दिशब्दाद्धर्मवीरदेवताविषयरतिप्रभृतयः । तत्र देवताविषया रतिर्यथा । कदा वाराणस्यामिह सुरधुनीरोधसि वसन्वस
सानः कौपीनं शिरसि निदधानोंजलिपुटं । अये गौरीनाथ त्रिपुरहर शंभो त्रिनयन प्रसीदेत्याक्रोशन्निमिषमिव नेष्यामि दि
वसान् । स्फुटं चमत्कारितया वत्सलं च रसं विदुः । स्थायी वत्सलतास्नेहः पुत्राद्यालंबनं मतं । उद्दीपनानि तच्चेष्टा विद्याशौर्य
दयादयः । आलिंगनांगसंस्पर्श शिरश्चुंबनमीक्षणं । पुलकानंदबाष्पाद्या अनुभावाः प्रकीर्तिताः । संचारिणोनिष्टशंका
हर्षगर्वादयो मताः । पद्मगर्भच्छविर्वर्णो दैवतं लोकमातरः ॥ उदाहरणं ॥ यदाह धात्र्या प्रथमोदितं वचो ययौ तदीयामवलंब्य
चांगुलिं । अभूच्च नम्रः प्रणिपातशिक्षया पितुर्मुदं तेन ततान सोर्भकः ॥ एषां रसानां परस्परं विरोधमाह ॥ आद्यः करुणबीभ
त्सरौद्रवीरभयानकैः । भयानकेन करुणेनापि हास्यो विरोधभाक् । करुणो हास्यशृंगाररसाभ्यामपि तादृशः । रौद्रस्तु हास्य
शृंगारभयानकरसैरपि । भयानकेन शांतेन तथा वीररसः स्मृतः । शृंगारवीररौद्राख्यहास्यशांतैर्भयानकः । शांतस्तु वीरशृं
गाररौद्रहास्यभयानकैः । शृंगारेण तु बीभत्स इत्याख्याता विरोधिता । आद्यः शृंगारः । एषां समावेशप्रकारा वक्ष्यंते । कुतोपि का
रणात्क्वापि स्थिरतामुपयन्नपि । उन्मादादिर्न तु स्थायी पात्रे न स्थैर्यमेति यत् । यथा विक्रमोर्वश्यां चतुर्थेंके पुरूरवस उन्मादः । रस

भावौ तदाभासौ भावस्य प्रशमोदयौ संधिः शवलता चेति सर्वे पि रसनाद्रसाः रसनधर्मयोगित्वाद्भावादिष्वपि रसत्वमौप
चारिकमित्यभिप्रायः ॥ भावादय उच्यन्ते ॥ संचारिणः प्रधानानि देवादिविषया रतिः उद्बुद्धमात्रः स्थायी च भाव इत्यभिधीयते
न भावहीनोऽस्ति रसो न भावो रसवर्जितः परस्परकृता सिद्धिरनयो रसभावयोः इत्युक्तदिशा परमालोचनया परमविश्रा
न्तिस्थानेन रसेन सहैव वर्तमाना अपि राजानुगतविवाहप्रवृत्तभृत्यवदापाततो यत्र प्राधान्येनाभिव्यक्ता व्यभिचारिणः देव
मुनिगुरुनृपादिविषया च रतिः उद्बुद्धमात्रा विभावादिभिरपरिपुष्टतया रसरूपतामनापद्यमानश्च स्थायी भावशब्देनोच्यते ॥ व्य
भिचारी यथा ॥ एवंवादिनि देवर्षौ पार्श्वे पितुरधोमुखी लीलाकमलपत्राणि गणयामास पार्वती अत्रावहित्था देवविषया
रतिर्यथा दिवि वा भुवि वा ममास्तु वासो नरके वा नरकांतकं प्रकामं अवधीरितशारदारविंदौ चरणौ ते मरणेपि चिंतयामि
॥ मुनिविषया रतिर्यथा ॥ विलोकनेनैव तवामुना मुने कृतः कृतार्थोऽस्मि निवर्हितांहसा तथापि शुश्रूषुरहं गरीयसी गिरोऽथ
वा श्रेयसि केन तृप्यते राजविषया रतिर्यथा मम त्वद्वाजिराजिनिर्धूतधूलीपटलपंकिलां न धत्ते शिरसा गंगां भूरिभारभि
याद्धरः एवमन्यत् ॥ स्थायी यथा ॥ हरस्तु किंचित्परिवृत्तधैर्यश्चन्द्रोदयारंभ इवाम्बुराशिः उमामुखे बिंबफलाधरोष्ठे व्यापारया
मास विलोचनानि अत्र पार्वतीविषया भगवतो रतिः ननु कथं पानकरसवद्विभावादीनामेकोऽवभासो रसः तत्र संचारिणः २९
पार्थक्याभावात्कथं प्राधान्येनाभिव्यक्तिः ॥ उच्यते ॥ यथा मरीचखंडादेरेकीभावे पि पानके उद्रेकः कस्यचित्क्वापि तथा सं

चारिणो रसे ॥ अथ रसाभासभावाभासौ ॥ यथा ॥ अनौचित्यप्रवृत्तत्वमाभासो रसभावयोः । अनौचित्यं चात्र रसानां रता
दिप्रणीतलक्षणानां । सामग्रीरहितत्वेन ह्येकदेशयोगित्वोपलक्षणपरं बोद्धव्यं । तच्च बालव्युत्पत्तये एकदेशतो दर्श्यते । उप
नायकसंस्थायां मुनिगुरुपत्नीगतायां च । बहुनायकनिष्ठायां । रतौ तथानुभयनिष्ठायां । प्रतिनायकनिष्ठत्वे । तद्वदधमपा
त्रतिर्यगादिगते । शृंगारेऽनौचित्यं । रौद्रे गुर्वादिगतकोपे । शांते च हीननिष्ठे । गुर्वाद्यालंबने हास्ये । ब्रह्मवधाद्युत्साहेऽधमपात्रग
ते तथा वीरे । उत्तमपात्रगतत्वे । भयानके ज्ञेयमेवमन्यत्र । तत्र रतेरुपनायकनिष्ठत्वे यथा मम । स्वामी मुग्धतरो वनं घनमि
दं बालाहमेकाकिनी । क्षोणीमावृणुते तमालमलिनच्छाया तमःसंततिः । तन्मे सुंदर कृष्ण मुंच सहसा वर्त्मेति गोप्याः गिरः ॥
श्रुत्वा तां परिरभ्य मन्मथकलासक्तो हरिः पातु नः ॥ बहुनायकनिष्ठे यथा ॥ कांतास्त एव भुवनत्रितयेऽपि मन्ये येषां कृते सु
तनु पांडुरयं कपोलः । अनुभयनिष्ठत्वे यथा । मालतीमाधवे नंदनस्य मालत्यां । पश्चादुभयनिष्ठत्वेऽपि प्रथममेकनिष्ठत्वे रते
राभासत्वमिति श्रीमल्लोचनकाराः ॥ तत्रोदाहरणं ॥ यथा रत्नावल्यां ॥ सागरिकाया अन्योन्यदर्शनात्प्राग्वत्सराजे रतिः । प्रतिना
यकनिष्ठत्वे यथा ॥ हयग्रीववधे हयग्रीवस्य जलक्रीडावर्णनेऽधमपात्रगतत्वे यथा । जघनस्थलीनद्धपत्रवल्ली गिरिमल्लीकु
सुमानि कापि भिल्ली । अविचिन्त्य गुरोः पुरो निषण्णा स्वकुचावुत्कचयांचकार तन्वी । तिर्यग्गतत्वे यथा । वल्लीमतल्लीषु पदं दधा
ना वल्ल्यंतरे वल्लभमाह्वयंती । वंचद्विपंचीकलनादभंगी संगीतमंगीकुरुते स्म भृंगी । आदिशब्दात्तापसादयः ॥ रौद्राभासो

साहित्यदर्पण. यथा ॥ रक्तोत्फुल्लविशाललोचनयः। कंपोत्तरंगोमुहुः। मुक्त्वाकर्णमपेतभीर्धृतधनुर्बाणोहरेःपश्यतः। आध्मातःकटुको
३० क्तिभिःस्वमसकृद्दोर्विक्रमंकीर्त्तय। न्नंसास्फोटपटुर्युधिष्ठिरमसौहंतुंप्रहृष्टोर्जुन ॥ भयानकरसाभासोयथा ॥ अशक्नुवन्
30 सोढुमधीरलोचनः। सहस्ररश्मेरिवयस्यदर्शनं। प्रविश्यहेमाद्रिगुहागृहांतरं। निनायबिभ्यद्दिवसानिकौशिकः। स्त्रीनीचवि
षयमेवहिनत्वयंरसप्रकृतिः ॥ एवमन्यत्र ॥ भावाभासोलज्जादिकेतुवेश्यादिविषयेस्यात्। स्पष्टं। भावस्यशांतावुदयेसंधिमि
श्रितयोःक्रमात्। भावस्यशांतिरुदयःसंधिःशबलतातथा ॥ क्रमेणयथा ॥ सुतनुजहिहिकोपंपश्यपादानतंमां। नखलुत
वकदाचित्कोपएवंविधोभूत्। इतिनिगदतिनाथे। तिर्यगामीलिताक्षा। नयनजलमनल्पंमुक्तमुक्तंनकिंचित्। अत्रबाष्प
विमोचनेनेर्ष्याख्यस्यसंचारिभावस्यशमः। चरणपतनप्रत्याख्यानप्रसादपराङ्मुखेनिभृतकितवाचारेत्युक्तेरुषापरुषी
कृते। व्रजतिरमणेनिश्वस्योच्चैस्तनाहितहस्तया। नयनसलिलच्छन्नादृष्टिःसखीषुनिपातिता। अत्रविषादस्योदयः। नयन
युगासेचनकंमानसवृत्त्यापिदुःप्रापं। रूपमिदंमदिराक्ष्यामदयतिहृदयंदुनोतिचमे। अत्रविषादहर्षयोःसंधिः। क्वाका
र्यंशशलक्ष्मणःक्वचकुलंभूयोपिदृश्येतसादोषाणांप्रशमायमेश्रुतमहोकोपेपिकांतंमुखं। किंवक्ष्यंत्यपकल्मषाःकृतधि
यःस्वप्नेपिसादुर्लभा। चेतःस्वास्थ्यमुपैहिकःखलुयुवाधन्योधरंधास्यति। अत्रवितर्कौत्सुक्यमतिस्मरणशंकादैन्यधृतिचिं ३०
तानांशबलता ॥ ॥इतिश्रीमद्विश्वनाथकविराजकृतौसाहित्यदर्पणेरसभावनिरूपणोनामतृतीयःपरिच्छेदः॥ ॥

॥अथ काव्यभेदमाह॥ ॥काव्यं ध्वनिर्गुणीभूतव्यंग्यं चेति द्विधा मतं तत्र वाच्यातिशायिनि व्यंग्ये ध्वनिस्तत्काव्यमुत्तमं वाच्यादधिकचमत्कारिणि व्यंग्यार्थे ध्वन्यतेऽस्मिन्निति व्युत्पत्त्या ध्वनिर्नामोत्तमं काव्यं भेदौ ध्वनेरपि द्वावुदीरितौ लक्षणाभिधामूलौ। अविवक्षितवाच्योऽन्यो विवक्षितान्यपरवाच्यस्त्वभिधामूलः अत एव वाच्यविवक्षितं अन्यपरं व्यंग्यनिष्ठं अत्र हि वाच्योऽर्थः स्वरूपं प्रकाशयन्नेव व्यंग्यार्थस्य प्रकाशकः। यथा दीपो घटस्य अभिधामूलस्य बहुविषयतया पश्चान्निर्देशः ॥अविवक्षितवाच्यस्य भेदावाह॥ अर्थान्तरसंक्रमिते वाच्येऽत्यन्ततिरस्कृते। अविवक्षितवाच्यो हि ध्वनिर्द्वैविध्यमृच्छति अविवक्षितवाच्यो नाम ध्वनिः अर्थान्तरसंक्रमितवाच्योऽत्यन्ततिरस्कृतवाच्यश्चेति द्विविधः। यत्र स्वयमनुपयुज्यमानो मुख्योऽर्थः स्वविशेषरूपार्थान्तरसंक्रमितत्वादर्थान्तरसंक्रमितवाच्यत्वं ॥यथा॥ कदली कदली करभः करभः करिराजकरः करिराजकरः भुवनत्रितयेऽपि बिभर्ति तुलामिदमूरुयुगं न चमूरुदृशः। अत्र द्वितीयकदल्यादिशब्दाः सामान्यकदल्यादिरूपे मुख्यार्थे बाधिता जाड्यादिरूपगुणविशिष्टकदल्यादिरूपमर्थं बोधयन्ति। जाड्याद्यतिशयश्च व्यंग्यः। यत्र पुनः स्वार्थं सर्वथा परित्यजन्नर्थान्तरे परिणमति। तत्र मुख्यार्थस्यात्यन्ततिरस्कृतत्वादत्यन्ततिरस्कृतवाच्यत्वं। यथा निःश्वासान्ध इवादर्शश्चन्द्रमात प्रकाशत्वयोः सामान्यविशेषभावाभावान्नार्थान्तरसंक्रमितवाच्यत्वं। भम धम्मिअ वीसद्धो सो सुणहो अज्ज मारिओ तेण। गोलाणइअकच्छकुडंगवासिणा दरिअसीहेण। इत्यत्र भ्रम धार्मिकेत्यतो भ्रमणस्य विधिः प्रकृतेऽनुपयुज्यमा

नतयात्रमणनिषेधेपर्यवस्यतीतिविपरीतलक्षणाशंकानकार्या। यत्रखलुविधिनिषेधावुत्पद्यमानावेवनिषेध
विध्योःपर्यवस्यतस्तत्रैवैतदवसरः। यत्रपुनःप्रकरणादिपर्यालोचनेनविधिनिषेधयोर्निषेधविध्योरवगम्येते। तत्रध्वनित्व
मेव॥तदुक्तं॥ क्वचिद्बाध्यतयाख्यातिः क्वचित्ख्यातस्यबाधनं। पूर्वत्रलक्षणैवस्यादुत्तरत्राभिधैवतु। अत्राद्येमुख्यार्थस्या
र्थान्तरेसंक्रमणंप्रवेशस्तन्नतिरोभावः। अतएवाजहत्स्वार्थालक्षणा। द्वितीयेतुस्वार्थस्यात्यन्ततिरस्कृतत्वाज्जहत्स्वार्था। वि
वक्षिताभिधेयोपिद्विभेदःप्रथमंमतः। असंलक्ष्यक्रमोयत्रव्यंग्योलक्ष्यक्रमस्तथा। विवक्षितान्यपरवाच्योपि॥ध्वनिरसं
लक्ष्यक्रमव्यंग्यः॥ संलक्ष्यक्रमव्यंग्यश्चेतिद्विविधः। तत्राद्योरसभावादिरेकएवात्रगण्यते। एकोपिभेदोऽनन्तत्वात्संख्येय
स्तस्यनैवयत्। उक्तस्वरूपोरसभावादिरसंलक्ष्यक्रमः। अत्रव्यंग्यप्रतीतेर्विभावादिप्रतीतिकारणकत्वात्क्रमोवश्य
मस्ति। किंतूत्पलपत्रशतव्यतिभेदवल्लाघवान्नसंलक्ष्यते। एषुचैकस्यापिभेदस्यानन्तत्वात्संख्यातुमशक्यत्वादसंल
क्ष्यक्रमव्यंग्यध्वनिर्नामकाव्यमेकभेदमेवोक्तं। तथाह्येकस्यैवशृंगाररसस्यैकोपिसंभोगरूपोभेदः। परस्परालिंगना
धरपानचुम्बनादिभेदात्प्रत्येकंचविभावादिवैचित्र्यात्संख्यातुमशक्यः। कागणनासर्वेषां। शब्दार्थोभयशक्त्युत्थेव्यंग्येऽनु
स्वानसंनिभेध्वनिर्लक्ष्यक्रमव्यंग्यस्त्रिविधःकथितोबुधैः। क्रमस्यलक्ष्यत्वादनुरणनरूपोयोव्यंग्यस्तस्यशब्दशक्त्यु ३१
द्भवत्वेनार्थशक्त्युद्भवत्वेनोभयशक्त्युद्भवत्वेनत्रैविध्यात्। संलक्ष्यक्रमव्यंग्यनाम्नोध्वनेःकाव्यस्यापित्रैविध्यं। तत्र। त

त्र वस्तुरूपः शब्दशक्त्युद्भवो व्यङ्ग्यो यथा । पथिअ ण एत्थ सत्थरमत्थि मणं पत्थरत्थले गामे । उण्णअपओहरं पेक्खिऊण ज
इ वससि ता वससु । अत्र सत्थरादिशब्दशक्त्या यद्युपभोगक्षमोऽसि तदा वसेति व्यज्यते । अलंकाररूपो यथा । दुर्गालङ्घित
विग्रहः इत्यादि । अत्र प्राकरणिकस्य उमानाम महादेवीवल्लभस्य भानुदेवनृपतेर्वर्णने द्वितीयार्थसूचितमप्राकरणिक
स्य पार्वतीवल्लभस्य वर्णनमसंबद्धं माभूदिति ईश्वरभानुदेवयोरुपमानोपमेयभावः कल्प्यते । तदत्र उमावल्लभ इव
उपमालंकारो व्यङ्ग्यः ॥ यथा वा ॥ अमितः समितः प्राप्तैरुत्कर्षैर्हर्षद प्रभो । अहितः सहितः साधुयशोभिरसतामसि । अ
त्राभित इत्यादावपि शब्दशक्त्या विरोधाभासो व्यङ्ग्यः । व्यङ्ग्यस्यालंकारस्यालंकार्यत्वेऽपि ब्राह्मणश्रमणन्यायेनालंकारत्वमु
पचर्यते । वस्तु वालंकृतिर्वेति द्विधार्थः संभवी स्वतः । कवेः प्रौढोक्तिसिद्धो वा तन्निबद्धस्य वेति षट् । षड्भिस्तैर्व्यज्यमानोऽपि व
स्त्वलंकाररूपकः । अर्थशक्त्युद्भवो व्यङ्ग्यो याति द्वादशभेदतां । स्वतः संभवी औचित्याद्बहिरपि संभाव्यमानः । प्रौढोक्तिसिद्धो
न त्वौचित्येन ॥ तत्र क्रमेण यथा ॥ दृष्टिं हे प्रतिवेशिनि क्षणमिहाप्यस्मद्गृहे दास्यसि प्रायेणास्य शिशोः पिता न विरसाः कौ
पीरपः पास्यति । एकाकिन्यपि यामि तद्वरमितः स्रोतस्तमालाकुलं नीरन्ध्रास्तनुमालिखन्तु जरठच्छेदा नलग्रन्थयः । अनेन
स्वतः संभविना वस्तुमात्रेण तत्प्रतिपादिकायास्ताविपरपुरुषोपभोगजनखक्षतादिगोपन रूपवस्तुमात्रं व्यज्यते ॥ दिशि
मन्दायते तेजो दक्षिणस्यां रवेरपि । तस्यामेव रघोः पाण्ड्याः प्रतापं न विषेहिरे । अनेन स्वतः संभविना रवितेजसो रघुप्रतापो

धिक इति व्यतिरेकालंकारो व्यज्यते। आत्तं पतममुं हराद्दूरीकृतपराक्रमः। बलवलोकयामास मातंगमिव केसरी॥
अत्रोपमालंकाररूपेण स्फुटः सन्न विनार्थेन बलदेवः क्षणेन वेणुदारिणः क्षयं करिष्यतीति वस्तु व्यज्यते। गाढकांतद-
शनकृतव्यथा। संकटादरिवधूजनस्य यः। ओष्ठविद्रुमदलान्यमोचयन्निर्दशन्युधि रुषा निजाधरं॥ अत्र स्फुटः सन्न विना
विरोधालंकारेणाधरोष्ठो निर्दिश्य शत्रवो व्यापादिता इति समुच्चयालंकारो व्यंग्यः। सज्जेइ सुरहिमासो ल अप्पणामे
इ जुवइजलक्खमहे। अहिणवसहआरमुहे णवपल्लवपत्तले अनंगस्स सरे॥ अत्र वसंत॥ शरकारः कामो धन्वी युवत
योलक्ष्यं पुष्पाणि शरा इति कविप्रौढोक्तिसिद्धं वस्तु प्रकाशीलवत्मदनविजृंभणरूपं वस्तु व्यनक्ति। रजनीषु विमलभानोः
करजालेन प्रकाशितं वीर। धवलयति भुवनमंडलमखिलं तव कीर्त्तिसंततिः सततं। अत्र कविप्रौढोक्तिसिद्धेन वस्तुना॥
कीर्त्तिसंततेश्चंद्रकरजालादधिककालप्रकाशकत्वेन व्यतिरेकालंकारो व्यंग्यः। दशाननकिरीटेभ्यस्तत्क्षणं राक्षसश्रि-
यः। मणिव्याजेन पर्यस्ताः पृथिव्यामश्रुबिंदवः। अत्र कविप्रौढोक्तिसिद्धेतापह्नुत्यलंकारेण भविष्यद्राक्षसश्रीविनाशरू-
पं वस्तु व्यज्यते। धम्मिल्लेन च मल्लिकासमुदयो हस्ते सितांभोरुहं हारः कंठतले पयोधरयुगे श्रीखंडलेपो घनः। एकोपि त्रि-
कलिंगभूमितिलकत्वत्कीर्त्तिराशिर्ययौ नानामंडनतां पुरंदरपुरीवामभ्रुवां विग्रहे। अत्र कविप्रौढोक्तिसिद्धेन रूपकालं- ३२
कारेण भूमिस्थोपि स्वर्गस्थानामुपकारं करोतीति विभावनालंकारो व्यज्यते॥ शिखरिणि क्व नु नाम कियच्चिरं। किमभिधान

टकंख्यातवृत्तंस्यात्पंचसंधिसमन्वितं। विलासर्ध्यादिगुणवद्युक्तंनानाविभूतिभिः। सुखदुःखसमुद्भूति नानारसनिरंतरं
पंचादिकादशपरास्तत्रांकाःपरिकीर्तिताः। प्रख्यातवंशोराजर्षिर्धीरोदात्तःप्रतापवान्। दिव्योथदिव्यादिव्योवा। गुणवान्नाय
कोमतः। एकएवभवेदंगी। शृंगारोवीरएववा। अंगमन्येरसाःसर्वे। कार्यंनिर्वहणेद्भुतं। चत्वारःपंचवामुख्याःकार्यव्यापृतपू
रुषाः। गोपुच्छाग्रसमाग्रंतु। बंधनंतस्यकीर्तितं। ख्यातंरामायणादिप्रसिद्धंवृत्तं। यथारामचरितादि। संधयोवक्ष्यंते। नानावि
भूतिभिर्युक्तमितिमहासहायं। सुखदुःखसमुद्भवत्वं। रामयुधिष्ठिरादिवृत्तांतेष्वभिव्यक्तं। राजर्षयोदुष्यंतादयः। दिव्याःश्रीकृ
ष्णादयः। दिव्यादिव्योयोदिव्योप्यात्मनिनराभिमानी। यथाश्रीरामः। गोपुच्छाग्रसमाग्रमितिक्रमेणांकाःसूक्ष्माःकर्तव्याइ
तिकेचित्॥ अन्येत्वाहुः। यथागोपुच्छे। केचिद्वालाह्रस्वाः। केचिद्दीर्घास्तथेहकानिचित्कार्याणिमुखसंधौसमाप्तानि। का
निचित्प्रतिमुखे। एवमन्येष्वपिकानिचित्कानिचिदिति। प्रत्यक्षनेतृचरितो। रसभावसमुज्ज्वलः। भवेदगूढशब्दार्थः। क्षुद्रचूर्ण
कसंयुतः। विच्छिन्नावांतरैकार्थः। किंचित्संलग्नबिंदुकः। युक्तोनबहुभिःकार्यैर्बीजसंहृतिमान्नच। नानाविधानसंयुक्तोना
तिप्रचुरपद्यवान्। आवश्यकानांकार्याणामविरोधाद्विनिर्मितः॥ नानेकदिननिर्वर्त्यकथयासंप्रयोजितः। आसन्ननायकः
पात्रै। र्युक्तस्त्रिचतुरैस्तथा। दूराह्वानंवधोयुद्धंराज्यदेशादिविप्लवः। विवाहोभोजनंशापोत्सर्गौमृत्यूरतंतथा। दंतछेद्यंनख
छेद्यमन्यद्व्रीडाकरंचयत्। शयनाधरपानादि। नगराद्युपरोधनं। स्नानानुलेपनैश्चैभिर्वर्जितोनातिविस्तरः। देवीपरिजना

दीनां ममात्यवणिजामपि। प्रत्यक्षचित्रचरितैर्युक्तो भावरसोद्भवैः। अन्तनिःक्रान्तनिखिलपात्रोऽङ्क इति कीर्तितः। विंदाद-
यो वक्ष्यते। आवश्यकं संध्यावंदनादि॥ अङ्कप्रस्तावाद्गर्भाङ्कमाह॥ अङ्कोदरप्रविष्टो यो रङ्गद्वारामुखादिमान्। अङ्कोऽपरः स
गर्भाङ्कः सबीजफलवानपि॥ यथा बालरामायणे॥ रावणं प्रति कंचुकी। श्रवणैः पेयमनेकैर्दृश्यं दीर्घैश्च लोचनैर्बहुभिः।
भवदर्थमिव निबद्धं नाट्यं सीतास्वयंवरणं। इत्यादिना विरचितः सीतास्वयंवरो नाम गर्भाङ्कः। तत्र पूर्वं पूर्वरङ्गः। सभापूजा
तत्परं। कथनं कविसंज्ञादेर्नाटकस्याप्यथामुखं। तत्रेति नाटके। यन्नाट्यवस्तुनः पूर्वं रङ्गविघ्नोपशान्तये। कुशीलवाः प्रकुर्व-
ति पूर्वरङ्गः स उच्यते। प्रत्याहारादिकान्यङ्गान्यस्य भूयांसि यद्यपि। तथाप्यवश्यं कर्तव्या नान्दी विघ्नोपशान्तये॥ अस्याः स्व-
रूपमाह॥ आशीर्वचनसंयुक्ता नित्यं यस्मात्प्रयुज्यते। देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता। मङ्गल्यशङ्खचन्द्राब्जको-
ककैरवशंसिनी। पादैर्युक्ता द्वादशभिरष्टाभिर्वा पदैरुत॥ अष्टपदा यथा। अनर्घराघवे। निःप्रत्यूहमुपास्महे इत्यादि॥
द्वादशपदा यथा। मम तातपादानां। पुष्पमालायां॥ शिरसि धृतसुरापगे स्मरारावरुणमुखेन्दुरुचिर्गिरीन्द्रपुत्री। अथ च-
रणयुगानते स्वकान्ते स्मितसरसा भवतोऽस्तु भूतिहेतुः। एवमन्यत्र। एतन्नान्दीति कस्यचिन्मतानुसारेणोक्तं। वस्तुतस्तु पूर्वरं-
गस्य रङ्गद्वाराभिधानमङ्गमित्यपरे। यदुक्तं। यस्मादभिनयो ह्यत्र प्राथम्यादवतार्यते। रङ्गद्वारमतो ज्ञेयं वागङ्गाभिनयात्म-
कं। उक्तप्रकारायाश्च नान्द्या रङ्गद्वारत्वात्प्रथमं नटैरेव कर्तव्यतया न महर्षिणा। निर्देशः कृतः। कालिदासमहाकविप्रबन्धेषु ५०

च। वेदांतेषु यमाहुरेकपुरुषं। व्याप्य स्थितं रोदसी। यस्मिन्नीश्वर इत्यनन्यविषयः शब्दो यथार्थाक्षरः। अंतर्यश्च मुमुक्षु
भिर्नियमित। प्राणादिभिर्मृग्यते। स स्थाणुः स्थिरभक्तियोगसुलभो निःश्रेयसायास्तु वः। एवमादिषु नांदीषु लक्षणयोगादु
क्तं च रंगद्वारमारभ्य कविः कुर्यादिति। अतः शाकुंतलादिषु नांद्यंते सूत्रधार इति। अनंतरमेव वेदांतेष्वित्यादिश्लोकलिखनं
दृश्यते। यच्च पश्चान्नांद्यंते सूत्रधार इति लिखनं। तस्यायमभिप्रायो नांद्यंते सूत्रधार इदं प्रयोजितवानितः प्रभृति नाटकमुपादी
यत इति कवेरभिप्रायः सूचित इति। पूर्वरंगं विधायैवं सूत्रधारो निवर्तते। प्रविश्य स्थापकस्तद्वत्काव्यमास्थापयेत्ततः। दिव्य
मर्त्ये च तद्रूपो। मिश्रमन्यतरस्तयोः। सूचयेद्वस्तु बीजं वा। मुखं पात्रमथापि वा। काव्यार्थस्य स्थापनात्स्थापकः। तद्वदिति सूत्रधा
रसदृशगुणाकारः। इदानीं पूर्वरंगस्य सम्यक्प्रयोगाभावादेक एव सूत्रधारः सर्वं प्रयोजयतीति व्यवहारः। स स्थापकः॥ दिव्यं
वस्तु दिव्यो भूत्वा मर्त्यं वस्तु मर्त्यो भूत्वा मिश्रं च दिव्यमर्त्ययोरन्यतरो भूत्वा सूचयेत्। वस्त्विति वृत्तं। यथोदात्तराघवे। रामो मूर्ध्नि नि
धाय काननमगान्मालामिवाज्ञां गुरोस्तद्भक्त्या भरतेन राज्यमखिलं मात्रा सहैवोज्झितं॥ तौ सुग्रीवविभीषणावनुगतौ नीतौ परा
रां संपदं। प्रोद्वृत्ता दशकंधरप्रभृतयो ध्वस्ताः समस्ता द्विषः॥ बीजं यथा रत्नावल्यां॥ द्वीपादन्यस्मादपि मध्यादपि जलनिधेर्दिशो
ऽप्यंतात्। आनीय झटिति घटयति विधिरभिमतमभिमुखीभूतः। अत्र हि समुद्रे प्रवहणभंगमग्नोत्थितायाः रत्नावल्या अनुकूल
दैवमनितो वत्सराजगृहप्रवेशो यौगंधरायणव्यापारमारभ्य रत्नावलीप्राप्तौ बीजं। मुखं श्लेषादिना प्रस्तुतवृत्तांतप्रतिपादको

वाग्विशेषः॥यथा॥आसादितप्रकटनिर्मलचंद्रहासःप्राप्तःशरत्समयएषविशुद्धकांतः।उत्खायगाढतमसंघनकालम्
मुग्रंरामोदशास्यइवसंभृतबंधुजीव।पात्रंयथाभिज्ञानशाकुंतले।तवास्मिगीतरागेणहारिणाप्रसभंहृतः।एषराजेवदुष्यं
तःसारंगेणातिरंहसा।रंगंप्रसाद्यमधुरैःश्लोकैःकाव्यार्थसूचकैः।रूपकस्यकवेराख्यांगोत्राद्यपिकीर्त्तयेत्।ऋतुंचकं
चित्प्रायेणभारतीवृत्तिमाश्रितः।सस्थापकः।प्रायेणेतिक्वचित्।ऋतोरकीर्त्तनमपि।यथारत्नावल्यां।भारतीवृत्तिस्तु।भार
तीसंस्कृतप्रायोवाग्व्यापारोनराश्रयः।संस्कृतबहुलोवाक्प्रधानोव्यापारोभारती।तस्याःप्ररोचनावीथीतथाप्रहसनामु
खे।अंगान्यत्रोन्मुखीकारःप्रशंसातःप्ररोचना।प्रस्तुताभिनयेषुप्रशंसातःश्रोतृणांप्रवृत्तुन्मुखीकरणंप्ररोचना॥यथार
त्नावल्यां॥श्रीहर्षोनिपुणःकविःपरिषदप्येषागुणग्राहिणी।लोकेहारिचवत्सराजचरितंनाट्येचदक्षावयं।वस्त्वेकैकमपी
दवांछितफलप्राप्तेःपदंकिंपुनः।मद्भाग्योपचयादयंसमुदितःसर्वोगुणानांगणः।वीथीप्रहसनेवक्ष्येते।नटीविदूषकोवापि
पारिपार्श्वकएववा।सूत्रधारेणसहिताःसंलापंयत्रकुर्वते।चित्रैर्वाक्यैःस्वकार्योत्थैःप्रस्तुतापेक्षितैर्मिथः।आमुखंतत्तुविज्ञे
यंनाम्नाप्रस्तावनापिसा॥३॥सूत्रधारसदृशत्वात्स्थापकोपिसूत्रधारउच्यते।तस्यानुचरःपारिपार्श्वकस्तस्मात्किंचिदूनोन
टः।उद्घात्यकःकथोद्घातःप्रयोगातिशयस्तथा।प्रवर्त्तकावलगिते।पंचप्रस्तावनाभिदाः।तत्रपदानित्वगतार्थानितदर्थगत ७१
येनराःयोजयंतिपदैरन्यैःसउद्घात्यकउच्यते।यथामुद्राराक्षसेसूत्रधारः।क्रूरग्रहःसकेतुश्चंद्रं।संपूर्णमंडलमिदानीं।अभि

त्तवितुमिच्छतिबलात् । अनंतरंनेपथ्ये । आःकएषमयिजीवतिचंद्रगुप्तमभियोक्तुमिच्छतीति । अत्रान्यार्थवंत्यपिपदानिहृदि
स्थार्थांतरसंक्रमात्पात्रप्रवेशः । सूत्रधारस्यवाक्यं । वासमादायार्थमस्यवा । भवेत्पात्रप्रवेशश्चेत्कथोद्घातःसउच्य
ते ॥ वाक्यंयथारत्नावल्यां ॥ द्वीपादन्यस्मादितिसूत्रधारेणपठितेनेपथ्ये । एवमेतत् कःसंदेहः । द्वीपादन्यस्मादितिपठित्वायौ
गंधरायणस्यप्रवेशः । वाक्यार्थस्ययथावेणीसंहारे । निर्वाणवैरदहनाःप्रशमादरीणां । नंदंतुपांडुतनयाःसहमाधवेन । र
क्तप्रसाधितभुवःक्षतविग्रहाश्चस्वस्थाभवंतुकुरुराजसुताःसभृत्याः । इतिसूत्रधारेणस्यवाक्यस्यार्थंगृहीत्वानेपथ्ये । आःदु
रात्मन्वृथामंगलपाठकस्वस्थाभवंति । मयिजीवतिधार्तराष्ट्राः । ततःसूत्रधारोनिःक्रांतःभीमसेनस्यप्रवेशः । यदिप्रयोगए
कस्मिन्प्रयोगोन्यःप्रयुज्यते । तेनपात्रप्रवेशश्चेत्प्रयोगातिशयस्तदा ॥ यथाकुंदमालायांयथा ॥ इतइतोवतरत्वार्याःसूत्र
धारःकोयंखल्वार्याह्वानेनसाहायकमपिमेसंपादयतिविलोक्यकष्टमतिकरुणंवर्तते । लंकेश्वरस्यभुवनेसुचिरंस्थि
तेतिरामेणलोकपरिवादभियाकुलेन । निर्वासितांजनपदादपिगर्भगुर्वीं । सीतांवनायपरिकर्षतिलक्ष्मणोयं । अत्रनृत्यप्र
योगार्थंस्वभार्याह्वानमिच्छता सूत्रधारेणसीतांवनायपरिकर्षतिलक्ष्मणोयं । इतिसीतालक्ष्मणयोःप्रवेशंसूचयित्वा ॥
निःक्रांतेनस्वप्रयोगमतिशयानएवप्रयोगःप्रयोजितः । कालंप्रवृत्तमाश्रित्यसूत्रधृग्यत्रवर्णयेत् । तदाश्रयश्चपात्रस्यप्रवे
शस्तत्प्रवर्तकं ॥ यथा ॥ आसादितप्रकटितेत्यादि । ततःप्रविशतियथानिर्दिष्टोरामः । यत्रैकत्रसमावेशात्कार्यमन्यत्प्रसा

साहित्यदर्प्पण
५२

ध्येत् प्रयोगे खलु तज्ज्ञेयं नाम्नावलगितं बुधैः॥ यथा शाकुंतले सूत्रधारः नटीं प्रति॥ तवास्मि गीतरागेण हारिणेत्यादि त
तो राज्ञः प्रवेशः योज्यान्यत्र यथालाभं वीथ्यंगानीतराण्यपि अत्रामुखे उद्घात्यकावलगितयोरितराणि वीथ्यंगानि व
क्ष्यमाणानि नखकुट्टस्तु नेपथ्योक्तं श्रुतं यत्र त्वाकाशवचनं तथा समाश्रित्यापि कर्त्तव्यमामुखं नाटकादिषु एवमामुख
भेदानामेकं क्वचित्प्रयोजयेत् तेनार्थमथवा पात्रं समाक्षिप्यैव सूत्रधृक् प्रस्तावनान्ते निर्गच्छेत् ततो वस्तु प्रयोजयेत् वस्त्वि
तिवृत्तं इदं पुनर्वस्तु बुधैर्द्विविधं परिकल्प्यते आधिकारिकमेकं स्यात्प्रासंगिकमथापरं अधिकारः फले स्वाम्यमधिकारी
च तत्प्रभुः तस्येतिवृत्तं कविभिराधिकारिकमुच्यते फले प्रधानफले॥ यथा बालरामायणे रामचरितं॥ अस्योपकरणा
र्थं तु प्रासंगिकमितीष्यते अस्याधिकारिकेतिवृत्तस्योपकारनिमित्तं यच्चरितं तत्प्रासंगिकं यथा सुग्रीवादिचरितं॥ पता
कास्थानकं योज्यं सुविचार्येह वस्तुनि इह नाट्ये यत्रार्थे चिंतितेन्यस्मिंस्तल्लिंगोन्यः प्रयुज्यते आगंतुकेन भावेन पताकास्था
नकं तु तत्॥ तद्भेदानाह॥ सहसैवार्थसंपत्तिर्गुणवत्युपचारतः पताकास्थानकमिदं प्रथमं परिकीर्त्तितं यथा रत्नावल्यां वा
सवदत्तेयमिति राजा यदा कंठपाशं मोचयति तदा तदपि सागरिकेयमिति प्रत्यभिज्ञाय कथं प्रिया मे सागरिका अलमल
मतिमात्रं साहसेनामुना ते त्वरितमपि विमुंच त्वं लतापाशमेनं चलितमपि निरोद्धुं जीवितं जीवितेश क्षणमिह मम कंठे बा ५२
हुपाशं निधेहि इति फलरूपार्थसंपत्तिः पूर्वापेक्षयोपचारातिशयाद्गुणवत्युत्कृष्टा वचः सातिशयं श्लिष्टं नानाबंधसमाश्रयं

पताकास्थानकमिदं द्वितीयं परिकीर्तितं ॥ यथा वेण्यां भीमः ॥ रक्तप्रसाधितभुवः क्षतविग्रहाश्च स्वस्था भवन्तु कुरुराज
सुताः सभृत्याः ॥ अत्र रक्तादीनां रुधिरशरीरार्थकहेतुकश्लेषवशेन बीजार्थप्रतिपादनात् मंगलप्रतिपत्तौ सत्यां द्वितीयं पता
कास्थानकं ॥ अर्थोपक्षेपणं यत्तु लीनं सविनयं भवेत् ॥ श्लिष्टप्रत्युत्तरोपेतं तृतीयमिदमुच्यते ॥ लीनमव्यक्तार्थं श्लिष्टेन संबन्धयो
ग्येनाभिप्रायान्तरप्रयुक्तेन प्रत्युत्तरेणोपेतं सविनयं विशेषनिश्चयप्राप्त्या सहितं संपाद्यते यत्र तृतीयं पताकास्थानकं ॥ यथा
वेण्यां द्वितीयेऽङ्के कञ्चुकी देव भग्नं भग्नं राजा केन कञ्चुकी भीमेन राजा कस्य कञ्चु भवतः राजा आः किं प्रलपसि कञ्चु॰
भग्नं देव ननु ब्रवीमि भग्नं भीमेन भवतः राजा धिग्वृद्धापसद कोऽयमद्य ते व्यामोहः कञ्चुकी देव न व्यामोहः कञ्चुकी देव न
व्यामोहः सत्यमेव ब्रवीमि भग्नं भीमेन भवतो मरुता रथकेतनं पतितं किंकिणीजालबद्धाक्रंदमिव क्षितौ ॥ अत्र दुर्योधनोरु
भङ्गरूपप्रस्तुतसंक्रान्तमर्थोपक्षेपणं ॥ द्व्यर्थो वचनविन्यासः सुश्लिष्टः काव्ययोजितः ॥ प्रधानार्थान्तरापेक्षी पताकास्थानकं प
रं ॥ यथा रत्नावल्यां ॥ उद्दामोत्कलिकां विपाण्डुररुचिं प्रारब्धजृम्भां क्षणा दायासं श्वसनोद्गमैरविरलैरातन्वतीमात्मनः ॥ अद्यो
द्यानलतामिमां समदनां नारीमिवान्यां ध्रुवं पश्यन् कोपविपाटलद्युति मुखं देव्याः करिष्याम्यहं ॥ अत्र भाव्यर्थः सूचितः ॥ एता
नि चत्वारि पताकास्थानकानि क्वचिन्मङ्गलार्थं क्वचिदमङ्गलार्थमपि सर्वसंधिषु भवन्ति काव्यकर्तुरिच्छावशाद्भूयोऽपि भव
ति ॥ यत्पुनः केनचिदुक्तं मुखसंधिमारभ्य संधिचतुष्टये क्रमेण भवन्तीति तदन्येन मन्यते ॥ एषामत्यन्तमुपादेयानामनियमे

साहित्यदर्प्पण॰
४३
43

न सर्वत्रापि सर्वेषामपि त्वविरुद्धत्वात्। यत्स्यादनुचितं वस्तु नायकस्य रसस्य वा। विरुद्धं तत्परित्याज्यमन्यथा वा प्रक-
ल्पयेत्। अनुचितमितिवृत्तं यथा। रामस्य छद्मना बालिवधः। तच्चोदात्तराघवे नोक्तमेव। वीरचरिते तु वाली रामवधार्थमाग-
तो रामेण हत इत्यन्यथा कृतः। अंकेऽदर्शनीया या वक्ष्यते च सा मता। या च स्याद्वर्षपर्यंते कथा दिनद्वयादिजा। अन्या च
विस्तरात्सूच्या सार्थोपक्षेपकैर्बुधैः। अंकेऽदर्शनीया या कथा युद्धादिका कथा। वर्षादूर्ध्वं तु यद्वस्तु तस्माद्वर्षादधस्तनं
॥उक्तं हि मुनिना॥ अंकच्छेदे कार्यं मासकृतं वर्षसंचयं वापि। तत्सर्वं कर्तव्यं। वर्षादूर्ध्वं न कदाचित्। एवं चतुर्दशवर्षव्यापिन्य-
पि रामवनवासे ये ये विराधवधादयः कथांशास्ते। ते वर्षवर्षावयवदिनयुग्मादीनामेकतमेन सूचनीया न विरुद्धाः। दि-
नावसानकार्यं यद्दिने नैवोपपद्यते। अर्थोपक्षेपकैर्वाच्यमंकच्छेदं विधाय तत्। के ते ऽर्थोपक्षेपका इत्याह। अर्थोपक्षेपकाः
पंच विष्कंभकप्रवेशकौ। चूलिकांकावतारोऽथ स्यादंकमुखमित्यपि। वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः। संक्षिप्तार्थ-
स्तु विष्कंभ आदावंकस्य दर्शितः। मध्येन मध्यमाभ्यां वा पात्राभ्यां संप्रयोजितः। शुद्धः स्यात्स तु संकीर्णो नीचमध्यमकल्पितः॥
तत्र शुद्धो यथा मालतीमाधवे। श्मशाने कपालकुंडला॥ संकीर्णो यथा॥ रामाभिनंदे क्षपणककापालिकौ। अथ प्रवेशकः।
प्रवेशकोऽनुदात्तोक्त्या नीचपात्रप्रयोजितः। अंकद्वयान्तर्विज्ञेयः शेषं विष्कंभके यथा। अंकद्वयान्तरिति प्रथमेंऽकेस्य निषेधः। ४३
यथा वेण्यामश्वत्थामांके राक्षसमिथुनं॥ अथ चूलिका। अंतर्यवनिकासंस्थैः सूचनार्थस्य चूलिका॥ यथा वीरचरिते चतुर्था-

कस्यादौ ॥ नेपथ्ये भो भो वैमानिकाः प्रवर्त्यतां रंगमंगलानि इत्यादि । अनेन रामेण परशुरामो जित इति नेपथ्ये पात्रैः सूचि-
तः । अथांकावतारः । अंकांते सूचितः पात्रैस्तदंकस्याविभागतः । यत्रांकोवतरत्येकावतार इति स्मृतः । यथाभिज्ञाने पंचमां-
कसूचितः षष्ठांकस्तस्यांगविशेष इवावतीर्णः । अथांकमुखं यत्र स्यादंक एवास्मिन्नंकानां सूचनाखिला । तदंकमुखमि-
त्याहुः बीजार्थख्यापकं तु यत् । यथा मालतीमाधवप्रथमांकादौ ॥ कादंबक्यवलोकिते भूरिवसुप्रभृतीनां भाविभूमिका-
नां परिक्षिप्तकथाप्रबंधस्य प्रसंगात्संनिवेशं सूचितवंतौ । अंकांतपात्रैरंकास्यं छिन्नांकस्यार्थसूचना । अंकांतपात्रैरंका-
त प्रविष्टैः पात्रैः यथा वीरचरिते द्वितीयांकांते प्रविश्य सुमंत्रः भगवंतौ वशिष्ठविश्वामित्रौ भवतः सभार्गवानाह्वयतः इतरेष्व
भगवंतौ सुमंत्रः महाराजदशरथस्यांतिके इतरे तु तत्रैव गच्छाम इत्यंकपरिसमाप्तौ । ततः प्रविशत्युपविष्टौ वशिष्ठविश्वामित्रप-
रशुरामा इत्यत्र पूर्वांकांत एव प्रविष्टेन सुमंत्रपात्रेण शतानंदजनककथाविच्छेदे उत्तरांगमुखसूचनादंकास्यमिति । एतच्च ध-
निकमतानुसारेणोक्तं । अन्ये त्वंकावतारेणैवेदं गतार्थमित्याहुः । अपेक्षितं परित्याज्यं नीरसं वस्तुविस्तरं । यदा संदर्शयेच्छे-
षमामुखादर्शनं तदा । कार्यो विष्कंभको नाट्ये आमुखाक्षिप्तपात्रकः ॥ यथा रत्नावल्यां ॥ योगंधरायणप्रयोजितः यदा तु सरसं
वस्तु मूलादेव प्रतीयते । आदावेव तदांकस्यादामुखाक्षेपसंश्रयः । यथा शाकुंतले ॥ विष्कंभकाद्यैरपि नो वधो वाच्योधिकारि-
णः । अन्योनेन तिरोधानं न कुर्याद्रसवस्तुनोः । रसः शृंगारादिः यदुक्तं ध्वनिकेन न चातिरसतो वस्तु दूरं विच्छिन्नतां नयेत् । रसं

वानतिरोदध्मा घस्त्वलंकारलक्षणैरिति बीजं बिंदुः पताका च प्रकरी कार्यमेव च अर्थप्रकृतयः पंच ज्ञात्वा योज्या यथा
विधि अर्थप्रकृतयः प्रयोजनसिद्धिहेतवः तत्र बीजं यथा स्वल्पमात्रं समुद्दिष्टं बहुधा यद्विसर्प्पति फलस्य प्रथमो हेतुर्बी
जं तदभिधीयते ॥ यथा रत्नावल्यां ॥ वत्सराजस्य रत्नावलीप्राप्तिहेतुर्दैवानुकूल्यलालितो यौगंधरायणस्य व्यापारः यथा वा ।
वेण्यां द्रौपदीकेशसंयमनहेतु भीमसेनक्रोधोपचितो युधिष्ठिरोत्साहः अवांतरार्थविच्छेदे बिंदुरच्छेदकारणं ॥ यथा रत्ना
वल्यां ॥ मदनपूजापरिसमाप्तौ काव्यार्थविच्छेदे सति उदयमस्येंदोरिवोपवीक्षते इति सागरिका श्रुत्वा सहर्षं कथं एसो उद
अणणरिंदो इत्यादिरनंतरार्थहेतुः व्यापि प्रासंगिकं वृत्तं पताकेत्यभिधीयते ॥ यथा रामचरिते सुग्रीवादेर्वर्णनं भीमादेः ॥
शाकुंतले विदूषकस्य चरितं पताकानायकस्य स्यान्न स्वकीयफलांतरं गर्भसंधौ विमर्षे वा निर्वाहस्तस्य जायते ॥ यथा
सुग्रीवादेः राज्यप्राप्त्यादिः ॥ यत्तु मुनिनोक्तं आगर्भादाविमर्षाद्वा पताका विनिवर्त्तत इति तत्र पताकेति पताकानायकफ
लं निबंधनमपि पताकायाः प्रवृत्तिदर्शनादिति व्याख्यातमभिनवगुप्तपादैः प्रासंगिकं प्रदेशस्थं चरितं प्रकरी मता ॥ यथा
कुलपत्यंके रावणजटायुसंवादः ॥ प्रकरीनायकस्य स्यान्न स्वकीयं फलांतरं अपेक्षितं तु यत्साध्यमारंभो यन्निबंधनः स
मापन्नं तु यत्सिद्ध्यै तत्कार्यमिति संमतं यथा रामचरिते रावणवधः अवस्थाः पंच कार्यस्य प्रारब्धस्य फलार्थिनः आरंभयत्नप्रा ४४
प्त्याशा नियताप्तिफलागमाः तत्र भवेदारंभ औत्सुक्यं यन्मुख्यफलसिद्धये ॥ यथा रत्नावल्यां ॥ रत्नावल्यंतःपुरनिवेशार्थं ।

योगंधरायणस्यौत्सुक्यं । एवं नायकनायिकादीनामप्यौत्सुक्यमाकरेषु बोद्धव्यं । यत्नस्तु फलसंप्राप्तौ व्यापारोतित्वरान्वि
तः ॥ यथा रत्नावल्यां ॥ तह्वि ण त्थि अण्णो दंसणोवाओत्ति जधा तधा आलिहिअ जधासमीहिदं करइस्सं इत्यादिना प्रतिपा
दितो रत्नावल्याश्चित्रलिखनादिवत्सराजसंगमोपायः । यथा च रामचरिते समुद्रबंधनादिः । उपायापायशंकाभ्यां प्राप्त्याशा
प्राप्तिसंभवः । यथा रत्नावल्यां तृतीयेंके वेषपरिवर्त्तनाभिसरणादेः संगमोपायाद्वासवदत्तालक्षणापायशंकया वा निर्धा
रितैकांतसंगमफलप्राप्तिः प्राप्त्याशा । एवमन्यत्र । अपायाभावतः प्राप्तिस्तु निश्चिता । अपायाभावो निर्धारितैकांतफलप्राप्ति
॥ यथा रत्नावल्यां ॥ राजा देवीप्रसादनं मुक्त्वा नान्यमुपायं पश्यामि इति । देवीलक्षणापायस्य प्रसादनेन निराकरणान्नियतफ
लप्राप्तिः सूचिता । सावस्था फलयोगः स्यात् यः समग्रः फलोदयः । यथा रत्नावल्यां ॥ रत्नावलीलाभचक्रवर्त्तित्वलक्षणफ
लांतरलाभसहितः । एवमन्यत्र । यथासंख्यमवस्थाभिराभिर्योगात्तु पंचभिः । पंचधैवेतिवृत्तस्य भागाः स्युः पंचसंधयः । तल्लक्ष
णमाह । अंतरैकार्थसंबंधः संधिरेकान्वये सति । एकेन प्रयोजनेनान्वितानां कथांशानां अवांतरैकप्रयोजनसंबंधः संधिः
तद्भेदानाह । मुखप्रतिमुखे गर्भो विमर्शोपसंहृतिः । इति पंचास्य भेदाः स्युः क्रमाल्लक्षणमुच्यते । यथा निर्देशं लक्षणमाह ॥
यत्र बीजसमुत्पत्तिर्नानार्थरससंभवा । प्रारंभेण समायुक्ता तन्मुखं परिकीर्त्तितं । यथा रत्नावल्यां प्रथमेंके ॥ फलप्रधानोपा
यस्य मुखसंधिनिवेशिनः । लक्ष्यालक्ष्य इवोद्भेदो यत्र प्रतिमुखं च तत् । यथा रत्नावल्यां द्वितीयेंके वत्सराजसागरिकासमाग

साहित्यदर्पण.

४५

45

मद्देतोरनुसरणबीजस्य प्रथमांकोपक्षिप्तस्य सुसंगता विदूषकान्याज्ञायमानतया । किंचिल्लक्ष्यस्य वासवदत्तया चित्रफल
कदृष्टत्वेन किंचिदुन्नीयमानस्योद्देशरूप उद्भेदः फलप्रधानोपायस्य । प्रागुद्भिन्नस्य किंचन । गर्भो यत्र समुद्भेदो ह्रासान्वेष
णवान्मुहुः । फलगर्भीकरणाद्गर्भः ॥ यथा रत्नावल्यां द्वितीयेंके ॥ तद्वार्त्तान्वेषणाय गतः । किंचिरयति वसंतकः । इत्यन्वेषणं ।
विदूषक ही ही भोः । कोसंबीरज्जुलाहेणापि ण तारिसो पि । अविअस्स सपरितोसो जारिसो मम सआसादो पिअवअणं सुणि
अत्त विस्सम्भदि इत्यादिष्वुद्भेदः । पुनरपि वासवदत्ताप्रत्यभिज्ञया ह्रासः । पुनः सागरिकायाः संकेतस्थानगमनेऽन्वेषणं । पुनर्लता
पाशाकरणे उद्भेदः । अथ विमर्शः । यत्र मुख्यफलोपाय उद्भिन्नो गर्भतोऽधिकः । शापाद्यैः सांतरायश्च स विमर्श इति स्मृतः ॥ य
था शाकुंतले चतुर्थांकादौ ॥ अनुसूया प्रियंवदे जदवि गंधव्वविआहेण णिव्वुत्तकल्लाणा पिअसही संउंदला तहवि अणुरूव
भत्तुभाइणी संवुत्तेति णिव्वुदं मे हिअअं । इत्यतआरभ्य सप्तमांकोपक्षिप्तात् । शकुंतलाप्रत्यभिज्ञानात्प्रागर्थसंचयः । शकुं
तलाविस्मरणरूपविघ्नालिंगितः । अथ निर्वहणं ॥ बीजवंतो मुखाद्यर्था विप्रकीर्णा यथायथं । ऐकार्थ्यमुपनीयंते यत्र निर्व
हणं हि तत् ॥ यथा वेण्यां ॥ कंचुकी उपसृत्य सहर्षं महाराज दिष्ट्या वर्द्धसे । अयं खलु भीमसेनो दुर्योधनक्षतजारुणीकृतसर्वशरी
रो दुर्लक्ष्यव्यक्तिरित्यादिना द्रौपदीकेशशकुंतलाभिज्ञानाद्युक्तरोऽर्थराशिः ॥ एषामंगान्याह ॥ उपक्षेपः परिकरः परिन्यासो विलोभ
नं युक्तिः प्राप्तिः समाधानं विधानं परिभावना । उद्भेदः कारणं भेद एतान्यंगानि वै मुखे । यथोद्देशं लक्षणमाह । काव्यार्थस्य स ४५

मुत्पत्ति। रूपकोपक्षेप इति स्मृतः। काव्यार्थ इति वृत्तलक्षणप्रस्तुताभिधेयः। यथा वेण्यां लाक्षागृहानलविषान्नसभाप्रवेशैः। प्राणे
षु वित्तनिचयेषु च नः प्रहृत्य। आकृष्य पाण्डववधूपरिधानकेशान्। स्वस्था भवन्तु मयि जीवति धार्त्तराष्ट्राः। समुत्पन्नार्थबाहुल्यं
ज्ञेयः परिकरः पुनः॥ यथा तत्रैव॥ प्रवृद्धं यद्वैरं मम खलु शिशोरेव कुरुभिर्न तत्रार्यो हेतुर्न भवति किरीटी न च युवां। जरासं
धस्योरःस्थलमिव विरूढं पुनरपि क्रुधा भीमः संधिं विघटयतु यूयं घटयत। तन्निष्पत्तिः परिन्यासः। यथा तत्रैव। चंचद्भुजभ्रमि
तचंडगदाभिघातसंचूर्णितोरुयुगलस्य सुयोधनस्य। स्त्यानावनद्धघनशोणितशोणपाणि। रुत्तंसयिष्यति कचांस्तव देवि भी
मः। अत्रोपक्षेपो नाम इतिवृत्तलक्षणस्य काव्याभिधेयस्य संक्षेपेणोपक्षेपणमात्रं परिकरस्तस्यैव बहुलीकरणं। परिन्यास
स्ततोपि निश्चयापत्तिरूपतया परितो हृदये न्यसनमित्येषां भेदः। एतानि चांगानि नियमेनैव पौर्वापर्येण भवंति। अंगांतराणि त्वन्य
थापि गुणाख्यानं विलोभनं॥ यथा तत्रैव द्रौपदी॥ किं दुक्करं तुये परिक्कुविदेण। यथा। मम चंद्रकलायां चंद्रकलावर्णने सेयं ता
रुण्यस्य विलास इत्यादि। यत्तु शाकुंतलादिषु ग्रीवाभंगाभिराममुहुरनुपतति स्यंदने बद्धदृष्टिः। पश्चार्द्धेन प्रविष्टः शरपतनभ
यात् भूयसा पूर्वकायं। शष्पैरर्द्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा। पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रया
ति इत्यादि मृगादिवर्णनं। तद्बीजार्थसंबंधाभावान्न संध्यंगं। एवमंगांतराणामूह्यं। संप्रधारणमर्थानां युक्तिः॥ यथा वेण्यां सहदे
वो भीमं प्रति। आर्य किं महाराजसंदेशोयमव्युत्पन्न एवार्येण गृहीत इत्यतः प्रकृति यावद्भीमवचनं युष्मान् क्षेपयति क्रोधा।

साहित्यदर्प्पण
४६
46

शोके शत्रुकुलक्षयः। न लज्जयति दाराणां सभायां केशकर्षणं। प्राप्तिः सुखागमः।। यथा तत्रैव।। मध्नामि कौरवशतं सम-
रे न कोपाद्दुःशासनस्य रुधिरं न पिबाम्युरस्तः। संचूर्णयामि गदया न सुयोधनोरू संधिं करोतु भवतां नृपतिः पणेन। द्रौपदी श्रुत्वा
सहर्षं। णाध अस्सुदपुव्वं एदं वअणं ता पुणो पुणो भण। बीजस्यागमनं यत्तु तत्समाधानमुच्यते। यथा तत्रैव नेपथ्ये भो भो विरा-
टद्रुपदप्रभृतयः श्रूयतां। यत्सत्यव्रतभङ्गभीरुमनसा यत्नेन मंदीकृतं यद्विस्मर्तुमपीहितं शमवता शांतिं कुलस्येच्छता। तद्द्यू-
तारणिसंभृतं नृपसुताकेशाम्बराकर्षणैः क्रोधज्योतिरिदं महत्कुरुवने यौधिष्ठिरं जृंभते। अत्र स्वस्था भवंति मयि जीवतीत्या-
दिबीजस्य प्रधाननायिकाभिमतत्वेन सम्यगाहितत्वात्समाधानं। सुखदुःखकृतो योऽर्थस्तद्विधानमिति स्मृतं। यथा बालचरि-
ते। उत्साहातिशयं वत्स तव बाल्यं च पश्यतः। मम हर्षविषादाभ्यामाक्रान्तं युगपन्मनः। यथा वा। ममभ्रतावस्था। नयनयुगासे-
चनकमित्यादि। कृतद्दलोद्भवा वाचः शोकाश्च परिभावना।। यथा वेण्यां।। युद्धं स्यान्नवेति संशयाना तूर्यशब्दानंतरं णाध किं
दाणिं। एसो पलअजलदत्थणिदमंथरो खणे समरदुंदुभी ताडीअदि। बीजार्थस्य प्ररोहः स्यादुद्भेदः। यथा त्रैव द्रौपदी। ण-
ध पुणो वि तुमए मम समस्सासइदव्वा। भीमः भूयः परिभवक्लान्तिलज्जाविधुरितानन्तं। अनिःशेषितकौरव्यं न पश्यसि वृकोदरं।
करणं मतं। प्रकृतार्थसमारंभः।। यथा तत्रैव।। देवि गच्छामो वयमिदानीं कुरुकुलक्षयायेति। खेदः संतप्तिखेदनं।। यथा तत्र- ४६
व।। अत एवाद्यप्रभृति भिन्नो दंष्ट्रवज्ञः। केचित्तु खेदः श्रोत्साहनेति वदंति। विलासः परिसर्पश्च विधूतं तापनं तथा। नर्मनर्म-

द्युतिश्चैव तथा प्रागमणं पुनः। विरोधश्च प्रतिमुखे तस्याथात्पर्युपासनं पुष्पं वज्रमुपन्यासो वर्णसंहार इत्यपि तत्र समी
हा रतिर्भोगार्था विलास इति कथ्यते रतिलक्षणस्तावत्स्थायी तद्धेतुभूतो भोगो विषयः प्रमदा पुरुषो वा तदर्था समीहा विला
सः॥ यथा शाकुन्तले॥ कामं प्रिया न सुलभा मनस्तु तद्भावदर्शनायासि। अकृतार्थेपि मनसिजे रतिमुभयप्रार्थना कुरुते
दृष्टनष्टानुसरणं परिसर्पश्च कथ्यते यथा शाकुन्तले राजा भवितव्यमत्र तया॥ तथाहि॥ अभ्युन्नता पुरस्तादवगाढा जघ
नगौरवात्पश्चा दवगाढा जघनगौरवात्पश्चात् द्वारेस्य पांडुसिकते पदपङ्क्तिर्दृश्यतेभिनवा कृतस्यानुनयस्यादौ विधूतं
त्वपरिग्रहः॥ यथा तत्रैव॥ अलं वो अन्तेउरविरहपज्जुस्सुएण राएसिणा उवरुद्धेण। केचित्तु विधूतं स्यादरतिरिति वदंति उ
पायादर्शनं यत्तु तापनं नाम तद्भवेत् यथा रत्नावल्यां सागरिका दुल्लहजणाणुराउ लज्जा गरुई परवसो अप्पा पिअस
हि विसमं पेम्मं मरणं सरणं णवरि एक्कं परिहासवचो नर्म॥ यथा रत्नावल्यां॥ सुसंगता अयि अत्तए संकिदे चित्तफलदस्स
धृतिस्तु परिहासजा नर्मद्युतिः॥ यथा तत्रैव सुसंगता॥ अदक्खिणा दाणिं सि तुमं जा एव्वं भट्टिणा हत्थावलंबिता कोवं ण मुं
चसि सागरिका सभ्रूभंगमीषद्विहस्य सुसंगदे दाणिं ण विरमसि केचित्तु दोषस्याच्छादनं हास्यं नर्मद्युतिरिति वदंति प्रग
मणं वाक्यं स्यादुत्तरोत्तरं यथा विक्रमोर्वश्यां उर्वसी जअदु महाराओ राजा मया नाम जितं यस्य त्वया यं समुदीर्यते जय
शब्दः सहस्राक्षादागतः पुरुषान्तरे इत्यादि विरोधो व्यसनप्राप्तिः॥ यथा चंडकौशिके॥ राजा नूनमसमीक्ष्यकारिणा मयांधेन

चस्फुरच्छिखाकलापोज्ज्वलनः। पञ्चासमाक्रान्तः कृतस्यानुनयः पुनः स्यात्पर्युपासनं ॥ यथा रत्नावल्यां ॥ विदूषकः। भोम
कुप्पए मा दि। कदलीघरंगदेत्यादि। उपन्यविशेषवचनं मतं। यथा तत्रैव राजा दत्तेत्य गृहीत्वा स्पर्शं नाटयति विदूषकः। भोव
अस्स एसा अउव्वा सिरी तुए समासादिदा। राजा वयस्य सत्यं। श्रीरेषा पाणिरप्यस्याः पारिजातस्य पल्लवः। कुतोऽन्यथा पतत्ये
ष स्वेदच्छद्मामृतद्रवः। इत्यन्तं निष्ठुरं वचः ॥ यथा तत्रैव ॥ राजा कथमिदं स्वोदन्तं त्वया ज्ञातः। सुसंगता एकेवलं तुमं समं चि
त्तफलएण ता जाव गदुअ देवीए णिवेदइस्सं। उपन्यासः प्रसादनं ॥ यथा तत्रैव ॥ सुसंगता भट्टा अलं संकाए मए वि भट्टिदि
णो पसादेण कीलिदं ज्जेव्व ता किं एदेहिं कण्णाभरणेहिं। अदो वि मे गरुओ पसाओ एसो जं की सत्तुए अहं दुआलिहिदत्ति। कुपि
आ मे पिअसही सा अरिआ एसा। जो इप्पसादीअदु। केचित्तु उपपत्तिकृतो योऽर्थ उपन्यासः स कीर्तितः इति वदन्ति ॥ यथा तत्रैव
अदिमुहरा खु गब्भदासी ति। चातुर्वर्ण्योपगमनं। वर्णसंहार इष्यते ॥ यथा वीरचरिते तृतीयेऽङ्के ॥ परिषदियमृषीणामेष वी
रो युधाजित्सम। नृपतिरमात्यैर्लोमपादश्च वृद्धः। अयमविरतयज्ञो ब्रह्मवादी पुराणः। प्रभुरपि जनकानामद्रुहो याचक
स्ते। इत्यत्र ऋषिक्षत्रादीनां मुनीनां मेलनं। अभिनवगुप्तपादास्तु वर्णशब्देन पात्राण्युपलक्ष्यन्ते। संहारो नाम मेलनमिति व्याच =
क्षते उदाहरन्ति च ॥ रत्नावल्यां द्वितीयेऽङ्के ॥ अदो वि मे अअं गुरु उपसादो इत्यादेरारभ्य एणं हत्थे गेह्निअ पसादेहि णं राजा। क्वा ४७
सौ क्वासावित्यादि ॥ अथ गर्भाङ्गानि ॥ अभूताहरणं मार्गो रूपोदाहरणे क्रमः। संग्रहश्चानुमानं च प्रार्थनाक्षिप्तिरेव च। त्रोट

काधिबलोद्वेगा। गर्तैस्तु र्विद्वस्तथा। तत्र व्याजाश्रयं वाक्यं मन्तृतादरणं मतं ॥ यथा ॥ अश्वत्थामा हत इति पृथासूनुना
स्पष्टमुक्त्वा स्वैरं शेते गज इति पुनर्व्याहृतं सत्यवाक्यात्। तच्छ्रुत्वासौ दयिततनयः प्रत्ययात्तस्य राज्ञः। शस्त्राण्याजौ नयनस
लिलं चापि तुल्यमुमोच। तत्त्वार्थकथनं मार्गः। यथा च ॥ कौशिके राजा ॥ भगवन् गृह्यतामर्जितमिदं भार्यातनयविक्रमात्
शेषस्यार्थे करिष्यामि चंडालेष्वात्मविक्रयं। रूपं वाक्यं वितर्कवत् ॥ यथा रत्नावल्यां ॥ राजा। मनः प्रकृत्यैव चलं दुर्लक्ष्यं च त
थापि मे। कामेनैतत्कथं विद्धं समं सर्वैः शिलीमुखैः। उदाहरणमुत्कर्षयुक्तं वचनमुच्यते ॥ यथाश्वत्थामांके ॥ यो यः शस्त्रं
बिभर्ति स्वभुजगुरुमदः पांडवीनां चमूनां। यो यः पांचालगोत्रे शिशुरधिकवया गर्भशय्यां गतो वा। यो यो यस्तत्कर्मसाक्षी
चरति मयि रणे। यश्च यश्च प्रतीपः क्रोधान्धस्तस्य तस्य स्वयमिह जगतामंतकस्यांतकोहं। भावतत्त्वोपलब्धिस्तु क्रमः स्यात् ॥ य
थाशाकुंतले ॥ स्थाने खलु विस्मृतनिमेषेण। चक्षुषा प्रियामवलोकयामि ॥ तथा हि ॥ उन्नमितैकभ्रूलतमाननमस्याः। पदानि रच
यंत्याः। पुलकांचितेन कथयति मय्यनुरागं कपोलेन। संग्रहः पुनः। सामदानार्थसंपन्नः ॥ यथा रत्नावल्यां ॥ राजा। साधु वयस्य
इदं ते पारितोषिकमिति कटकं ददाति। लिंगादूहोनुमानता। यथा। जानकीराघवे रामः। लीलागतैरपि तरंगयतो धरित्रीं। मा
लोकनैर्नमयतो जगतां शिरांसि। तस्यानुमानयति कांचनकांतिगौरकायस्य सूर्यतनयत्वमधृष्यतां च। रतिहर्षोत्सवानां
तु प्रार्थनं प्रार्थना भवेत् ॥ यथा रत्नावल्यां ॥ प्रिये सागरिके। शीतांशुर्मुखमुत्पले तव दृशौ पद्मानुकारौ करौ। रंभास्तंभनिभं त

साहित्यदर्पण ४८ 48

वोरुयुगलं बाहू मृणालोपमौ । इत्याह्लादकराखिलाङ्गि रभसान्निःशङ्कमालिङ्ग्य मामङ्गानि त्वमनङ्गतापविधुराण्येह्येहि
निर्वापय ॥६४॥ इदं प्रार्थनाख्यमङ्गं यन्मते निर्वहणे भूतावसरत्वात्तावात् प्रशस्तिर्नामाङ्गं नास्ति । तन्मतानुसारेणोक्तं । अन्य
थाङ्गानां पञ्चषष्टिसंख्यत्वप्रसङ्गात् । रहस्यार्थस्य तु भेदः क्षिप्तिः स्यात् ॥ यथास्त्वत्यामांके ॥ एकस्य च विपाकोऽयं दारुणो नु वि-
र्त्तते । केशग्रहे द्वितीयेऽस्मिन् नूनं निःशेषिताः प्रजाः । त्रोटकं पुनः संरब्धवाक् ॥ यथा चण्डकौशिके ॥ कौ० आः पुनः कथमद्यापि
न संभृतानि दक्षिणासुवर्णानि । अधिबल मतिसंधिः छलेनयः ॥ यथा रत्नावल्यां ॥ काञ्चनमाला । भट्टिणि इअं सा चित्तसालिआ
वसंतस्स सण्णं करेमीत्यादि । नृपादिजनिता भीतिरुद्वेगः परिकीर्त्तितः ॥ यथा वेण्यां ॥ प्राप्तावेकरथारूढौ पृच्छन्तौ त्वामितस्ततः ॥
यथा । स कर्णारिः स च क्रूरो वृककर्मा वृकोदरः । शङ्कात्यत्रासकृतः संभ्रमो विद्रवो मतः । यथा ॥ कालान्तककरालास्यं क्रोधोद्भू-
तं दशाननं । विलोक्य वानरानीके संभ्रमः कोप्यजायत । अथ विमर्शाङ्गानि । अपवादोऽथ संफेटो व्यवसायो द्रवो द्युतिः । शक्तिः
प्रसङ्गखेदश्च प्रतिषेधो विरोधनं । प्ररोचना विमर्शे स्यादादानं छादनं तथा । दोषप्रख्यापवादः स्यात् । यथा वेण्यां युधिष्ठिरः । पा-
ञ्चालक कच्चिदासादिता तस्य दुरात्मनः । कौरवापसदस्य पदवी पाञ्चालः । न केवलं पदवी । स एव दुरात्मा देवीकेशपाशस्प-
र्शपातकप्रधानहेतुरुपलब्धः । संफेटो रोषभाषणं ॥ यथा तत्रैव ॥ राजा । अरे रे मरुत्तनय वृद्धस्य राज्ञः पुरतो निन्दितमप्यात्मक- ४८
र्मश्लाघसे शृणु रे । कृष्टा केशेषु भार्या तव तव च पशोस्तस्य राज्ञस्तयोर्वा । प्रत्यक्षं भूपतीनां मम भुवनपते राज्ञया द्यूतदासी ॥

तस्मिन्वैरानुबंधे वद किमपकृतं तैर्हता ये नरेंद्रा । बाह्वोर्वीर्यातिसारद्रविणगुरुमदं मामजित्वैव दर्प्यः । भीमः सक्रोधं आः ।
पापराजापथ्याः पापेत्यादि व्यवसायश्च विज्ञेयः प्रतिज्ञाहेतुसंभवः । यथा तत्रैव भीमः । निहताशेषकौरव्यः क्षीबो दुःशासना
सृजा ॥ भंक्ता सुयोधनस्योर्वोर्भीमोयं शिरसा नतः । द्रवो गुरुव्यतिक्रांतिः शोकरोगादिसंभवा ॥ यथा तत्रैव ॥ युधिष्ठिरः । भग
वन्कृष्णाग्रज सुभद्राभ्रातः ज्ञातिप्रीतिर्मनसि न कृता क्षत्रियाणां न धर्मो रूढं सख्यं तदपि गणितं नानुजस्यार्जुनेन तुल्यः । का
मं यदपि भवतः शिष्ययोः स्नेहबंधः । कोयं पंथा यदसि विमुखो मंदभाग्ये मयीत्थं । तर्जनोद्वेजने प्रोक्ता द्युतिः । यथा तत्रैव दुर्यो
धनं प्रति भीमेनोक्तं । जन्मेंदोर्विमले कुले व्यपदिशस्यद्यापि धत्से गदां । मां दुःशासनकोष्णशोणितमधुक्षीबं रिपुं भाषसे । द
र्पांधो मधुकैटभद्विषि हरावप्युद्धतं चेष्टसे । त्रासान्मे नृपशो विहाय समरं पंकेधुना लीयसे । शक्तिः पुनर्भवेत्विरोधस्य
प्रशमनं ॥ यथा तत्रैव ॥ कुर्वंत्वाप्ता हतानां रणशिरसि नरा । वह्निसाद्देहभारा । नश्रून्मिश्रं कथंचिद्ददतु जलममी । बांधवा
बांधवेभ्यः । मार्गंतां ज्ञातिदेहान्हतनरगहने खंडितान्गृध्रकंकैरस्तं भास्वान्प्रयातः सह रिपुभिरयं संह्रियंतां बलानि
प्रसंगो गुरुकीर्तनं । यथा मृच्छकटिकायां चांडालकः ॥ एसो सागलदत्तस्स ॥ सुओ अज्ज विणअदत्तस्स णत्तिओ चारुदत्तो
वावादिदुं वज्झट्ठाणं णिज्जदि । एदेण किर गणिआ वसंतसेणा सुवण्णलोहेण वावादिदत्ति ॥ चारुदत्तः ॥ मखशतपरिपूतं गोत्र
मुद्भासितं यत्सदसि निविडचैत्यब्रह्मघोषैः पुरस्तात् । मम निधनदशायां वर्तमानस्य पापैस्तदसदृशमनुष्यैर्घुष्यते घोषणा

यं। इत्यनेनचारुदत्ताभ्युदयानुकूलप्रसंगेनगुरुकीर्त्तनप्रसंगः। मनश्चेष्टासमुत्पन्नःश्रमःखेदइतिस्मृतः। मनःसमुत्प
न्नोयथामालतीमाधवे॥ दलतिहृदयंगाढोद्वेगंद्विधातुनभिद्यते वहतिविकलःकायोमोहंनमुंचतिचेतनां ज्वलयतित
नूमंतर्दाहःकरोतिनभस्मसात्प्रहरतिविधिर्मर्मच्छेदीनकृंततिजीवितं। एवंचेष्टासमुत्पन्नोपि। ईप्सितार्थप्रतीघातःप्रतिषेध
इतीष्यते॥ यथाममप्रभावत्यांविदूषकंप्रतिप्रद्युम्नः॥ सखेकथमिदंत्वमेकाकीवर्त्तसे। क्वपुनःप्रियसखीजनानुगम्यमा
नामेप्रियतमाप्रभावती। विदूषकः। असुरवइणाआअरियकहिंपिणीदा। प्रद्युम्नः। दीर्घंनिःश्वस्य। हापूर्णचंद्रमुखिमत्तचको
रनेत्रे मामानतांगिपरिहायगतासिकुत्र। गच्छत्वमद्यननुजीविततूर्णमेव दैवंकदर्थनपरंकृतकृत्यमस्तु। कार्यात्ययोपग
मनंविरोधनमितिस्मृतं। यथावेणींपाद्युधिष्ठिरः। तीर्णेभीष्ममहोदधौ कथमपिद्रोणानलेनिर्वृते कर्णाशीविषभोगिनिप्रश
मितेशल्येचयातेदिवं भीमेनप्रियसाहसेनरभसादल्पावशेषेजये सर्वेजीवितसंशयंवयममीवाचासमारोपिताः। प्र
रोचनातुविज्ञेयासंहारार्थप्रदर्शिनी॥ यथावेणींपांचालकः॥ अहंदेवेनचक्रपाणिना। इत्युपक्रम्यकृतंसंदेहेन पूर्यंतां
सलिलेनरत्नकलशाराज्याभिषेकायतेकृष्णात्यंतचिरोज्झितेतुकबरीबंधेकरोतुक्षणं। रामेशातकुठारभासुरकरेक्षत्र
द्रुमोच्छेदिनि क्रोधांधेचवृकोदरेपरिपतत्याजौकृतःसंशयः। कार्यसंग्रहआदानं॥ यथावेणींपा॥ भोभोस्यमंतपंचकसंचा ८७
रिणः। नाहंरक्षोनभूतोरिपुरुधिरजलाप्लावितांगःप्रकामं निस्तीर्णोरुप्रतिज्ञाजलनिधिगहनःक्रोधनःक्षत्रियोस्मि भोभो

म राजन्यवीराः समरशिखिशिखाभुक्तशेषाः कृतं वस्त्रासेनानेन लीनैर्हतकरितुरगान्तर्हितैरास्यते यत्॥ अत्र समस्तरि-
पुवधकार्यस्य समुद्दीतत्वादादानं॥ तदाङ्गः छादनं पुनः कार्यार्थमपमानादेः सहनं खलु यज्ञवेत्॥ यथा तत्रैव॥ अर्जुनः
आर्य। अप्रियाणि करोत्येष वाचा शक्तो न कर्मणा। हतभ्रातृशतो दुःखी प्रलापैरस्य का व्यथा॥ अथ निर्वहणाङ्गानि॥ सं-
धिर्विबोधो ग्रथनं निर्णयः परिभाषणं। कृतिः प्रसाद आनन्दः समयो ह्युपगूहनं। भाषणं पूर्ववाक्यं च काव्यसंहार एव च। प्रश-
स्तिरिति संहारे ज्ञेयान्यङ्गानि नामतः। तत्र बीजोपगमनं संधिः॥ यथा वेण्यां॥ भवति यज्ञवेदिसंभवे स्मरति भवती यन्मयो-
क्तं चञ्चद्भुजेत्यादि। अनेन मुखे प्रक्षिप्तबीजस्य पुनरुपगमनमिति संधिः। विबोधः कार्यमार्गणं॥ यथा तत्रैव भीमः॥ मुञ्चतु मा-
मार्यः क्षणमेकं युधिष्ठिरः। किमपरमवशिष्टं भीमः। महदवशिष्टं संयमयामि तावदनेन दुःशासनशोणितोक्षितेन पाणि-
ना पाञ्चाल्या दुःशासनावकृष्टं केशहस्तं युधिष्ठिरः। गच्छतु भवाननुभवतु तपस्विनी वेणीसंहारमित्यनेन केशसंयमका-
र्यस्यान्वेषणाद्विबोधः। उपन्यासस्तु कार्याणां ग्रथनं॥ यथा तत्रैव भीमः॥ पाञ्चालि न खलु मयि जीवति संहर्तव्या दुःशासन-
विलुलिता वेणिरात्मपाणिभ्यां तिष्ठ स्वयमेवाहं संहरामीत्यनेन कार्यस्योपक्षेपणाद्ग्रथनं॥ निर्णयः पुनः अनुभूतार्थक-
थनं॥ यथा तत्रैव॥ भीमः देव २ अजातशत्रो अद्यापि दुर्योधनहतकः मया हि तस्य दुरात्मनः। भूमौ क्षिप्तं शरीरं कुरुकु-
लमनुजा दग्धमेतद्रणाग्नौ नामैकं यद्ब्रवीषि क्षितिप तदधुना धार्तराष्ट्रस्य शेषं वदन्ति परिभाषणं परिवादकृतं वाक्यं॥

M.S # 237

सा॰दर्प्प॰ ॥यथा शाकुन्तले॥ राजा। आर्ये। अथ सा तत्रभवती किमाख्यस्य राजर्षेः पत्नी। तापसी। को तस्स धम्मदारपरिच्चाइणो णामं पि
५० गेण्हिदि। इच्छानुगमनं कृतिः॥ यथा वेण्यां॥ कृष्णा। एते भगवंतो व्यासवाल्मीकाप्रादिना निषेकमंगलैः। स्थिरीकरणं कृतिः
50 शुश्रूषादिप्रसादः स्यात्॥ तत्रैव यथा॥ भीमेन द्रौपद्याः केशसंयमनं आनंदो वांछितागमः॥ यथा तत्रैव द्रौपदी॥ वेसुमरिदं
एवं ख्खावारं देवस्स। एसा एस गुणो च्चिरिक्खस्सं। समयो दुःखनिर्यातनं॥ यथा रत्नावल्यां॥ वासवदत्ता। रत्नावलीमालिंग्य। स
मालस विहिणिए। एतद्भवेदुपगूहनं। यत्स्यादद्भुतसंप्राप्तिः। यथा मम प्रभावत्यां नारददर्शनात् प्रद्युम्नः। ऊर्ध्वमवलोक्य। द
धद्विद्युल्लेखामिव कुसुममालां परिमलभ्रमद्भृंगश्रेणिध्वनिभिरुपगीतां। तत इतः। दिगंतं ज्योत्स्नाभिस्तु दिनकरं गौरैः शाव
लयन्नितः। कैलासाद्रिः पतति वियतः किं त्विदं नरेंद्रं। सामदानादिभाषणं। यथा चंडकौशिके॥ धर्मः तदेहि धर्मलोकमधितिष्ठ
। सर्ववाक्यं तु विज्ञेयं। यथोक्तार्थोपदर्शनं॥ यथा वेण्यां॥ भीमः। बुद्धिमतिके क्कसा सा भानुमती परिभवतु संप्रति पांडवान्। वर
प्रदानसंप्राप्तिः काव्यसंहार इष्यते। यथा सर्वत्र। किं ते भूयः प्रियमुपकरोमि। नृपदेशादिशांतिस्तु प्रशस्तिरभिधीयते। य
था मम प्रभावत्यां॥ ६७॥ राजानं सुतनिर्विशेषमधुना पश्यंतु नित्यं प्रजा। जीयासुः सदसद्विवेकपटवः संतो गुणग्राहिणः।
सम्यक् सस्यसमृद्धयः समधिकाः संतु क्ष्मामंडले। भूयादव्यभिचारिणी त्रिजगतो भक्तिश्च नारायणे। अत्र चोपसंहारप्रश ५० ७९
स्योरंत एकेन क्रमेणैव स्थितिः। इदं च मुखसंधावुपक्षेपपरिकरपरिन्यासयुक्त्युद्भेदसमाधानानां प्रतिमुखे च परिसर्पा।

ऽगमनं एवं चोपन्यासयुक्तानां गर्भे त्वभूताहरणमार्गतोटकाधिबलाक्षेपाणां विमर्शे त्वपवादशक्तिव्यवसायप्ररोचना
दानानां प्राधान्यमन्येषां यथासंभवं स्थितिरिति केचित् चतुःषष्टिविधं ह्येतदङ्गं प्रोक्तं मनीषिभिः कुर्यादनियते तस्य संध्य
वपि निवेशनं रसानुगुणतां वीक्ष्य रसस्यैव हि मुख्यता यथा वेणीसंहारे तृतीयेंके दुर्योधनकर्णयोर्महत्संप्रधारणं एव
मन्यदपि यत्तु रुद्रटादिभिर्नियमः एव तूक्तं तल्लक्ष्यविरुद्धं इष्टार्थरचनाश्चर्यलाभो वृत्तान्तविस्तरः रागप्राप्तिः प्रयोगस्य गो
प्यानां गोपनं तथा प्रकाशनं प्रकाश्यानां अङ्गानां षड्विधं फलं अङ्गहीनो नरो यद्वन्नैवारंभक्षमो भवेत् अङ्गहीनं तथा का
व्यं न प्रयोगाय युज्यते संपादयेतां संध्यङ्गं नायकप्रतिनायकौ तदभावे पताकाद्या स्तदभावे तथेतरत् प्रायेण प्रधान
पुरुषयोज्यानि संध्यङ्गानि भवन्ति किंतूपक्षेपाद्यङ्गत्रयं बीजस्याल्पमात्रसमुद्दिष्टत्वादप्रधानपुरुषसंयोजितमेव सा
धु रसव्यक्तिमपेक्ष्यैषामङ्गानां संनिवेशनं न तु केवलया शास्त्रस्थितिसंपादनेच्छया ॥ तथा च वेण्यां ॥ दुर्योधनस्य भानु
मत्या सह विप्रलंभो दर्शितः स्तादृगवसरेऽत्यन्तमनुचितं अविरुद्धं तु यद्वृत्तं रसादिव्यक्तयेऽधिकं तदप्यन्यथयेद्धीमान्न व
देद्वा कदाचन अनयोरुदाहरणं सत्संबंधेष्वपि व्यक्तमेव ॥ अथ वृत्तयः ॥ शृङ्गारे कैशिकी वीरे सात्त्वत्यारभटी पुनः रसे रौ
द्रे च बीभत्से वृत्तिः सर्वत्र भारती चतस्रो वृत्तयो ह्येताः सर्वनाट्यस्य मातृकाः स्युर्नायकादिव्यापारविशेषा नाटकादिषु त
त्र कैशिकी ॥ या श्लक्ष्णनेपथ्यविधानचित्रा स्त्रीसंकुला पुष्कलनृत्यगीता कामोपभोगप्रभवोपचारा सा कैशिकी चारुवि

साहित्यदर्प
५१

लासयुक्ता। नर्मचनर्मस्फूर्जो नर्मस्फोटश्चनर्मगर्भश्च चत्वार्यंगान्यस्याः तत्रवैदग्ध्यक्रीडितंनर्म इष्टजनावर्जनकृत्
श्चापित्रिविधंस्मृतं विहितंशुद्धहास्येन सश्रृंगाररसेनच तत्रकेवलहास्येनविहितं। यथारत्नावल्यांवासवदत्ता। फलक
मुद्दिश्यसहासं एसाविअवरावतवसमीवे जालिहिदा एदंअज्जसंतस्सविसाणं सश्रृंगारहास्येनयथा शाकुंतलेराजा
नंप्रतिशाकुंतला असंतुट्ठेणकिंकरिस्सदिराजा इदमितिव्यवसितोवक्त्रंढौकते सभयहास्येनयथारत्नावल्यां आले
ख्यदर्शनावसरे सुसंगता जाणिदोमएएसो वुत्तंतोसमंचित्तफलएण तादेवीएगदुअ णिवेदइस्सं एतद्वाक्यसंबंधिनर्मो
द्भूतं एवंवेषचेष्टासंबंधष्यपि नर्मस्फूर्जः सुखारंभोभयांतोनवसंगमः यथामालविकायांसंकेतनायकमभिसृतायां
नायकायांनायकः विसृजसुंदरिसंगमसाद्धसं ननुचिरात्प्रभृतिप्रणयोन्मुखे परिगृहाणगतेसहकारतां त्वमतिमुक्त
लताचरितंमयि मालविका भट्टादेवीएभएणअप्पणो विपिअंकाउणपरिमिइत्यादि अथनर्मस्फोटः नर्मस्फोटोभाव
लेशैः सूचितात्पल्परसोमतः। यथामालत्यां। गमनमलसंशून्यादृष्टिः शरीरमसौष्ठवंश्वसितमधिकं किंत्वेतत्स्यात्किम
न्यदितोथवा भ्रमतिभुवनेकंदर्पाज्ञाविकारिचयौवनं ललितमधुरास्तेतेभावाः क्षिपंतिचधीरतां अलसगमनादिभि
र्भावलेशैर्माधवस्यमालत्यामनुरागस्तोकः प्रदर्शितः नर्मगर्भोव्यवहृतिर्नेतुः प्रच्छन्नवर्तिनः यथातत्रैवसखीरूपधारि ५१
णामाधवेनमालत्यामरणव्यवसायवारणं। अथसात्वती। सात्वतीबहुलायामशौर्यत्यागदयार्ज्जवैः सहर्षाक्षुद्रश्रृंगा

रविशोकासाद्भुतामता। उत्थापकोथसंघात्यःसंलापपरिवर्त्तकः। विशेषाइतिचत्वारःसात्वत्याःपरिकीर्त्तिताः। उत्ते
जनकरीशत्रोर्वागुत्थापकउच्यते। यथावीरचरिते। आनंदायचविस्मयायचमयादृष्टासिदुःखायवा वैतृष्ण्यात्तुकुतोद्य
सङ्गतिममत्वद्दर्शनेचक्षुषः यन्मागल्पसुखस्यनास्यविषयःकिंवाबहुव्याहृते रस्मिन्नविश्रुतजामदग्न्यविजयेबाहौध
नुर्जृम्भतां मंत्रार्थदेवशक्त्यादेःसंघात्यःसंघभेदने मंत्रशक्त्यायथा मुद्राराक्षसेसहायानां चाणक्येनस्वबुद्ध्याभेदनं अ
र्थशक्त्यापितत्रैव देवशक्त्या। यथारामायणेरावणाद्विभीषणस्यभेदः। संलापःस्याद्गभीरोक्तिर्नानाभावसमाश्रया। य
थावीरचरिते रामः। अयंसयःकिलसपरिवारकार्त्तिकेयविजयावर्जितेनभगवतानीललोहितेनपरिवत्सरसहस्रांते
वासिनेतुभ्यंप्रसादीकृतःपरशुः परशुरामः आर्य्यदाशरथेसएवायमार्यपादानांप्रियःपरशुरित्यादिप्रारब्धादन्यकार्य्या
णांकरणंपरिवर्त्तकः। यथावेण्यांभीमः। सहदेवगच्छत्वं गुरुमनुवर्तस्वाहमप्यस्त्रागारं प्रविश्यायुधसहायोभवामीति
यावत् अथवा आमंत्रयितव्यैव मयापांचालीति। अथारभटी। मायेंद्रजालसंग्रामःक्रोधोद्भ्रांतादिचेष्टितैः संयुक्तावध
बंधाद्यैरुद्धतारभटीमता। वस्तूत्थापनसंफेटौसंक्षिप्तिरवपातनं इतिभेदास्तुचत्वारआरभट्याःप्रकीर्त्तिता मायाद्युत्था
पितंवस्तु वस्तूत्थापनमुच्यते। यथोदात्तराघवे। जीयंतेजयिनोनिशांततिमिरव्रातैर्वियद्व्यापिभि र्भास्वंतःसकलारवे
रपिकराःकस्मादकस्मादपि एताश्चोग्रकबंधकंठरुधिरै राध्मायमानोदरा मुंचंत्याननकंदरानलमुचस्तीव्रान्रवान्फे

रवाः इत्यादि। संफेटस्तु समाघातः क्रुद्धसत्वरयोर्द्वयोः॥ यथा मालत्यां॥ माधवाघोरघंटयोः। संक्षिप्ता वस्तुरचना शिल्पैरितर
थापि वा। संक्षिप्तिः स्यान्निवृत्तौ च नेतुर्नेत्रन्तरग्रहः॥ आद्यं यथा॥ उदयनचरिते कलिंगहस्तिप्रयोगः। द्वितीयं यथा। वालिनिवृ
त्त्या सुग्रीवः। यथा वा परशुरामस्यौद्धत्यनिवृत्त्या शान्तत्वापादानं पुण्या ब्राह्मणजातिरिति। प्रवेशत्रासनिःक्रान्तिहर्षविद्रवसंभवं
अवपातनमित्युक्तं॥ यथा कृत्यारावणे षष्ठेऽङ्के॥ प्रविश्य खड्गहस्तः पुरुषः इत्यतः प्रवृत्ति निःक्रमणपर्यंतस्सर्वेष्वङ्केषु वक्तारती
॥अथ नाट्योक्तयः॥ अश्राव्यं खलु यद्वस्तु तदिह स्वगतं मतं। सर्वश्राव्यं प्रकाशं स्यात्तद्भवेदपवारितं। रहस्यं तु यदन्यस्य परावृ
त्य प्रकाश्यते। त्रिपताकाकरेणान्यमपवार्यान्तरा कथा। अन्योन्यामन्त्रणं यत्स्याज्जनान्ते तज्जनान्तिकं। किं ब्रवीषीति यन्नाट्ये
विना पात्रं प्रयुज्यते। श्रुत्वेवानुक्तमप्यर्थं तत्स्यादाकाशभाषितं। यः कश्चिदर्थो यस्माद्गोपनीयस्तस्यान्तरित ऊर्ध्वाङ्गुलिनता
नामिकं त्रिपताकालक्षणं करं कृत्वा येन सह यन्मन्त्र्यते तज्जनान्तिकं। परिवृत्यान्यस्य रहस्यकथनमपवारितं। शेषं स्पष्टं
दत्तां सिद्धां च सेनां च वेश्यानां नाम दर्शयेत्। दत्तप्राया वणिजां चेटचेट्योस्तथा पुनः। वसन्तादिषु वर्ण्यस्य वस्तुनो नाम यद्
भवेत्॥ वेश्या यथा॥ वसन्तसेनादिः। वणिग् विष्णुदत्तादिः। चेटः कलहंसकादिः। चेटी मन्दारकादिः। नाम कुर्यान्नाटकस्य गर्भि
तार्थप्रकाशकं॥ यथा रामाभ्युदयः॥ नायिकानायिकाख्यानात्संज्ञा प्रकरणादिषु॥ मालतीमाधवादि॥ नाटिकासट्टकादी ५२
नां नायिकाभिर्विशेषणं। यथा रत्नावलीकर्पूरमंजर्यादि। प्रायेण ण्यन्तकः साधिर्गमेः स्थाने प्रयुज्यते॥ यथा शाकुन्तले॥ कृषी

भगच्छावइत्यर्थेसाधयावस्तावत् । राजास्वामीतिदेवेतिभृत्यैर्भट्टेतिचाधमैः । राजर्षिभिर्वयस्येति । तथाविदूषकेणच । रा
जन्नितृषिभिर्वाच्यःसोपत्यप्रत्ययेनच । स्वेछयानामभिर्विप्रै । विप्रआर्येतिचेतरैः । वयस्येत्यथवानाम्नावाच्योराज्ञाविदूष
कः । वाच्यौनटीसूत्रधारा । वार्यनाम्नापरस्परं । सूत्रधारंवदेद्भावइतिवैपारिपार्श्वकः । तंसूत्रधारंमार्षेति । हंहेइत्यधमैःसमाः
वयस्येत्युत्तमैर्वाच्यो । मध्यैरार्येतिनायकः । भगवन्नितिवक्तव्याःसर्वेदेवर्षिलिंगिनः । वदेद्राज्ञींचचेटींच । भवतीतिविदूषकः ।
आयुष्मन्रथिनंसूतंवृद्धंतातेतिचेतरः । वत्सपुत्रकजातेति । नाम्नागोत्रेणवासुतः । शिष्यानुजश्चवक्तव्योऽमात्यआर्येतिचा
धमैः । विप्रैरयममात्येति । सचिवेतिचनएपते । साधोइतितपस्वीच । प्रशांतश्चोच्यतेपरैः । सुगृहीताभिधःपूज्यः । शिष्याद्यैर्वि
नगद्यते । उपाध्यायेतिचाचार्यो । महाराजेतिभूपतिः । स्वामीतियुवराजस्तु । कुमारोभर्तृदारकः । सौम्यभद्रमुखेत्येव । मधमै
स्तुकुमारकः । वाच्याप्रकृतिभीराज्ञःकुमारीभर्तृदारिका । पतिर्यथातथावाच्याज्येष्ठमध्याधमैःस्त्रियः । हलेतिसदृशीप्रेष्या
हंजेवेश्याज्जुकातथा । कुट्टन्यंवेत्यनुगतैःपूज्यावाजरतीजनैः । आमंत्रणैश्चपाखंडावाच्याःस्वसमयागतैः । शकादयश्चसंभा
ष्याभद्रदत्तादिनामभिः । यस्ययत्कर्मशिल्पंवा । विद्यावाजातिरेववा । तेनैवनाम्नावाच्योसौ । ज्ञेयाश्चान्येयथोचितं ॥ अथभा
षाविभागः ॥ पुरुषाणामनीचानां । संस्कृतंसंस्कृतात्मनां । सौरसेनीप्रयोक्तव्या । तादृशीनांचयोषितां । आसामेवतुगाथासु
महाराष्ट्रींप्रयोजयेत् । अत्रोक्तामागधीभाषाराजांतःपुरचारिणां । चेटानांराजपुत्राणां । श्रेष्ठानांचार्द्धमागधी । वाच्याविदूषका

साहित्यदर्पण॰ ५३ 53

दीनां धूर्तानां स्यादवंतिका। योधनागरकादीनां दाक्षिणात्या हि दीव्यतां। शकाराणां शकादीनां शाकरीं संप्रयोजयेत्। वा
ह्लीकभाषोदीच्यानां द्राविडी द्रविडादिषु। आभीरेषु तथाभीरी चांडाली पुक्कसादिषु। आभीरी शाबरी चापि काष्ठपत्रोपजी
विषु। तथैवांगारकारादौ पैशाची स्यात्पिशाचवाक्। चेटानामप्यनीचानामपि स्याच्छौरसेनिका। बालानां षंढकानां च नीचग्रह
विचारिणां। उन्मत्तानामातुराणां सैव स्यात्संस्कृतं क्वचित्। ऐश्वर्येण प्रमत्तस्य दारिद्र्योपद्रुतस्य च। भिक्षुवल्कधरादीनां प्राकृतं
संप्रयोजयेत्। संस्कृतं संप्रयोक्तव्यं लिंगिनीषूत्तमासु च। देवीमंत्रिसुतावेश्यास्वपि कैश्चित्तथोदितं। यद्देशं नीचपात्रं तु तद्देशं
तस्य भाषितं। कार्यतश्चोत्तमादीनां कार्यो भाषाविपर्ययः। योषित्सखीबालवेश्याकितवाप्सरसां तथा। वैदग्ध्यार्थं प्रदातव्यं सं
स्कृतं चतथांतरा॥ एषामुदाहरणानि नाटके बोद्धव्यानि॥ भाषालक्षणनियमस्तातपादानां महार्णवे। षट्त्रिंशल्लक्षणान्य
त्र नाट्यालंकृतयस्तथा। त्रयस्त्रिंशत्प्रयोज्यानि वीथ्यंगानि त्रयोदश। लास्यांगानि दश यथालाभं रसव्यपेक्षया। यथाला
भं प्रयोज्यानीति संबंधः। अत्र नाटके। तत्र लक्षणानि। भूषणाक्षरसंघातौ शोभोदाहरणं। तथा हेतुसंशयदृष्टांतास्तुल्य
तर्कः पदोच्चयः। निदर्शनाभिप्रायौ च प्राप्तिर्विचार एव च। दिष्टोपदिष्टे च गुणातिपातातिशयौ तथा। विशेषणनिरुक्ती च सि
द्धिर्भ्रंशविपर्ययौ। दाक्षिण्यानुनयौ मालार्थापत्तिर्गर्हणं तथा। पृच्छाप्रसिद्धिः सारूप्यं संक्षेपो गुणकीर्तनं। लेशो मनोरथोऽनु
क्तसिद्धिः प्रियवचस्तथा। लक्षणानि तत्र गुणैः सालंकारैर्योगस्तु भूषणं यथा। आक्षिपंत्यरविंदानि मुग्धे तव मुखश्रियं॥ ५३

कोऽशादं गसमृद्धानां किमेषामति दुःकरं । वर्णनाक्षरसंघातश्चित्रार्थैरक्षरैर्मितैः ॥ यथा शाकुन्तले ॥ कश्चित्सखीवो नाति
बाधते शरीरसंतापः । प्रियंवदा ॥ संपदं से लब्धो सदो ऽत्र वसमं गमिस्सदि । सिद्धैरर्थैः समं यत्र ह्यप्रसिद्धोऽर्थः प्रकाश्यते । श्लिष्टल
क्षणं चित्रार्थो सो शोभेत्यभिधीयते ॥ यथा ॥ सद्वंशसंभवः शुद्धः कोटिदोऽपि गुणान्वितः । कामं धनुरिव क्रूरो वर्जनीयः सतां
प्रभुः । यत्र तुल्यार्थयुक्तेन वाक्येनाभिप्रदर्शनात् । साध्यतेऽभिमतः स्वार्थः स्त उदाहरणं मतं । यथात्र त्वयोत्साजनातीतं कांतं
साधकत्वयाकृतं । का दिनश्रीर्विनार्केण का निशा शशिना विना । हेतुर्वाक्यं समासोक्तमिष्टकृद्धेतुदर्शनात् ॥ यथा वेण्यां ॥ नी
मंत्रतिचेटी । एवं मए जाणिदं जाणुमदि तुम्हाणं । अमुश्चे सुके शे सुकदं दवी एके मा संजमिअ त्ति त्ति । संशयोऽज्ञाततत्त्वा-
स्य वाक्ये स्याद्यदनिश्चयः । यथा यज्ञातिविजये इयं स्वर्गाधिनाथस्य लक्ष्मीः । किं यक्षकन्यका । किं चास्य विषयस्येव देव
ता । किं नु पार्वती । दृष्टान्तो यस्तु पक्षार्थसाधनाय निदर्शनं ॥ यथा वेण्यां ॥ भीमः । आर्येणोचितमेवैतस्याः । यतो दुर्योधनक
लत्रं हि सो त्यादि तुल्यतर्कोऽयमर्थेन तर्कः प्रकृतगामिना ॥ यथा तत्रैव ॥ प्रायेणैव हि दृश्यते कामं स्वप्नाः शुभाशुभाः । ज्ञात-
सरूपाभिनरियं साऽनुजस्मृतिशातीवमा । संचयोऽर्थानुरूपो यः पदानां स पदोच्चयः ॥ यथा शाकुन्तले ॥ अधरः पल्लवरागः कोम
लविटपानुकारिणौ बाहू । कुसुममिव विलोभनीयं यौवनमंगेषु संनद्धं । अत्र पदपदार्थयोः सौकुमार्यसदृशमेव ॥
यत्रार्थानां प्रसिद्धानां क्रियते परिकीर्तनं । परपक्षव्युदासार्थं तन्निदर्शनमुच्यते ॥ यथा ॥ क्षात्रधर्मोचितैर्धर्मैरलं शत्रुव

धेनुधाः । किं तु बालिनि रामेण मुक्तो बाणः पराङ्मुखे । अत्र निजायस्कसाहसपादन्नतार्थस्य कल्पना ॥ यथा शाकुंतले ॥ इदं
किलाव्याजमनोहरं वपुस्तपःक्षमं साधयितुं य इच्छति । ध्रुवं स नीलोत्पलपत्रधारया समिल्लतां छेत्तुमृषिर्व्यवस्यति । ग्राम्यः
केनचिद्देशेन किंचिद्यत्रानुमीयते ॥ यथा मम प्रभावतीस्वयंवरे ॥ अनेन खलु सर्वतश्चरता चंचरीकेणावश्यं विदितान वि
ष्यति । प्रियतमा मे प्रभावती । विचारो युक्तिवाक्यैर्यदप्रत्यक्षार्थस्य साधनं ॥ यथा मम चंद्रकलायां ॥ राजा । नूनमियमंतःपि
हितप्रमदमदनविकारा वर्त्तते यतः । हसति परितोषरहितं निरीक्षमाणापि नेक्षते किमपि । सख्यामुदाहरंत्यामसमंजसमु
त्तरं दत्ते । देशकालस्वरूपेण वर्णनादिष्टमुच्यते ॥ यथा वेण्यां ॥ सहदेवः । यद्वैद्युतमिव ज्योतिरार्ये क्रोधेन संभृतं । तत्प्रावृडि
व कृष्णेयं नूनं संवर्धयिष्यति । उपदिष्टं मनोहारि वाक्यं शास्त्रानुसारतः ॥ यथा शाकुंतले ॥ शुश्रूषस्व गुरून्कुरु प्रियस
खीवृत्तिं सपत्नीजने भर्तुर्विप्रकृतापि रोषणतया मास्म प्रतीपं गमः । भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी यान्त्येवं
गृहिणीपदं युवतयो वामाः कुलस्याधयः । गुणातिपातः कार्यं यद्विपरीतं गुणान्प्रति ॥ यथा मम चंद्रकलायां ॥ चंद्रं प्रति । त
दसंहरिअ इतमोहप्पइस अक्ले हिते पाओ । वसमि सिरे वसुवइणो तदवि कइच्छी अजीअएं हरसि । यः सामान्ये गुणो
द्रेकः सगुणातिशयो मतः ॥ यथा तत्रैव ॥ राजा चंद्रकलाया मुखं निर्दिश्य । असावंतश्चंचद्विकचनवनीलाब्जयुगलस्त
लस्फूर्जत्कंबुर्विलसदलिसंघात उपरि । विनादोषासंगं सततपरिपूर्णाखिलकलः कुतः प्राप्तश्चंद्रो विगलितकलंकः सु ५४

सुखिते । अर्थान्तिमिताद्वक्तुरुक्ता विशिष्टोक्तिर्विशेषणं ॥ यथा ॥ लक्ष्मापहारी विमलो द्विजावासो जनप्रियः । हृदः पद्माकरः
किंतु बुधस्त्वं सजलाश्रयः । पूर्वं सिद्धार्थकथनं निरुक्तिरिति कीर्त्यते ॥ यथा वेण्यां ॥ निहताशेषकौरव्यः क्षीबो दुःशासनासृजा
॥ भंक्ता सुयोधनस्योर्वोर्भीमोऽयं शिरसा नतः । वक्तुं नाकीर्तनं सिद्धिरनिशेनार्थसिद्धये । यथा ये वीर्ये । कूर्मराजस्य यस्याशेषस्य वि-
क्रमः । पृथिव्या रक्षणे राजन्नेकत्र त्वयि तत्स्थितं । दंष्ट्रादीनां नवेक्ष्यो वा वाच्यादन्यतरद्वचः । यथा वेण्यां ॥ कंचुकिन् ब्रूहि दुर्योधनः । स
दन्भृत्यगणं सबांधवं सह मित्रैः ससुतं सबांधवं । स्वबलेन निहंति संयुगे न चिरात्पांडुसुतः सुयोधनं । विचारस्यान्यथाभावः संदे
हात्तु विपर्ययः ॥ यथा ॥ मत्वा लोकविधातारं मतो षेयैः कृता मतिः । त्वयि राजनिते राजन्न तथा व्यवसायिनः ॥ दाक्षिण्यं चेष्टया वा
चा परचित्तानुवर्तनं ॥ वाचा यथा ॥ प्रसाधयन्पुरीं लंकां राजा त्वं हि विभीषण । आर्येणानुगृहीतस्य न विघ्नः सिद्धिमंतरा । एवं चेष्ट
यापि । वाक्यैः सिद्धैरनुनयो नवेदर्थस्य साधनं ॥ यथा वेण्यां ॥ अश्वत्थामानं प्रति कृपः । दिव्यास्त्रग्रामकोविदे भारद्वाजतुल्यपरा
क्रमे किं न संभाव्यते त्वयि । मालास्याद्यदभीष्टार्थं नैकार्थप्रतिपादनं ॥ यथा शाकुंतले राजा ॥ किं शीतलैः क्लमविनोदिभिरार्द्र
वातं संचारयामि नलिनीदलतालवृंतैः । अंके निवेश्य चरणावुत पद्मताम्रौ संवाहयामि करभोरु यथासुखं ते । अर्थापत्ति
र्यदन्यार्थोऽर्थान्तरोक्तः प्रतीयते ॥ यथा वेण्यां ॥ द्रोणोऽश्वत्थामानं राज्येऽभिषेक्तुमिच्छतीति कथयं तं कर्णं प्रति राजा । साक्षात्त्रंगराज
साधकत्वान्नयं सोऽतिरथो वध्यमानं किरीटिना । सिंधुराजमुपेक्षेत नैव चेत्कथमन्यथा । दूषणोद्घोषणायां तु भर्त्सना गर्हणं तु त

त्। यथा तत्रैव कर्णोऽश्वत्थामानं ॥ निर्वीर्यं गुरुशापभाषितवशात्किं मे तवैवायुधं संप्रत्येव भयाद्विहास्त्रेण शस्त्रेण यत्। अन्य
र्थेनापरैर्वाक्यैः स्वकार्यान्वेषणमता ॥ यथा तत्रैव सुन्दरकः ॥ अज्जा अविणाम सारधिदुदीओ तुम्हेहिं दिठ्ठो राआ दुज्जोहणो नवे
त्ति। प्रसिद्धिर्लोकसिद्धार्थैरुत्कृष्टैरर्थसाधनं ॥ यथा विक्रमोर्वश्यां ॥ राजा। सूर्याचन्द्रमसौ यस्य मातामहपितामहौ। स्वयं वृतः प
तिर्द्वाभ्यामुर्वश्या च भुवा च यः। सारूप्यमनुवृत्तस्य सारूप्यात्क्षोभवर्धनं ॥ यथा वेण्यां ॥ दुर्योधनभ्रान्त्या भीमं प्रति युधिष्ठिरः। दुरा
त्मन् दुर्योधनहतक इत्यादि। संक्षेपो यत्तु संक्षेपादात्मान्यार्थे प्रयुज्यते ॥ यथा ममचन्द्रकलायां ॥ राजा प्रिये। अङ्गानि खेदयसि किं
शिरीषपरिपेलवानि मुधा। आत्मानं निर्दिश्य। अयमीहितकुसुमानां संपादयिता तवास्मि दासजनः। गुणानां कीर्तनं यत्तु तदे
व गुणकीर्तनं ॥ यथा ॥ नेत्रे खंजनगंजने इत्यादि। स लेशो भण्यते वाक्यं यत्साहृश्यपुरःसरं ॥ यथा वेण्यां ॥ राजा। हते जरति गांगे
ये पुरस्कृत्य शिखण्डिनं। या श्लाघा पाण्डुपुत्राणां सैवास्माकं न विद्यते। मनोरथस्त्वभिप्रायस्योक्तिर्भंग्यंतरेण यत्। यथा केलि ×रति×
कल्लः। किंचिदेष मन्मथमंथरः। पश्यपसुक्कसमालंबनात्कादवश्चुवति प्रियां। विरोधार्थे द्विष्टस्यावेतुक्रमसिद्धिरुदीर्यते ॥ यथा
×वृक्ष× वृत्तवाटिकायां ॥ दृश्यते तत्प्रियावेतौ चारुचन्द्रमसं प्रति। प्रक्षे कल्याणनामानावुभौ तुष्यपुनर्वसू। स्यात्प्रमाणयितुः पूज्यं प्रि
योक्तिर्हर्षभाषणं ॥ यथा शाकुन्तले ॥ उदेति पूर्वं कुसुमं ततः फलं घनोदयः प्राक्तदनन्तरं पयः। निमित्तनैमित्तिकयोरयं विधि ५५
स्तव प्रसादस्य पुरस्तु संपदः ॥ अथ नाट्यालंकाराः ॥ आशीराक्रन्दकपटाक्षमागर्वोद्यमाश्रयाः। उत्प्रासनस्पृहाक्षोभः पश्चात्ता

पोपपत्तयः । आशंसाध्यवसायौ च विसर्प्पोल्लेखसंज्ञिते । उत्तेजनं परीवादो नीतिरर्थविशेषणं । प्रोत्साहनं च साहाय्यमभिमा
नोनुवर्त्तनं । उत्कीर्त्तनं तथा याञ्चा परिहारो निवेदनं । प्रवर्त्तनाख्यानयुक्तिप्रहर्षाश्चोपपादनं । इति नाट्यालंकृतयो नाट्यभूषणहे
तवः । आशीरिष्टजनाशंसा ॥ यथा शाकुंतले ॥ ययातेरिव शर्मिष्ठा पत्युर्बहुमता भव । पुत्रं त्वमपि साम्राज्यं सेव पूरुमवाप्नुहि । आ
क्रंदः प्रलपितं शुचा ॥ यथा वेण्यां ॥ कंचुकी हा देवि कुंति राजभवनपताके इत्यादि । कपटं मायया यत्र रूपमन्यद्विभाव्यते । यथा
कुलपत्यंके मृगरूपं परित्यज्य विधाय कपटं वपुः । नीयते रक्षसा तेन लक्ष्मणो युधि संशयं । अक्षमा सा परिभवः स्वल्पोन्याति:
प्रशस्यते ॥ यथा शाकुंतले ॥ भोः सत्यवादिन्नभ्युपगतं तावदस्माभिः किं पुनरिमामतिसंधीयते शठाः । कार्यस्यारंभ उद्यमः ॥ यथा
कुंभांके रावणः ॥ पश्यामि शोकविवशोंतकमेव तावत् । ग्रहणं गुणवत्कार्यहेतोराश्रय उच्यते । यथा बिभीषणांके बिभीषणः
राममेवाश्रयिष्यामीति । उत्प्रासनं तु पहासो योऽसाधौ साधुमानिनि ॥ यथा शाकुंतले ॥ शार्ङ्गरवः राजन्नथ पुनः पूर्ववृत्तांतमन्य
संगमाद्विस्मृतो भवान् । तत्कथमधर्मभीरोर्दारपरित्याग इति । आकांक्षा रमणीयत्वाद्वस्तुनो या स्पृहा तु या ॥ यथा तत्रैव ॥ रा
जा । चारुणा स्फुरितेनायमपरिक्षतकोमलः । पिपासतो ममाज्ञां ददातीव तवाधरः । अधिक्षेपवचःकारी क्षोभः प्रोक्त एव तु । यथा
त्वया तपस्विचांडाल प्रच्छन्नवधवर्त्तिना । न केवलं हतो वाली स्वात्मा च परलोकतः । मोहावधीरितार्थस्य पश्चात्तापः स एव तु ।
॥ यथानुतापांके ॥ रामः किं देव्या न विचुंबितोस्मि बहुशो मिथ्याभिशापस्तदा । उपपत्तिर्मता हेतोरुपन्यासोर्थसिद्धये । य

याव(द)ध्यशिलायां । म्रियते म्रियमाणे या त्वयि जीवति जीवति । तां यदीच्छसि जीवंतीं रक्षात्मानं ममासुभिः । आशंसनं स्यादाशं
सा ॥ यथा श्मशाने माधवः ॥ तत्प्रसीदेयमनंगमंगलगृहं भूयोपि तस्या मुखमिति । प्रतिज्ञाध्यवसायकः ॥ यथा मम प्रभावत्यां
वज्रनाभः ॥ अस्य वक्षः क्षणेनैव निर्मथ्य गदयानया । लीलयोन्मूलयाम्येष भुवनद्वयमाधवः । विसर्प्पो य समारब्धं कर्मानि
ष्टफलप्रदं ॥ यथा वेण्यां ॥ एकस्य तावत्पाकोयं दारुणो भुवि वर्त्तते । केशग्रहे द्वितीयेस्मिन्नूनं निःशेषिताः प्रजाः । कार्यदर्श
नमुत्क्षेपः ॥ यथा शाकुंतले ॥ राजानं प्रति तापसौ समिदाहरणाय प्रस्थितावावां । इह चास्मद्गुरोः साधिदैवत इव शकुंतलया
नुमालिनीतीरमाश्रमो दृश्यते । न चेदन्यत्कार्यातिपातः प्रविश्य गृह्यतामतिथिसत्कार इति । उत्तेजनमितीष्यते स्वकार्यसि
द्धयेन्यस्य प्रेरणाय कठोरवाक् ॥ यथा ॥ इंद्रजिच्चंडवीर्योसि नाम्नैव बलवानसि । धिक्श्वच्छन्नरूपेण युध्यसे मद्भयाकुलः ।
भर्त्सनात्तु परीवादः ॥ यथा सुंदरांके दुर्योधनः ॥ धिक्सूत किं कृतवानसि वत्सस्य मे प्रकृतिदुर्ललितस्य पापः पापं विधा
स्यतीत्यादि । नीतिः शास्त्रेण वर्त्तनं ॥ यथा शाकुंतले ॥ दुष्यंतः । विनीतवेषप्रवेश्यानि तपोवनानि नाम । उक्तस्यार्थस्य तु
स्यादुत्कीर्त्तनमनेकधा । अपालंनस्वरूपेण तत्स्यादर्थविशेषणं ॥ यथा शाकुंतले ॥ राजानं प्रति शार्ङ्गरवः । अथ कथमिदं
नाम किमुपन्यस्तमिति । ननु भवानेव नितरां लोकवृत्तान्तनिष्णातः सतीमपि ज्ञातिकुलैकसंश्रयां जनोन्यथा भर्तृमतीं विशं
कते । ततः समीपे परिणेतुरिष्यते प्रिया प्रियावा प्रमदा स्वबंधुभिः । प्रोत्साहनं स्यादुत्साहगिराकस्यापि योजनं ॥ यथा बा

लरामायणे ॥ कालरात्रिकरालेयं स्त्रीति किं विचिकित्ससि । तज्जगत्त्रितयं त्रातुं तात ताडय ताडकां । मा दाव्यं संकटे य
त्स्यादात्तगुणं परस्य तु ॥ यथा वेण्यां पाञ्चालं प्रत्यश्वत्थामा ॥ त्वमपि तावद्राज्ञः पार्श्ववर्ती भव कृपः वाञ्छाम्यहमद्य प्रतिकर्तु
मित्यादि । अभिमानः स एव स्यात् । तत्रैव दुर्योधनः । मातः किमप्यसदृशं कृपणं वचस्ते इत्यादि । प्रश्रयादनुवर्तनं अनुवृत्तिः
॥ यथा शाकुन्तले राजा शकुन्तलां प्रति ॥ अपि तपो वर्द्धते । अनसूया । दाणिं अदेदिविसेसलाहेण । भूतकार्याख्यानमुत्की
र्तनं मतं ॥ यथा बालरामायणे ॥ अत्रासीत्फणिपाशबन्धनविधिः शक्त्या भवद्देवरे गाढं वक्षसि ताडिते हनुमता द्रोणाद्रि
रत्राहृत इत्यादि । यं चापि याञ्चयास्वयं हतमुखेन वा ॥ यथा ॥ अद्यापि देहि वैदेहीं दयालुस्त्वयि राघवः । शिरोभिः कन्दुक
क्रीडां किं कारयसि वानरान् । परिहार इति प्रोक्तः कृतानुचितमार्जनं । यथा प्राणप्रयाणदुःखार्त उक्तवानस्म्यनक्षरं । तत्क्ष
मस्व विभो किं तु सुग्रीवस्ते समर्पितः । अवधीरितकर्तव्यकथनं तु निवेदनं ॥ यथा राघवाभ्युदये लक्ष्मणः ॥ आर्य समुद्रा
भ्यर्थनया गन्तुमुद्यतोसि तत्किमेतत् । प्रवर्तनं तु कार्यस्य यत्स्यात्साधुप्रवर्तनं ॥ यथा वेण्यां ॥ राजा कञ्चुकिन् देवस्य देव
कीतनयस्य बहुमानाद्वत्सस्य भीमस्य जयमङ्गलाय प्रवर्त्यन्तां तत्रोचिताः समारम्भाः । आख्यानं पूर्ववृत्तोक्तिः ॥ यथा तत्रैव ॥
दिशः सोयमरातिशोणितजलैर्यस्मिन्हृदाः पूरिता इत्यादि । युक्तिरर्थावधारणं ॥ यथा तत्रैव ॥ यदि समरमपास्य नास्ति
मृत्योर्भयमिति युक्तमितोन्यतः प्रयातुं । अथ मरणमवश्यमेव जन्तोः किमिति मुधा मलिनं यशः कुरुध्वं । प्रहर्षः प्रमदावाक्यं

साहित्यदर्प्प°
५१
57

॥यथाशाकुंतले॥ तत्किमिदानीमात्मानंपूर्णमनोरथंनाभिनंदामि। शिक्षास्याउपदेशदानं॥यथातत्रैव॥ सहिएणजुत्तंअ-
स्समवासिणोजणस्सअकिदसक्कारंअदेखिविसेसंतक्षिअसच्छंददोगमणं। एषांचलक्षणानांनाट्यालंकाराणांसामान्यत
एकरूपत्वेपिभेदेनव्यपदेशोगड्डरिकाप्रवादेन। एषुचकेषांचिद्गुणालंकारभावसंध्यंगविशेषान्तर्भावेपिनाटकेप्रयत्नतः
कर्तव्यत्वात्तद्विशेषोक्तिः। एतानि पंचसंधिचतुःषष्ट्यंगसंयुतं। षट्त्रिंशल्लक्षणोपेतमलंकारोपशोभितं। महारसं
महाभोगमुदात्तरचनान्वितं। महापुरुषसंचारंसाध्वाचारंजनप्रियं। सुश्लिष्टसंधियोगंचसुप्रयोगंसुखाश्रयं। मृदुशब्दाभि
धानंचकविःकुर्यात्तुनाटकं। इतिमुनिनोक्तत्वान्नाटकेवश्यकर्तव्यान्येव। वीथ्यंगानिप्रवक्ष्यंते। लास्यांगानि। गेयपदंस्थितपा
ठ्यमासीनंपुष्पगंडिका। प्रच्छेदकंत्रिमूढंचसैंधवाख्यंद्विमूढकं। उत्तमोत्तमकंचान्यदुक्तप्रत्युक्तमेवच। लास्येदशविधंह्ये
तदंगंप्रोक्तंमनीषिभिः। तत्रतंत्रीभांडपुरस्कृतोपविष्टस्यासनेपुरः। शुष्कगानंगेयपदं। यथागौरीगृहेवीणांवादयंतीमल
यवती। उत्फुल्लकमलकेसरपरागगौरद्युतेममहिगोरि। अभिवांछितंप्रसिध्यतुभगवतियुष्मत्प्रसादेन। स्थितपाठ्यंतदु
च्यते। मदनोत्तापितायत्रपठतिप्राकृतंविना। अभिनवगुप्तपादास्त्वाहुः। उपलक्षणंचैतत्क्रोधोद्भ्रांतस्यापिसंस्कृतपठन
मपिस्थितपाठ्यमिति। निखिलातोद्यरहितंशोकचिंतान्वितावला। अप्रसारितगात्रंयदासीनासीनमेवतत्। आतोद्यमिश्रि ५७
तंगेयंछंदांसिविविधानिच। स्त्रीपुंसयोर्विपर्यासचेष्टितंपुष्पगंडिका। अन्यासक्तंपतिंमत्वाप्रेमविच्छेदमन्युना। वीणापुरःस

रंगानं स्त्रियाः ऋच्छेदको मतः। स्त्रीवेषधारिणां पुंसां नाट्यं श्लक्ष्णं त्रिमूढकं। यथा मालत्यां मकरंदः एषो ऽस्मि मालती संवृत्तः
कश्च नत्रष्टसंकेतः सुव्यक्तकरणान्वितः। प्राकृतं वचनं वक्ति यत्र तत्सैंधवं विदुः। करणं वीणादिक्रिया। चतुरस्रपदं गीतं मु
खप्रतिमुखान्वितं। द्विमूढं रसभावाढ्यमुत्तमकं पुनः। कोपप्रसादजमधिक्षेपयुक्तं रसोत्तरं। हावहेलान्वितं चित्रश्लोकबंधम
नोहरं। उक्तिप्रत्युक्तिसंयुक्तं सोपालंभमलीकवत्। विलासान्वितगीतार्थमुक्तप्रत्युक्तमुच्यते। स्पष्टान्युदाहरणानि। एतदेव
यदा सर्वैः पताकास्थानकैर्युतं। अंकैश्च दशभिर्धीरा महानाटकमुच्यते। एतदेव नाटकं॥ यथा बालरामायणं॥ अथ प्रकरणं
नवेत्प्रकरणे वृत्तं लौकिकं कविकल्पितं। शृंगारोंगी नायकस्तु विप्रोमात्यो ऽथवा वणिक्। सापायधर्मकामार्थपरो धीरप्रशांत
कः॥ विप्रनायको यथा॥ मृच्छकटिकायां। अमात्यनायकं मालतीमाधवं वणिक्नायकं पुष्पभूषितं। नायिका कुलजा क्वा
पि वेश्या क्वापि द्वयं क्वचित्। तेन भेदास्त्रयस्तस्य तत्र भेदस्तृतीयकः। कितवद्यूतकारादिविटचेटकसंकुलः। कुलस्त्री पुष्पभू
षिते वेश्या रंगदत्ते द्वे अपि मृच्छकटिके। अस्य नाटकप्रकृतिकत्वाच्छेषं नाटकवत्। अथ भाणः। भाणः स्याद्धूर्तचरितो नाना
वस्थांतरात्मकः। एकांक एक एवात्र निपुणः पंडितो विटः। रंगे प्रकाशयेत्स्वेनानुभूतमितरेण वा। संबोधनोक्तिप्रत्युक्ती कु
र्यादाकाशभाषितैः। सूचयेद्वीरशृंगारौ शौर्यसौभाग्यवर्णनैः॥ तत्रेति॥ वृत्तमुत्पाद्यं वृत्तिः प्रायेण भारती। मुखनिर्वहणे सं
धी लास्यांगानि दशापि च। अत्राकाशभाषितरूपं परवचनमपि स्वयमेवानुवदन्नुत्तरप्रत्युत्तरे कुर्यात्। शृंगारवीररसौ

चसौभाग्यशौर्यवर्णनयासूच्यते । प्रायेणभारतीकापिकैशिक्यपिवृत्तिर्भवति । लास्यांगानिगेयपदादीनि । उदाहरणं
लीलामधुकरः । अथव्यायोगः । ख्यातेतिवृत्तोव्यायोगःस्वल्पस्त्रीजनसंयुतः । हीनोगर्भविमर्शाभ्यांनरैर्बहुभिराश्रितः । ए-
कांकश्चभवेदस्त्रीनिमित्तसमरोदयः । कैशिकीवृत्तिरहितःप्रख्यातस्तत्रनायकः । राजर्षिरथदिव्योवाभवेद्धीरोद्धतश्चसः । हा-
स्यशृंगारशांतेभ्यइतरेत्रांगिनोरसाः । यथासौगंधिकाहरणं ॥ अथसमवकारः ॥ वृत्तंसमवकारेतुख्यातंदेवासुराश्रयं । संधयो
निर्विमर्शास्तुत्रयोंकास्तत्रचादिमे । संधीद्वावंत्ययोस्तद्वदेकएवभवेत्पुनः । नायकाद्वादशोदात्ताःप्रख्यातादेवदानवाः । फलंपृ-
थक्पृथक्तेषांवीरमुख्योखिलोरसः । वृत्तयोमंदकैशिक्योनात्रबिंदुप्रवेशकौ । वीथ्यंगानिचतत्रस्युर्यथालाभंत्रयोदश । गायत्र्यु-
ष्णिङ्मुखान्यत्रछंदांसिविविधानिच । त्रिशृंगारस्त्रिकपटःकार्यश्चायंत्रिविद्रवः । वस्तुद्वादशनालीभिर्निःपाद्यंप्रथमांकगं । द्वि-
तीयेंकेचतसृभिर्द्वाभ्यामंकेतृतीयके । नालिकाघटिकाद्वयमुच्यते । बिंदुप्रवेशकौचनाटकोक्तावपिनेहविधातव्यौ ॥ तत्र ॥ ध-
र्मार्थकामैस्त्रिविधःशृंगारःकामशृंगारःअर्थेलाभायकल्पितोर्थशृंगारःशास्त्राविरोधेनकृतोधर्मशृंगारः । तत्रकामशृंगारः
प्रथमांकएव । अन्ययोस्तुननियमएवेत्याहुः । चेतनाचेतनागजादयः । समवकीर्यंतेबहवोर्थाअस्मिन्नितिसमवकारः । य-
थासमुद्रमथनं । अथडिमः । मायेंद्रजालसंग्रामक्रोधोद्भ्रांतादिचेष्टितैः । उपरागैश्चभूयिष्ठोडिमःख्यातेतिवृत्तकः । अंगीरौद्र-
रसस्तत्रसर्वेंगानिरसाःपुनः । चत्वारोंकामतानेहविष्कंभकप्रवेशकौ । नायकादेवगंधर्वयक्षरक्षोमहोरगाः । भूतप्रेतपिशा-

चाद्याः षोडशात्यक्तमुद्धताः । वृत्तयः कैशिकीहीनाः निर्विमर्शाश्च संधयः । दीप्ताः स्युः षड्रसाः शांतहास्यशृंगारवर्ज्जिताः ॥ अ
त्रोदाहरणं ॥ त्रिपुरदाह इति महर्षिः । अथेहामृगः । ईहामृगो मिश्रवृत्तश्चतुरंकः प्रकीर्त्तितः । मुखप्रतिमुखे संधी तत्र निर्व
हणं तथा । नरदिव्यावनियतौ नायकप्रतिनायकौ । ख्यातौ धीरोद्धतावन्त्यो गूढभावादयुक्तकृत् । दिव्यस्त्रियमनिछंतीमपहा
रादिनेछतः । शृंगाराभासमप्यस्य किंचित्किंचित्प्रदर्शयेत् । पताकानायका दिव्या मर्त्या वापि दशोद्धताः । युद्धमानीय संरं
भं परं व्याजान्निवर्त्तयेत् । महात्मनो वधप्राप्ता अपि वध्याः स्युरत्र नो । एकांको देव एवात्र नेतेत्याहुः परे पुनः । दिव्यस्त्रीहेतुकं यु
द्धं नायकाः षडितीतरे । मिश्रं ख्याताख्यातं । अन्यः प्रतिनायकः । पताकानायकास्तु नायकप्रतिनायकयोर्मिलिता दश ना
यकोत्र मृगवदलभ्यां नायिकामत्र ईहते वांछतीतीहामृगः । यथा कुसुमशेखरविजयादिः ॥ अथांकः ॥ उत्सृष्टिकांक एकांको
नेतारः प्राकृता नराः । रसोत्र करुणः स्थायी बहुस्त्रीपरिदेवितं । प्रख्यातमितिवृत्तं च कविर्बुद्ध्या प्रपंचयेत् । भाणवत्संधिवृ
त्त्यंगान्यस्मिन्जयपराजयौ । युद्धं च वाचा कर्त्तव्यं निर्वेदवचनं बहु । इमं च केचिन्नाटकाद्यंतःपात्यंकव्यवछेदार्थत्वादु
त्सृष्टिकांकनामानमाहुः । अन्ये तूत्क्रांता विलोमरूपा सृष्टिर्यत्रेत्युत्सृष्टिकांकः । यथा शर्मिष्ठाययातिः ॥ अथ वीथी । वीथ्या
मेको भवेदंकः कश्चिदेकोत्र कल्प्यते । आकाशभाषितैरुक्तैश्चित्रां प्रत्युक्तिमाश्रितः । सूचयेद्भूरि शृंगारं किंचिदन्यान्रसा
नपि । मुखनिर्वहणे संधी अर्थप्रकृतयोखिलाः । कश्चिदुत्तमो मध्यमो वा । शृंगारबहुलत्वाच्चास्याः कैशिकीवृत्तिबहु

साहित्यदर्पण ५९ 59

लं । अस्यास्त्रयोदशांगानि निर्दिशंति मनीषिणः । उद्घात्यकावलगिते प्रपंचत्रिगते छलं । वाक्केल्यधिबले गंडमवस्यंदितना
लिके । असत्प्रलापव्याहारमृदवानि च तानि तु । तत्रोद्घात्यकावलगिते प्रस्तावनाप्रस्तावे सोदाहरणं लक्षिते । मिथो वाक्यमसद्भूतं
प्रपंचो हास्यकृन्मतः । यथा विक्रमोर्वश्यां वलभीरूढविदूषकचेट्योरन्योन्यवचनं त्रिगतं स्यादनेकार्थयोजनं श्रुतिसाम्यतः ॥ यथा
तत्रैव ॥ राजा । सर्वक्षितिभृतां नाथ दृष्टा सर्वांगसुंदरी । रामा रम्ये वनांतेऽस्मिन्मया विरहिता त्वया । नेपथ्ये तत्रैव शब्दः । राजा । कथं दृ
ष्टेत्यादि । अत्र प्रश्नवाक्यमेवोत्तरवाक्यत्वेन योजितं । नटादित्रितयविषयमेवेदमिति कश्चित् । प्रियाभैरप्रियैर्वाक्यैर्विलोभ्य छद्म
ना छलं ॥ यथा वेणीसंहारे ॥ कर्ता द्यूतच्छलानां जतुमयशरणोद्दीपनः सोऽतिमानी राजा दुःशासनादेर्गुरुरनुजशतस्या
ङ्गराजस्य मित्रं । कृष्णाकेशोत्तरीयव्यपनयनपटुः पाण्डवा यस्य दासाः । क्वास्ते दुर्योधनोऽसौ कथयत न रुषा द्रष्टुमभ्यागतौ स्वः । अ
न्ये त्वाहुः । छलं किंचित्कार्यमुद्दिश्य कस्यचित् । उदीर्यते यद्वचनं वंचनाहास्यरोषकृत् । वाक्केलिर्हास्यसंबंधो द्वित्रिप्रत्युक्तितो भ
वेत् । द्वित्रीत्युपलक्षणं ॥ यथा ॥ भिक्षो मांसनिषेवणं प्रकुरुषे किं तेन मद्यं विना । किं ते मद्यमपि प्रियं प्रियमहो वेश्यांगनाभिः सह ।
वेश्याप्यर्थरुचिः कुतस्तव धनं द्यूतेन चौर्येण वा । चौर्यद्यूतपरिग्रहोऽपि भवतो नष्टस्य कान्या गतिः । केचित्प्रक्रांतवाक्यस्यैव निवृत्ति
र्वाक्केलिरित्याहुः ॥ अन्ये चानेकस्य प्रश्नस्यैकमुत्तरं । अन्योन्यवाक्याधिक्योक्तिः स्पर्धयाधिबलं मतं ॥ यथा मम प्रभावत्यां ॥ वज्रना ५९
भः । अस्य वक्षः क्षणेनैव निर्मथ्य गदयानया । लीलयोन्मूलयाम्येष भुवनत्रयमद्य कः । प्रद्युम्नः । अरे रे असुरापसदालममुना ब

त्प्रलापेन । मम खल्वद्य प्रचंडभुजदंडसमर्पितोरुकोदंडनिर्गलितकांडसमूहपातैः । आस्तां समस्तदितिजक्षतजोक्षिते
यं क्षोणिः क्षणेन पिशिताशनलोलनीया । गंडः प्रस्तुतसंबंधिभिन्नार्थं सत्वरं वचः ॥ यथा वेण्यां राजा ॥ अध्यासितुं तव चिराज्ज
घनस्थलस्य पर्याप्तमेव करभोरु ममोरुयुग्मं । अनंतरं प्रविश्य कंचुकी देव भग्नं इत्यादि । अत्र रथकेतनभंगार्थं वचनमूरु
भंगार्थसंबंधे संबद्धं । व्याख्यानं स्वरसोक्तस्यान्यथावस्यंदितं भवेत् । यथा छलितरामे सीता । जाद कल्लिं क्खु अओज्झाए गंत
व्वं तहिं सो राआ विणएण पणइदव्वो । लवः । अथ किमावाभ्यां राजोपजीविभ्यां भवितव्यं । सीता । जाद एसो क्खु तुम्हाणं पिदा । ल
वः । किमावयोः रघुपतिः पिता । सीता । साशंकं । मा अण्णधा संकध ण क्खु तुम्हाणं सअलाए ज्जेव पुहवीए त्ति । प्रहेलिकैव हास्ये
न युक्तिर्भवति नालिका । संवरणकार्युत्तरं प्रहेलिका ॥ यथा रत्नावल्यां सुसंगता ॥ सहि जस्स कदे तुमं आगदा सो इध ज्जे
व्व । सागरिका । कस्स कदे अहं आगदा । सुसंगता । णं चित्तफलअस्स । अत्र राज्ञः कृते त्वमागतेत्यर्थः संवृतः । असत्प्रलापो य
द्वाक्यमसंबद्धं तथोत्तरं । अगृह्णतोपि मूर्खस्य पुरो यच्च हितं वचः ॥ तत्राद्यं यथा ॥ मम प्रत्नावल्यां प्रद्युम्नः । सहकारवल्लीम
वलोक्य । सानंदं अहो कथमिदेव । अलिकुलमंजुलकेशी परिमलबहलारसावहा तन्वी । किसलयपेशलपाणिः कोकि
लकलभाषिणी प्रियतमा मे । एवमसंबद्धोत्तरेपि ॥ तृतीयं यथा ॥ दुर्योधनं प्रति गांधारीवाक्यं ॥ व्याहारो यत्परस्यार्थे हास्य
लोभकरं वचः । यथा मालविकाग्निमित्रे लास्यप्रयोगावसाने । मालविका निर्गंतुमिच्छति ॥ विदूषकः ॥ मा दाव उवदेस सु

द्वागमिष्यसि इत्युपक्रमे गणदासः विद्रूषकं प्रति ॥आर्यउच्यतां॥ यस्त्वयाक्रमभेदो लक्षितः । विद्रूषकः पढमं वम्हणपू-
आसोदिसाइमाएलघिदामो । स्मयत इत्यादिना नायकस्य विश्रुद्धनायिकादर्शनप्रयुक्तेन हासलोभकारिणा वचसा व्यव-
हारः । दोषागुणागुणादोषायत्रस्युर्मृदवं हि तत् ॥क्रमेण यथा॥ प्रियजीवितता क्रौर्यं निःस्नेहत्वं कृतघ्नता । भूयस्त्वद्दर्शनादेव
ममैते गुणतां गताः । तस्यास्तद्रूपसौंदर्यं भूषितं यौवनश्रिया । सुखैकायतनं जातं दुःखायैव ममाधुना । एतानि चांगानि नाट-
कादिषु संभवंत्यपि वीथ्यामवश्यं विधेयानि । स्पष्टतया नाटकादिषु विनिष्टान्यपि इहोदाहृतानि । वीथीरचनानारसानां चाव-
मालारूपतयास्थितत्वाद्वीथीयं ॥यथा मालतिका॥ अथ प्रहसनं । भाणवत्संधिसंध्यंगलास्यांगांकैर्विनिर्मितं । भवेत्प्रहसनं वृ-
त्तं निंद्यानां कविकल्पितं । अत्र नारभटी नापि विष्कंभकप्रवेशकौ । अंगी हास्यरसस्तत्र वीथ्यंगानां स्थितिर्नवा । तत्र । तपस्विभ-
गवद्विप्रप्रभृतिस्तत्र नायकः । एको यत्र भवेद्धृष्टो हास्यं तच्छुद्धमुच्यते ॥यथा कंदर्पकेलिः॥ आश्रित्य कंचनजनं संकीर्णमिति-
तद्विदुः । यथा धूर्तचरितं । वृत्तं बहूनां धृष्टानां संकीर्णं केचिदूचिरे । तत्पुनर्भवति द्व्यंकमथवैकांकनिर्मितं । यथा लटकमेल-
कादि । मुनिविकृतं तु विद्यत्र षंढकंचुकितापसाः । भुजंगचारणभटप्रभृतेर्वेषवाग्युताः । इदं तु संकीर्णेनैव गतार्थमिति मु-
निना पृथङ्नोक्तं ॥अथोपरूपकाणि॥ तत्र । नाटिका क्लृप्तवृत्ता स्यात्स्त्रीप्राया चतुरंकिका । प्रख्यातो धीरललितस्तत्र स्यान्नायको ६०
नृपः । स्यादंतःपुरसंबद्धा संगीतव्यापृताथवा । नवानुरागा कन्यात्र नायिका नृपवंशजा । संप्रवर्तेत नेतास्यां देव्यास्त्रासेन शंकि-

×२×

तः। देवीपुनर्भवेज्ज्येष्ठाप्रगल्भानृपवंशजा। पदेपदेमानवतीतद्वशःसंगमोद्वयोः। वृत्तिःस्यात्कैशिकीस्वल्पविमर्शाःसंधयः पुनः। द्वयोर्नायकनायिकयोः। यथारत्नावलीविद्धसालभंजिकादि। अथत्रोटकं। सप्ताष्टनवपंचांकंदिव्यमानुषसंश्रयं। त्रोटकंनामतत्प्रोक्तंप्रत्यंकंसविदूषकं। प्रत्यंगसविदूषकत्वादत्रशृंगारोंगीसप्तांकंस्तम्भितारंभंपंचांकंविक्रमोर्वशी॥ अथगोष्ठी॥ प्राकृतैर्नवभिःपुंभिर्दशभिर्वाप्यलंकृता। नोदात्तवचनागोष्ठीकैशिकीवृत्तिशालिनी। हीनागर्भविमर्शाभ्यांपंचषड्योषिदन्विता कामशृंगारसंयुक्तास्यादेकांकविनिर्मिता। यथारैवतमदनिका॥ अथसट्टकं॥ सट्टकंप्राकृताशेषपाठ्यंस्यादप्रवेशकं। नचविष्कंभकोप्यत्रप्रचुरश्चाद्भुतोरसः। अंकाजवनिकाख्याःस्युःस्यादन्यन्नाटिकासमं। यथाकर्पूरमंजर्यादि। अथनाट्यरासकं। नाट्यरासकमेकांकंबहुताललयस्थिति। उदात्तनायकंतद्वत्पीठमर्दोपनायकं। हास्योंग्यत्रसशृंगारोनारीवासकसज्जिका। मुखनिर्वहणेसंधीलास्यांगानिदशापिच। केचित्प्रतिमुखंसंधिमिहनेच्छंतिकेवलं। तत्रसंधिद्वयवतीयथानर्मवतीसंधिचतुष्टयवतीयथाविलासवती। अथप्रस्थानकं॥ प्रस्थानेनायकोदासोहीनःस्यादुपनायकः। दासीचनायिकावृत्तिःकैशिकीभारतीतथा। सुरापानसमायोगात्उद्दिष्टार्थस्यसंहृतः। अंकौद्वौलयतालादिर्विलासोबहुलस्तथा। यथाशृंगारतिलकं॥ अथोल्लाप्यं॥ उदात्तनायकंदिव्यवृत्तमेकांकभूषितं। शिल्पकांगैर्युतंहास्यशृंगारकरुणैःरसैः। उल्लाप्यंबहुसंग्रामंअस्रगीतमनोहरं। चतस्रोनायिकास्तत्रत्रयोंकाइतिकेचन। शिल्पकांगानिवक्ष्यमाणानि। यथादेवीमहादेवं। अथकाव्यं। काव्यमारभटी

हीनमेकांकं हास्यसंकुलं । खंडमात्राद्विपदिकाभग्नतालैरलंकृतं । वर्णमात्राछगणिकायुतं शृंगारभाषितं । नेता स्त्री चाप्यु
दात्तात्र संधी आद्यौ तथांतिमः । यथा यादवोदयः ॥ अथ प्रेंखणं । गर्भविमर्शरहितं प्रेंखणं हीननायकं । असूत्रधारमेकांकमवि
ष्कंभप्रवेशकं । नियुद्धसंफेटयुतं सर्ववृत्तिसमाश्रयं । नेपथ्ये गीयते नांदी तथा तत्र प्ररोचना ॥ यथा बालिवधः ॥ अथ रासकं ॥
रासकं पंचपात्रं स्यान्मुखनिर्वहणान्वितं । भाषाविभाषाभूयिष्ठं भारतीकैशिकीयुतं । असूत्रधारमेकांकं सवीथ्यंगं कलान्वि
तं । श्लिष्टनांदीयुतं ख्यातनायकं मूर्खनायकं । उदात्तभावविन्याससंश्रितं चोत्तरोत्तरं । इति प्रतिमुखसंधिमपि केचित्प्रचक्षते ॥
यथा कालान्वितं । अथ संलापकं । संलापकेंकाश्चत्वारस्त्रयो वा नायकः किलः । पाखंडः स्याद्रसस्तत्र शृंगारकरुणेतरः । भवे
युः पुरसंरोधछलसंग्रामविद्रवाः । न तत्र वृत्तिर्भवति भारती न च कैशिकी ॥ यथा मायाकापालिकायां ॥ अथ श्रीगदितं । प्रख्या
तवृत्तमेकांकं प्रख्यातोदात्तनायकं । प्रसिद्धनायकं गर्भविमर्शाभ्यां विवर्जितं । भारतीवृत्तिबहुलं श्रीतिशब्देन संकुलं । मतं श्री
गदितं नाम विद्वद्भिरुपरूपकं । यथा क्रीडारसातलं । अथ शिल्पकं । चत्वारः शिल्पकेंकाः स्युश्चतस्रो वृत्तयस्तथा । अशांतहा
स्याश्च रसाः नायको ब्राह्मणो मतः । वर्णनात्र श्मशानादेः हीनः स्यादुपनायकः । सप्तविंशतिरंगानि भवंत्येतस्य तानि तु । आशं
सातर्कसंदेहतापोद्वेगप्रसक्तयः । प्रयत्नग्रथनोत्कंठावहित्थाप्रतिपत्तयः । विलासालस्यबाष्पानि प्रहर्षाश्वासमूढताः । सा
धनानुगमोच्छ्वासविस्मयप्राप्तयस्तथा । लाभविस्मृतिसंफेटवैशारद्यप्रबोधनं । चमत्कृतिश्चेत्यमीषां स्पष्टत्वाल्लक्ष्म नोच्यते ॥

संफेटअथनयोः सर्वमुक्तत्वादेवलक्षणं सिद्धं। यथाकनकवतीमाधव॥ अथविलासिका॥ शृंगारबहुलैकांकादशला-
लास्यांगसंयुता। विदूषकविटाभ्यांचपीठमर्दनभूषिता। हीनागर्भविमर्शाभ्यांसंधिभ्यांहीननायका। स्वल्पवृत्तासुनेपथ्या
वीख्यातासाविलासिका। केचित्त्वत्रविलासिकास्थानेविनायकेतिपठंति। तस्यास्तुदुर्मल्लिकायामंतर्भावइत्यन्ये। अथदुर्म-
ल्लिका। दुर्मल्लीचतुरंकास्यात्कैशिकीभारतीयुता। अगर्भानागरनरान्यूननायकभूषिता। त्रिनालिःप्रथमोंकोस्यांविट-
क्रीडामयोभवेत्। पंचनालिर्द्वितीयोंकोविदूषकविलासवान्। षण्णालिकस्तृतीयस्तुपीठमर्दविलासवान्। चतुर्थोदशना-
लिःस्यादंकःक्रीडितनागरः। यथाबिंदुमती। अथप्रकरणिका। नाटिकैवप्रकरणीसार्थवाहादिनायका। समानवंशजाने-
तुर्भवेद्यत्रचनायिका॥ मृग्यमुदाहरणं॥ अथहल्लीशः। हल्लीशएकएवांकःसप्ताष्टौदशवास्त्रियः। वागुदात्तैकपुरुषःकै-
शिकीवृत्तिसंकुलः। मुखांतिमौतथासंधीबहुतालयस्थिति। यथाकेलिरैवतकं। अथभाणिका॥ भाणिकाश्लक्ष्णनेपथ्या
मुखनिर्वहणान्विता। कैशिकीभारतीवृत्तियुतैकांकविनिर्मिता। उदात्तनायकामंदपुरुषत्रांगसप्तकं। उपन्यासोथविन्यासो
विबोधःसाध्वसंतथा। समर्प्पणंनिवृत्तिस्तुसंहारइतिसप्तमः। उपन्यासःप्रसंगेनभवेत्कार्यस्यकीर्त्तनं। निर्वेदवाक्यव्युत्पत्तिर्वि-
न्यासःइतिसंमतः। भ्रांतिनाशोविबोधःस्यान्मिथ्याख्यानंतुसाध्वसं। उपालंभवचःकोपपीडयेहसमर्प्पणं। निदर्शनस्योपन्या-
सोनिवृत्तिरितिकथ्यते। संहारइतिचप्राहुर्यत्कार्यस्यसमापनं। स्पष्टान्युदाहरणानि। यथाकामदत्ता। एषांसर्वेषांनाटक

प्रकृतित्वेपियथौचित्यंयथालाभंनाटकोक्तविशेषपरिग्रहः। यत्रनाटकोक्तविशेषस्यापितुनरूपादानंतत्सर्वावस्थानि
यमः॥ ॥अथश्रव्यकाव्यानि॥ श्रव्यंश्रोतव्यमात्रंतत्गद्यपद्यमयंद्विधा॥ तत्रपद्यमयान्याह॥ छंदोबद्धपदंपद्यंतेनचैके
नमुक्तकं। द्वाभ्यांतुयुग्मकंसंदानितकंत्रिभिरुच्यते। कालापकंचतुर्भिश्चपंचभिःकुलकंमतं॥ तत्रमुक्तकंयथामम॥
सांद्रानंदमनंतमव्ययमजंयद्योगिनोपिक्षणंसाक्षात्कर्तुमुपासतेप्रतिमुहुर्ध्यानैकतानाःपरं। धन्यास्तामथुरापुरीयुव
तयस्तद्ब्रह्मयाःकौतुकादालिंगंतिसमालपंतिशतधाकर्षंतिचुंबंतिच॥ युग्मकंयथामम॥ किंकरोषिकरोपांतेकांतेगं
डस्थलीमिमां। प्रणयप्रवणेकांतेनैकांतेनोचिताःक्रुधः॥ इतियावत्कुरंगाक्षींवक्तुमीहामहेवयं। तावदाविरभूच्चूतेमधु
रोमधुपध्वनिः। एवमन्यान्यपि। सर्गबंधोमहाकाव्यंतत्रैकोनायकःसुरः। सद्वंशःक्षत्रियोवापिधीरोदात्तगुणान्वितः। एक
वंशभवाभूपाःकुलजाबहवोपिवा। शृंगारवीरशांतानामेकोंगीरसइष्यते। अंगानिसर्वेपिरसाःसर्वेनाटकसंधयः। इति
हासोद्भवंवृत्तमन्यद्वासज्जनाश्रयं। चत्वारस्तस्यवर्गाःस्युस्तेष्वेकंचफलंभवेत्। आदौनमस्क्रियाशीर्वावस्तुनिर्देशएववा
क्वचिन्निंदाखलादीनांसतांचगुणकीर्त्तनं। एकवृत्तमयैःपद्यैरवसानेन्यवृत्तकैः। नातिस्वल्पानातिदीर्घाःसर्गाअष्टाधिका
इहनानावृत्तमयःक्वापिसर्गःकश्चनदृश्यते। सर्गांतेभाविसर्गस्यकथायाःसूचनंभवेत्। संध्यासूर्येंदुरजनीप्रदोषध्वांतवा
सराः। प्रातर्मध्याह्नमृगयाशैलर्तुवनसागराः। संभोगविप्रलंभौचमुनिस्वर्गपुराध्वराः। रणप्रयाणोपयममंत्रपुत्रोदयादयः ६२

यः। वर्णनीया यथायोगं सांगोपांगा अमी इह। कवेर्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा। नामास्य सर्गोपादेयकथया स
र्गनाम तु। संध्यंगानि यथालाभमत्र विधेयानि। अवसानेन्यवृत्तकैरिति बहुवचनमविवक्षितं। सांगोपांगा इति जलकेलि-
मधुपानादयः। अस्मिन्महाकाव्ये यथा महाभारतं। प्राकृतैर्निर्मिते तस्मिन् सर्गा आश्वाससंज्ञकाः। छंदसा स्कंधकेनैतत्क्व
चिद्गलितकैरपि। यथा सेतुबंधः। यथा मम कुवलयाश्वचरितं। अपभ्रंशनिबद्धे तु सर्गाः कुडवकाभिधाः। तथापभ्रंशयोग्या
नि छंदांसि विविधानि च। यथा कर्णपराक्रमः। भाषाविभाषानियमात्काव्यं सर्गसमुज्झितं। एकार्थप्रवणैः पद्यैः संधिसामग्र्य
वर्जितं। यथा भिक्षाटनमार्यविलासश्च। खंडकाव्यं भवेत्काव्यस्यैकदेशानुसारि च। यथा मेघदूतादि। कोषः श्लोकसमूह
स्तु स्यादन्योन्यानपेक्षकः। व्रज्याक्रमेण रचितः स एवातिमनोहरः। सजातीयानामेकत्र सन्निवेशो व्रज्या।। यथा मुक्तावल्यादि।।
अथ गद्यकाव्यानि।। तत्र गद्यं। वृत्तबंधोज्झितं गद्यं मुक्तकं वृत्तगंधि च। भवेदुत्कलिकाप्रायं चूर्णकं च चतुर्विधं। आद्यं समास
रहितं वृत्तभागयुतं परं। अन्यद्दीर्घसमासाढ्यं तुर्यं चाल्पसमासकं। मुक्तकं यथा। गुरुर्वचसि पृथुरुरसीत्यादि। वृत्तगंधि य
था। समरकंडूलनिबिडभुजदंडमंडलीकृतकोदंडसिंजिनीटंकारोज्जागरितवैरिनगरेत्यादि। अत्र मंडलीकृतकोदंडेत्यनु
ष्टुब्वृत्तस्य पादः। समरकंडूलेत्यत्र च प्रथमाक्षरत्रयरहितस्तस्यैव पादः। उत्कलिकाप्रायं। यथा ममैव। अणिसविसुम
रणिसिददरसमरविसरविदलिदसमरपरिगदपवरपरबलेत्यादि। चूर्णकं यथा मम। गुणरत्नसागर जगदेकनागर

साहित्यदर्पण. ६२ 63

कामिनीमदनजननचित्तरंजनेत्यादि। कथायांसरसंवस्तुपद्यैरेवविनिर्मितं। क्वचिदत्रभवेदार्याक्वचिद्वक्त्रापवक्त्रकेआ
दौपद्यैर्नमस्कारःखलादेर्वृत्तकीर्त्तनं॥ यथाकादंबर्यादि॥ आख्यायिकाकथावत्स्यात्कवेर्वंशानुकीर्त्तनं। अस्यामन्यकवी
नांचवृत्तंपद्यंक्वचित्क्वचित्। कथांशानांव्यवच्छेदआश्वासइतिबोध्यते। आर्यावक्त्रापवक्त्राणांछंदसांयेनकेनचित्। अन्यापदे
शेनाश्वासमुखेभाव्यर्थसूचनं। यथाहर्षचरितादि। अपित्वनियमोदृष्टस्तत्राप्यन्यैरुदीरणात्। इतिदंड्याचार्यवचनाद्यत्केचिदा
ख्यायिकानायकेनैवनिबद्धव्येत्युक्तंतदयुक्तं। आख्यानादयश्चकथाख्यायिकयोरेवांतर्भूतत्वान्नपृथगुक्ताः। यदुक्तंदंडिनैव
अत्रैवांतर्भविष्यंतिशेषाश्चाख्यानजातयः। एषामुदाहरणंपंचतंत्रादि। अथगद्यपद्यमयानि। गद्यपद्यमयंकाव्यंचंपूरित्यभि
धीयते। यथादेशराजचरितं। गद्यपद्यमयीराजस्तुतिर्विरुदमुच्यते॥ यथाविरुदमणिमाला॥ करंभकंतुभाषाभिर्विविधा
भिर्विनिर्मितं। यथाममषोडशभाषामयीप्रशस्तिरत्नावली। एवमन्येपदेशाःउद्देशमात्रप्रसिद्धत्वादुक्तानेदानतिक्रमाद्यन्तह
यल्लक्षिताः॥ ॥इतिश्रीसाहित्यदर्पणेदृश्यश्रव्यकाव्यनिरूपणोनामषष्ठःपरिच्छेदः॥ इहहिप्रथमतःकाव्येदोषगु
णरीत्यलंकाराणामवस्थितिक्रमोदर्शितःसंप्रतिकेतेइत्यपेक्षायामुद्देशक्रमप्राप्तानांदोषाणांस्वरूपमाह। रसापकर्षका
दोषाः अस्यार्थःप्रागेवस्फुटीकृतः। तद्विशेषानाह। तेपुनःपंचधामताः। पदेतदंशेवाक्येऽर्थेसंभवंतिरसेपियत्। स्पष्टं। तत्र॥ ६२
दुःश्रवत्रिविधाश्लीलानुचितार्थाप्रयुक्तताः। ग्राम्याप्रतीतसंदिग्धनेयार्थनिहतार्थताः। अवाचकत्वंक्लिष्टत्वंविरुद्धमतिका

रिता। अविमृष्टविधेयांशतावश्चपदवाक्ययोः। दोषाःकेचिद्भवंत्येषुपदांशेपिपदेपरे। निरर्थकासमर्थत्वेच्युतसंस्का
रतातथा। परुषवर्णतयाश्रुतिदुःखावहत्वंदुःश्रवत्वं॥ यथा॥ कार्त्तार्थ्यंयातुतन्वंगीकदानंगवशंवदा। अश्लीलत्वं। ब्रीडाजु
गुप्सामंगलव्यंजकत्वात्त्रिविधं। क्रमेणोदाहरणानि। दृप्तारिविजयेराजन्साधनंसुमहत्तव। प्रससारशनैर्वायुर्विनाशेतन्विते
सदा। अत्रसाधनवायुविनाशशब्दाअश्लीलाः। शूराअमरतांयांतिपशुभूतारणाध्वरे। अत्रपशुपदंकातर्यमभिव्यनक्तीत्य
नुचितार्थ्यं। अप्रयुक्तत्वंतथाप्रसिद्धावपिकविभिरनादृतत्वं। यथा। भातिपद्मःसरोवरे। अत्रपद्मशब्दःपुल्लिंगः॥ ग्राम्यं य
था॥ कटिस्तेहरतिमनः। अत्रकटिशब्दोग्राम्यः। अप्रतीतत्वमेकदर्शनमात्रप्रसिद्धत्वं। यथायोगेनदलिताशयः। अत्रयो
गशास्त्रएववासनार्थेआशयशब्दः। आशीःपरंपरांवंद्यांकर्णेकृत्वाकृपांकुरु। अत्रवंद्यामितिकिंवंदीकृतायामुतवंद
नीयामितिसंदेहः। नियार्थत्वंरूढिप्रयोजनाभावादशक्तिकृतंलक्षार्थप्रकाशनं॥ यथा॥ कमलेचरणाघातंमुखंसुमुखि
तेकरोतु। अत्रचरणाघातेननिर्जितत्वंलक्ष्यं। निहतार्थत्वमुभयार्थशब्दस्याप्रसिद्धेर्थेप्रयोगः। यथा। यमुनाशंवरमंवरं
व्यतानीत्। शंवरशब्दोदैत्येप्रसिद्धइहतुजलेनिहतार्थः। गीतेषुकर्णमादत्ते। अत्राङ्पूर्वोदाधातुर्दानार्थेऽवाचकः। यथावा
दिनंमेत्वयिसंप्राप्तेध्वांतछन्नापियामिनी। अत्रदिनमितिप्रकाशमयार्थेऽवाचकं। क्लिष्टत्वमर्थप्रतीतेर्व्यवहितत्वं॥ यथा॥
क्षीरोदजावसतिजन्मभुवःप्रसन्नाः। अत्रक्षीरोदजालक्ष्मीस्तस्याःवसतिःपद्मंतस्यजन्मभुवोजलानि। वृतयेस्तुनवानी

शः । अत्र भवानीशब्दो भवान्याः पत्यंतरप्रतीतिकारित्वाद्विरुद्धमतिकृत् । स्वर्गग्रामटिकाविलुंठनवृथोच्छूनैः किमेभिर्भु
जैः । अत्र वृथात्वं विधेयं तच्च समासे गुणीभावादनुवाद्यत्वप्रतीतिकृत् ॥ यथा वा ॥ यत्र ते पतति सुभ्रु कटाक्षः षष्ठ एष इव पंचश
रस्य । अत्र षष्ठ इवेत्युत्प्रेक्ष्यं ॥ यथा वा ॥ अमुक्ता भवता नाथ मुहूर्तमपि सा पुरा । अत्रामुक्तेत्यत्र नञः प्रसज्यप्रतिषेधत्वमिति
विधेयत्वमेवोचितं । यदाहुः । अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता । प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ् ॥ यथा ॥ न
वजलधरः संनद्धोऽयं न दृप्तनिशाचरः । उक्तोदाहरणे तु तत्पुरुषसमासे गुणीभावेन नञः पर्युदासतया निषेधस्य विधेयतान
वगमः । यदाहुः ॥ प्रधानत्वं विधेर्यत्र प्रतिषेधेऽप्रधानता । पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ् । तेन जुगोपात्मानमत्रस्तो भे
जे धर्ममनातुरः । अत्रात्रस्ततायनूद्यात्मनो गोपनाद्येव विधेयमिति नञः पर्युदासतया गुणभावो युक्तः । ननु अश्राद्धभोजी ब्राह्मणः असू
र्यंपश्या राजदारा इत्यादिवत् अमुक्तेत्यत्रापि प्रसज्यप्रतिषेधो भविष्यतीति चेन्न । तत्रापि यदि भोजनादिरूपक्रियांशेन नञः
संबंधः स्यात्तदैव तत्र प्रसज्यप्रतिषेधत्वं वक्तुं शक्यं न च तथा । विशेष्यतया प्रधानेन तद्भोज्यपदार्थेन कर्त्रंशेनैव नञः संबद्धत्वात्
यदाह । श्राद्धभोजनशीलो हि यतः कर्ता प्रतीयते न तद्भोजनमात्रं कर्त्तरि णिनेर्विधानादिति । अमुक्तेत्यत्र तु क्रिययैव संबंध
इति दोष एव । एते च क्लिष्टत्वादयः समासगता एव पददोषाः । वाक्ये दुःश्रवत्वं यथा । स्मरार्त्यधः कदा लप्स्ये कार्त्तार्थ्यं विरह
े तवः । हृतप्रवृत्तिरन्यार्थैः कविर्वांतं समश्नुते । अत्र जुगुप्साव्यंजकाश्लीलता । उद्यत्कमललौहित्यैर्वक्त्राभिर्भूषिता तनुः ॥ ६४

अत्र कमललोहित्यरागः। वक्त्रानिर्वामालिः। धम्मिल्लस्य न कस्य प्रेक्ष्य निकामं कुरंगशावाक्ष्याः। रज्यत्यपूर्वबंधव्युत्पत्ते
र्मानसं शोभां। अत्र धम्मिल्लस्य शोभां प्रेक्ष्य कस्य मानसं न रज्यतीति क्लिष्टः संबंधः। न्यक्कारो ह्ययमेव मे यदरयस्तत्रायमे
व न्यक्कार इति न्यक्कारस्य विधेयत्वं विवक्षितं तच्च शब्दवचनवैपरीत्येन गुणीकृतं। रचनापदस्यापि विपरीतेति वाक्यदोषः।
आनंदयति ते नेत्रे यो सौ सुभ्रु समागतः। इत्यादिषु यत्तदोर्नित्यसंबंध इति न्यायादुपक्रान्तस्य यच्छब्दस्य निराकांक्षत्वप्रति
पत्तये तच्छब्दसमानार्थतया प्रतिपद्यमाना इदमेतददःशब्दा विधेयतया एव न वक्तुं युक्ताः। अत्र तु यच्छब्दनिकटस्थतयानु
वाद्यत्वं भवतीति ह्युक्तं। तच्छब्दस्यापि यच्छब्दनिकटस्थितस्य प्रसिद्धपरामर्शित्वमात्रं॥ यथा॥ यः स ते नयनानंदकरः सुभ्रु स
मागतः एवमिदमादिशब्दोपादानेपि यत्र च यत्तदोरेकस्यार्थत्वं संभवति तदा एकस्योपादानेपि निराकांक्षत्वं भवतीति रिति
नकृतिः। तथाहि यच्छब्दस्योत्तरगतत्वेनोपादाने सामर्थ्यात्पूर्ववाक्ये तच्छब्दस्यार्थत्वं। यथा आत्मा जानाति यत्पापं। एवं यः सर्व
शैलाः परिकल्प्य वत्सं इत्यादावपि। तच्छब्दस्य प्रक्रान्तप्रसिद्धानुभूतार्थत्वे यच्छब्दस्यार्थत्वं। यथा सद्वत्तावालिनं वीरं तत्पदे चि
रकांक्षिते। धातोः स्थान इवादेशं सुग्रीवं संन्यवेशयत्। सवः शशिकलामौलिस्तादात्म्यायोपकल्पतां। तामिंदुसुंदरमुखीं
हृदि चिंतयामि। यत्र च यच्छब्दनिकटस्थितानामपि इदमादिशब्दानां भिन्नलिंगविभक्तिकत्वं तत्रापि निराकांक्षत्वमेव॥ क्र
मेण यथा॥ विभाति मृगशावाक्षी येदं भुवनभूषणं। इंदुर्विभाति यस्तेन दग्धाः पथिकयोषितः। क्वचिदनुपात्तयोर्द्वयोर

पिसामर्थ्यादवगमो यथा। नमेशामयिताकोपिस्तारस्येसुर्विमाश्रुवः। नंदस्यस्तवनेकोपिवालोस्त्यक्ततपोरुषः। अत्रयो-
त्रिसत्तारस्यशामयितेतिबुध्यते यद्विरद्दुःखमेतल्लोवापरिहरिष्यतीत्यत्रैकयच्छब्दःसाकांक्षइतिनचवाच्यं॥ तथाहि॥
यद्यदित्यनेनयेनकेनचिद्रूपेणस्थितंसर्वात्मकंवस्तुविवक्षितंतथाभूतस्यतच्छब्देनपरामर्शः। एवमन्येषामपिवाक्यगतत्वे
नोदाहरणंबोध्यं। पदांशेश्रुतिकटुत्वंयथा। तज्जछसिध्यैकुरुदेवकार्यांयोधातुमन्त्रोगिरिधत्ते। अत्रमन्त्रशब्दःह्रीवार्थेनिहतार्थः
वर्ण्यतेकिंमहासेनोविजेयोयस्यतारकः। अत्रविजेयइतिकृत्यप्रत्ययःक्तप्रत्ययार्थेऽवाचकः। पाणिःपल्लवपेलवः। अत्रपे-
लवशब्दस्याद्याक्षरेश्लीले संयामेनिहताःशूरावचोवाणत्वमागताः। अत्रवचःशब्दस्यगीःशब्दवाचकत्वेनेयार्थत्वं। तथा
तत्रैववाणशब्दस्थानेशरेतिपाठेऽत्रपदद्वयमपिनपरिवृत्तिसहं। जलध्यादौतूत्तरपदंवडवानलादौपूर्वपदं। एवमन्येष्व-
पियथासंभवंपदांशदोषाज्ञातव्याः। निरर्थकत्वादीनांत्रयाणांचपदमात्रगतत्वेनैवलक्ष्येऽसंभवः॥ क्रमेणयथा॥ मुंच-
मानंदिमानिनि। अत्रदिशब्दोवृत्तपूरणमात्रप्रयोजनः। कुंजंहंतिकृशोदरी। अत्रहंतीतिगमनार्थेपठितमपिनतत्रसमर्थं
गांडीवीकनकशिलानिभंभुजाभ्यामाजघ्नेविषमविलोचनस्यवक्षः। अत्राडोयमहंतस्स्वांगकर्मकोचेत्यनुशासनवशा-
दाङ्पूर्वस्यहनःस्वांगकर्मकस्यैवात्मनेपदंनियतमिदंतुतदुल्लंघितमितिव्याकरणलक्षणहीनत्वाच्च्युतसंस्कारत्वं
नन्वत्राजघ्नइतिपदस्यस्वतोनदुष्टताऽत्रपितुपदांतरपिक्षयैवेत्यस्यवाक्यदोषता। नैवं। तथाहि। दोषगुणालंकाराणां

६५

शब्दार्थगतत्वेनव्यवस्थितेस्तदन्वयव्यतिरेकानुविधायित्वंहेतुः। इदंतुदोषस्याजघ्नेइतिपदमात्रस्यैवान्वयव्यतिरेकानुवि
धायित्वं। पदांतराणांपरिवर्तनेपितस्यतादवस्थ्यादेवेतिपददोषएव। तथायथाइतात्मनेपदस्यपरिवृत्तावपिनपददोषःतथाद
नध्वस्ततेरपीतिनपदांशेदोषः। एवंपञ्चइत्यत्राप्रयुक्तस्यपदगतत्वंबोद्धव्यं। एवंग्राम्यतादिव्याकरणलक्षणहीनावपिच्युतसं-
स्कारत्वमूह्यं। इदंशाब्दानांसर्वथाप्रयोगाभावेऽसमर्थत्वंविरलप्रयोगेनिहतार्थत्वमनेकार्थशब्दविषयं। अप्रतीतत्वंत्वेकार्थ
स्यापिशब्दस्यसार्वत्रिकप्रयोगविरहः। एवंपददोषसजातीयावाक्यदोषाउक्ताःसम्प्रतितद्विजातीयाउच्यन्ते। वर्णानांप्रतिकूल-
त्वंलुप्ताहतविसर्गता। अधिकन्यूनकथितपदताहतवृत्तता। पतत्प्रकर्षतासंधौविश्लेषाश्लीलकष्टताः। अर्धान्तरैकपदतासमा
प्तपुनरात्तता। अभवन्मतसंबंधाक्रमामतपरार्थताः। वाच्यस्यानभिधानंचभग्नप्रक्रमतातथा। त्यागःप्रसिद्धेरस्थानेन्यासःपद
समासयोः। संकीर्णतागर्भिततादोषाःस्युर्वाक्यमात्रगाः। वर्णानांरसानुगुण्यविपरीतत्वंप्रतिकूलत्वं। यथाममः। ओवट्टइउ-
ल्लुट्टइलोट्टइसअणेकहिंपिमोट्टाअइणोपरिहट्टइहिअएणफिट्टइलज्जाइखुट्टइदिहिएसा। अत्रटकाराःशृंगाररसंप्रतिनः
केवलंशृंगारदर्शनायनिवृत्ताः। एषांचैकद्वित्रिचतुःप्रयोगेणनतादृक्प्रसंगइतिनदोषः। गतानिशाइमावालेअत्रविसर्गालु
प्ताः। अहतात्वंप्राप्ताविसर्गायत्रसतथा। धीरोवरोनरोयातीति। पल्लवाकृतिरक्तोष्ठीसादि। अत्राकृतिपदमधिकं। एवंसदा-
शिवंनौमिपिनाकपाणिमि। अत्रपिनाकपाणिमितिविशेषणमधिकं। कुर्याद्धरस्यापिपिनाकपाणेरित्यत्रतुविशेषप्रतिपत्त्यर्थं

ष्टपात्तत्वाद्युक्तमेव । यथा वा वाचमुवाच कौत्सः इत्यत्र वाचमित्यधिकं उवाचेत्यनेनैव गतार्थत्वात् । क्वचित्तु विशेषणदानार्थं
तत्प्रयोगो युज्यतेपि । उवाच मधुरां वाचं केचिल्लोकः । यत्र विशेषणस्यापि क्रियाविशेषणत्वं संभवति तत्रापि न तत्प्रयोगो घटते
यथा उवाच मधुरं धीमानिति । यदि मय्यर्पिता दृष्टिः किं ममेन्द्रतया तदा । अत्र प्रथमे पादे त्वयेति न्यूनं । रतिलीलाश्रमं भिन्ते सलील
मनिलो वहन् । अत्र लीलाशब्दः पुनरुक्तः एवं जह्नोर्विशांघ्रतविकाशि विशदश्मनाः । अत्र विशदशब्दस्य धृतपरिस्फुटतत्वसूनाः इ
ति सर्वनाम्नैव परामर्शो युक्तः । दत्तहन्त लक्षणानुसरणेप्यश्रव्यं रसानन्तगुणमप्राप्तगुरुभावान्तलघु च ॥ क्रमेण यथा ॥ हंतसन्त
तमेतस्याहृदयं भिन्ते मनोभवः कुपितः । अयि मयि मानिनि मा कुरु मानं इदं हन्तदास्य रसस्येवानुकूलं । विकसितसहकारभा
रहारिपरिमल एष समागतो वसंतः । यत्पदान्ते लघोरपि गुरुभाव उक्तस्तत्सर्वं द्वितीयचतुर्थपादविषयं । प्रथमतृतीयविषयं
तु वसंततिलकादावेवेत्यत्र प्रमुदितसौरभ आगतो वसंत इति पाठो युक्तः । अन्यास्ता गुणरत्नरोहणभुवो धन्या मृदन्यैव सा संभ
राः खलु तेन्य एव विधिना येरेष सृष्टो युवा । श्रीमत्कान्तिजुषां द्विषां करतलात्स्त्रीणां नितंबस्थलाद्दृष्टे यत्र पतंति मूढमनसामस्त्रा
णि वस्त्राणि च । अत्र वस्त्राणि चेत्यत्र बंधस्य श्लथत्वश्रुतिः वस्त्राण्यपीति तु दाढ्यमिति न दोषः । इदमप्यप्राप्तगुरुभावान्तलघ्विति ।
काव्यप्रकाशकारः । वस्तुतस्तल्लक्षणानुसरणेप्यश्रव्यमित्यन्ये । प्रज्वलज्ज्वलनज्वालाविकटोरुसटाछटः । श्वासाक्षिप्तकु ६६
लक्ष्माभृत्पातु वो नरकेशरी । अत्र क्रमेणानुप्रासप्रकर्षः पतितः । दलिते उत्पले एते अक्षिणी अमलांगि ते । एवंविधसंधिविश्लेष

स्यासकृत्त्वयोगएवदोषः। अनुशासनमुल्लंघ्यहन्तंगतस्यमात्रेणसंधिविश्लेषस्यतुसकृदपि ॥ यथा ॥ वासवासामुखे
नातिइंदुश्चंदनविंदुवत् चलंडामरश्चे ष्टितइत्यत्रसंधोनुग्रुष्ठाव्यंजकमश्लीलत्वं। उर्व्यसावत्रतार्वालीमवंतेचार्द्रवस्थितिः
अत्रसंधौकष्टत्वं। इंदुर्विभातिकर्पूरगौरैर्धवलयन्करैः। जगन्माक्रुरुतत्वगिमानंपादान्विते त्रिये। अत्रजगदितिपदंप्रथमा
र्धेपवितुमुचितं। नाशयंतोघनध्वांतंतापयंतोवियोगिनः। पतंतिशशिनःपादाभासाभासयतःक्ष्मातलं। अत्रचतुर्थःपादो
वाक्यसमाप्तावपिपुनरुक्तः अलवन्मतसंबंधोयथा। याजयश्रीर्मनोजस्ययया जगदलंकृतं। यामेणाक्षीविनाप्राणाविफला॥
मेकृतोद्यमा। अत्रयच्छब्दनिर्दिष्टानांवाक्यानांपरस्परनिरपेक्षत्वात्तदेकांतःपातिनाएणाक्षीशब्देनअन्येषांसंबंधःकविनिरत्नि
मतोपिनोपपद्यतइतियाविनामीहथाप्राणाएणाक्षीसाकृतोद्यमेइतितच्छब्दनिर्दिष्टवाक्यैःसंबंधोघटते ॥ यथावा ॥ ईक्षसेयत्क
टाक्षेणतदाधन्वीमनोभवः। अत्रयदित्यस्यतदेत्यनेनसंबंधोनघटते। ईक्षसेचेदितियुक्तःपाठः। यथावाज्योत्स्नाचयःपयःपू
रस्तारकाःकैरवाणिच। राजतेव्योमकासाररराजहंसःसुधाकरः। अत्रकासारशब्दस्यसमासगुणीभावात्तदर्थस्यनसर्वैःसं
योगः। विधेयाविमर्शोयदेवाविमृष्टंतदेवतुष्टइदंतुप्रधानस्यकासारपदार्थस्यप्राधान्येनाप्रतीतेःसर्वोपिपयःपूरादिपदार्थ
स्तदंगतयानप्रतीयतइतिसर्ववाक्यार्थविरोधावभासइत्युभयोर्भेदः। अनेनछिंदतामातुःकंठंपरशुनातवः। बद्धस्पर्धःकृपा
णोयंलज्जतेममभार्गव। अत्रभार्गवनिंदायांप्रयुक्तस्यमातृकंठच्छेदनस्यपरशुनासहसंबंधोनयुक्तइतिप्राच्याः। परशुनिं

दामुख्येन मार्गवनिंदाधिक्यमेववैदग्ध्यंद्योतयतीत्याधुनिकाः ॥ अक्रमता यथा ॥ समय एव करोति बलाबलं प्रणिगदंत इती
वशरीरिणां शरदि हंसरवाः परुषीकृतस्वरमयूरमयूरमणीयतां । अत्र परामृष्टवाक्यानंतरमेवेति शब्दो युक्तः । न तु प्रणिग
दंत इत्यनंतरं । एवं द्वयगतं संप्रति शोचनीयतां समागमप्रार्थनया कपालिनः । कला च सा कांतिमती कलावतस्त्वमस्य लोक
स्य च नेत्रकौमुदी । अत्र त्वमित्यनंतरमेव चकारो युक्तः ॥ अमतपरार्थता यथा ॥ राममन्मथशरेण ताडिता दुःसहेन हृदये
निशाचरी । गंधवद्रुधिरचंदनोक्षिता जीवितेशवसतिं जगाम सा । अत्र शृंगाररसव्यंजको द्वितीयोऽर्थः प्रकृतरसविरोधित्वाद
निष्टः ॥ वाच्यानभिधानं यथा ॥ व्यतिक्रमलवं कं मे वीक्ष्य वामाक्षि कुप्यसि । अत्र व्यतिक्रमलवमपीत्यपिरवश्यं वक्तव्यो नोक्तः
न्यूनपदत्वे वाचकपदस्यैव न्यूनता विवक्षिता अत्र पेक्षस्तु न तथात्वमिति भेदः । एवमन्यत्रापि । यथा वा । चरणानतकांतायास्तन्वि
कोपस्तथापि ते । अत्र चरणानतकांतासीति वाच्यं । नग्नप्रक्रमता यथा । एवमुक्तो मंत्रिमुख्यैः रावणः प्रत्यभाषत । अत्र वचधातु
नाक्रांतं वचनमपि तेनैव वक्तुमुचितं । तेन रावणः प्रत्यवोचतेति युक्तः पाठः । एवं च सति न कथितपदत्वं दोषः तस्योद्देश्यप्र
तिनिर्देश्यव्यतिरिक्तविषयत्वात् इदं हि वचनप्रतिवचनयोरुद्देश्यप्रतिनिर्देश्यत्वं ॥ यथा ॥ उदेति सविता ताम्रस्ताम्र एवास्त
मेति च । इत्यत्र यदि रक्त एवेति पदांतरेण स एवार्थः प्रतिपाद्यते तदान्योऽर्थ इव प्रतिभासमानः प्रतीतिं स्थगयति । यथा वा । ते हि
मालयमामंत्र्य पुनः प्रेक्ष्य च शूलिनः । सिद्धं चास्मै निवेद्यार्थं तद्विसृष्टाः खमुद्ययुः । अत्रास्मा इतीदमा प्राक्रांतस्य तेनैव तत्समा ६१

नास्यामेतदद: । शब्दास्त्वावापरामर्शो ह्युक्तो न तच्छब्देन । यथा वा । उदन्वच्छिन्ना भूः स च पतिरपां योजनशतं । अत्र मिता भूः पत्या
पां स च पतिरपामिति युक्तः पाठः । एवं यशोऽधिगन्तुं सुखलिप्सया वा मनुष्यसंख्यामतिवर्तितुं वा । निरुत्सुकानामभियोगभाजां स
मुत्सुकेवाङ्कमुपैति सिद्धिः । अत्र सुखमीहितुमित्युचितं । अत्राद्ययोः प्रकृतिविषयः प्रक्रमभेदः तृतीये पर्यायविषयः चतुर्थे प्रत्य
यविषयः एवमन्यत्र ॥ प्रसिद्धित्यागो यथा ॥ घोरो वारिमुचां रवः ॥ अत्र मेघानां गर्जितमेव प्रसिद्धं यथाहुः । मंजीरादिषु रणित
प्रायं पक्षिषु कूजितप्रभृति स्तनितमणितादि सुरते मेघादिषु गर्जितप्रमुखमित्यादि । अस्थानस्थपदता यथा । तीर्थे तदीये गज
सेतुबंधात्प्रतीपगामुत्तरतोस्य गंगां । अयत्नबालव्यजनीबभूवुर्हंसा नभोलंघनलोलपक्षाः । अत्र तदीयामिति पदात्पूर्वं गंगा
मित्यस्य पाठो युक्तः । एवं हितान्न यः संशृणुते स किंप्रभुः । अत्र संशृणुत इत्यतः पूर्वं नञः स्थितिरुचिता । अत्र पदमात्रस्यास्थान
निवेशेपि सर्वमेव वाक्यं विवक्षितार्थप्रत्यायने मन्थरमिति वाक्यदोषता । एवमन्यत्रापि । इदं केप्याहुः । पदशब्देन वाचकमेव
प्रायो निगद्यते न च नञो वाचकता निर्विवादा तस्यास्तन्त्रेणार्थबोधनविरहादिति । यथा द्वयं गतमित्यादौ त्वमित्यनन्तरं चकारा
नुपादानादक्रमता तथात्रापीति । अस्थानस्थसमासता यथा । अद्यापि स्तनशैलदुर्गविषमे सीमन्तिनीनां हृदि स्थातुं वाञ्छति
मान एष धिगिति क्रोधादिवालोहितः । उद्यद्दूरतरप्रसारितकरः कर्षत्यसौ तत्क्षणात्फुल्लत्कैरवकोशनिःसरदलिश्रेणीकृ
पाणीं शशी । अत्र कोपिन उक्तौ समासो न कृतः कवेरुक्तौ तु कृतः । वाक्यान्तरपदानां वाक्यान्तरेऽनुप्रवेशः संकीर्णत्वं यथा । मुंच

चंडंकुरंगाक्षिपद्मप्रमाणंनन्तोंगणे। अत्रनत्तोंगणेचंडंपद्मप्रमाणंमुचेतियुक्तं। क्लिष्टत्वमेकवाक्यविषयमित्यस्माद्भिन्नं। वा॥
क्यातरेवाक्यांतरानुप्रवेशोगर्भितता॥ यथा॥ रमणेचरणप्रांतेप्रणतिप्रवणेधुना। वदामिसखितेतत्वंकदाचिन्नोचिताःक्रुधः
अर्थदोषानाह। अपुष्टदुःक्रमग्राम्यव्याहताश्लीलकष्टताः। अनवीकृतनिर्हेतुप्रकाशितविरुद्धताः। संदिग्धपुनरुक्तत्वेख्यात
विद्याविरुद्धते। साकांक्षतासहचरभिन्नतास्थानयुक्तता। अविशेषेविशेषश्चानियमेनियमस्तथा। तयोर्विपर्ययौविध्यनुवादा
युक्ततेतथा। निर्मुक्तपुनरुक्तत्वमर्थदोषाःप्रकीर्त्तिताः। तद्विपर्ययौविशेषेऽविशेषोऽनियमेनियमः। तत्रापुष्टत्वंमुख्यानुपका
रित्वं॥ यथा॥ विलोक्यविततेव्योम्निविधुंमुंचरुषंप्रिये। अत्रविततत्वंव्योम्नोमानत्यागंप्रतिनकिंचिदुपकरोति। अधिकपदत्वेपदा
र्थान्वयप्रतीतेःसमकालमेवबाधप्रतिभासःइहतुपश्चादितिविशेषः॥ दुःक्रमतायथा॥ देहिमेवाजिनंराजन्गजेंद्रंवामदाल
सं। अत्रगजेंद्रस्यप्रथमंयाचनमुचितं। स्वपिहित्वंसमीपेमेस्वपिम्येषाधनाप्रिया। अत्रार्थोग्राम्यः। कस्यचित्साद्युत्कर्षमप
कर्षंवाभिधायपश्चात्तदन्यत्वप्रतिपादनंव्याहतत्वंयथा। हरंतिहृदयंयूनांननवेंदुकलादयः। वीक्ष्यतेयैरियंतन्वीलोकलो
चनचंद्रिका। अत्रयेषामिंदुकलानानंददेतुस्तेषामेवानंदायतनस्याचंद्रिकात्वारोपः। हंतुमेवप्रवृत्तस्यस्तब्धस्यविवरैषिणः।
यथास्यजायतेपातोनतथापुनरुन्नतिः। अत्रार्थोऽश्लीलः। वर्षत्येतदहर्पतिर्नतुघनःधामस्थमर्कंपयःसत्यंसासवितुःसुतासु ६८
रसरित्स्रोतोययाप्लावितः। व्यासस्योक्तिषुविश्वसित्यपिनकःश्रद्धानकस्यश्रुतौ। नत्र्यत्येतितथापिमुग्धहरिणीनात्रश्चत्मरीचिःप

यः।अत्रयस्मात्सूर्योवृष्टेर्यत्नुनायाश्चप्रजन्तवस्तस्मात्तयोर्जलमपिसूर्यप्रजन्तवंततःसूर्यमरीचीनांजलप्रयोजनहेतुत्वमु
चितंतथापिमृगीभ्रांतत्वात्तत्रजलप्रत्ययंनकरोतीत्ययमप्रस्कृतोर्थोबोधःइत्येवास्मात्प्रस्कृतार्थबोधइतिकष्टार्थत्वं।सदाच
रतिखेन्नानुःसदाचरतिमारुतः।सदाधत्तेऽस्तुवेशेषःसदाधीरोविकत्थनः।अत्रसदेत्यनवीकृतं।अत्रास्यपदस्यपर्यायांतरे
णोपादानेपियदिनान्यद्विच्छित्यंतरंतदास्यदोषस्यसन्नावइतिकथितपदत्वाद्भेदः।नवीकृतत्वंयथास्तानुःसदायुक्तत्वरंग
एवरात्रिंदिवंगंधवहःप्रयाति।विनन्निशेषःसततंधरित्रीषष्टांशहृत्त्वेरपिधर्मएषः।गृहीतंयेनसीःपरित्नवत्तयान्नोज्झितमसि
प्रन्तावाद्यस्यान्नूनंखलुतवकश्चिन्नविषयः।परित्यक्तंतेनत्वमसिसुतशोकान्नतुमयाद्विमोक्ष्येशस्त्रत्वामहमपियतःस्वस्ति
स्तवते।अत्रशस्त्रमोचनेहेतुर्नोक्तइतिनिर्हेतुत्वं।कुमारस्तेधराधीशश्रियंसमधिगच्छति।अत्रत्वंश्रियस्त्वेतिविरुद्धार्थप्रकाश
नात्प्रकाशितविरुद्धत्वं।अचलाअबलावास्तुःसेव्याक्षूतमनीषिणः।अत्रप्रकरणाभावाच्छांतशृंगारिणःकोवक्तेतिनिश्च
याभावात्संदिग्धत्वं।सहसाविदधीतनक्रियामविवेकःपरमापदांपदं।वृणतेहिविमृश्यकारिणंगुणलुब्धाःस्वयमेवसंपदः
अत्रद्वितीयार्धव्यतिरेकेणद्वितीयपादस्यैवार्थइतिपुनरुक्तता।।प्रसिद्धविरुद्धतायथा।।ततश्चचारसमरेसितशूलधरोह
रिः।अत्रहरेःशूलंलोकेऽप्रसिद्धं।यथावा।पादाघातादशोकस्तेसंजातांकुरकंटकः।अत्रपादाघातादशोकपुष्पमेवजा
यतइतिप्रसिद्धंनत्वंकुरइतिकविसमयख्यातिविरुद्धता।अधरेकरजक्षतंमृगाक्ष्याः।अत्रशृंगारशास्त्रविरुद्धत्वाद्विद्यावि

रूढता। एवमन्यशास्त्रविरुद्धत्वमपि। ऐशस्यधनुषोभंगंक्षत्रस्यचसमुन्नतिंस्त्रीरत्नंचकथंनाममृष्यतेभार्गवोधुना। अत्र
स्त्रीरत्नमित्युपेक्षितुमित्याकांक्षते। सज्जनोदुर्गतौमग्नःकामिनीगलितस्तनी। खलःपूज्यःसमज्यायांतापायममचेतसः। अत्र
सज्जनःकामिनीचशोभनौतत्सहचरःखलोऽशोभनइतिसहचरभिन्नत्वं॥ आज्ञाशक्रशिखामणिप्रणयिनीशास्त्राणिचक्षु
र्नवं।भक्तिर्भूतपतौपिनाकिनिपदंलंकेतिदिव्यापुरी। उत्पत्तिर्द्रुहिणान्वयेचतदहोनेदृग्वरोलभ्यतेस्याच्चेदेषनरावणःक्वनु
पुनःसर्वत्रसर्वेगुणाः। अत्रनरावणइत्येतावतैवसमाप्यं। हीरकाणांनिधेरस्यसिंधोःकिंवर्णयामहे॥ अत्ररत्नानांनिधेरित्य
विशेषएववाच्यः। आवर्तएवनाभिस्तेनेत्रेनीलसरोरुहे। तरंगाश्चवलयस्तेनत्वंलावण्याम्बुवापिका। अत्रावर्तएवेतिनियमो
नवाच्यः। यांतिनीलनिचोलिन्योरजनीष्वभिसारिकाः॥ अत्रतमिस्रास्वितिरजनीविशेषोवाच्यः। आपातसुरसेभोगेनिमग्नाः
किंनकुर्वते॥ अत्रापातएवेतिनियमोवाच्यः। ननुवाच्यस्यानभिधानेव्यतिक्रमलवमित्यादौअपरेणावश्यंचैवकारस्येतिको
नयोर्भेदः॥ अत्रनियमस्यावचनमेवदृष्टयुक्तंनियमपरिवृत्तेर्विषयइति। तन्न॥ तथासत्यपिद्वयोःशब्दार्थदोषतायांनियाम
काभावात्तत्कागतिरितिचेत्। व्यतिक्रमलवमित्यादौशब्दोच्चारणानंतरमेवदोषप्रतिभासः। इहत्वर्थप्रत्ययानंतरमिति
भेदः। एवंचशब्दपरिवृत्तिसहत्वासहत्वाभ्यांह्येवैराहतोपिशब्दार्थदोषविभागएवंपर्यवस्यति। योदोषःशब्दपरिवृत्त्यसहः
सशब्ददोषएवयश्चपदार्थान्वयप्रतीतिपूर्वबोध्यःसोपिशब्ददोषः। यश्चार्थप्रतीत्यनंतरंबोध्यःसोर्थाश्रयइति। एवंचानिय ६९

मपरिहृत्यादेरप्यधिकपदत्वादेर्दोषो बोध्यः। अमतपरार्थत्वं तु राममन्मथशरेणेत्यादौ नियमेन वाक्यव्यापित्वान्निश्चायया वा-
क्यदोषता। अश्लीलत्वादौ तु नियमेन वाक्यव्यापित्वं। आनंदितस्वपक्षोसौ परपक्षान् हन्ति निष्पति। अत्र परपक्षं हत्वा स्वपक्ष-
मानंदयिष्यतीति विधेयं। चंडीशचूडाभरणचंद्रलोकतमोपह। विरहिप्राणहरणकदर्थय न मां वृथा। अत्र विरहिप्राणहरणेत्यंशो तृती-
यपादस्यार्थेनानुवाद्यः। लग्नं रागावृतांग्या सुदृढमिह ययैवासियष्ट्यारिकंठे मातंगानामपीहोपरि परपुरुषैर्या च दृष्टा पतं-
ती। तत्सक्तोयं न किंचिद्गणयति विदितं तेस्तु तेनास्मि दत्ता भृत्येभ्यः श्रीनियोगाद्गदितुमिति गतेवांबुधिं यस्य कीर्त्तिः। अत्र वि-
दितं तेस्त्वित्यनेन समापितवचनं तेनेत्यादिना पुनरुपात्तं॥ अथ रसदोषानाह॥ रसस्योक्तिः स्वशब्देन स्थायिसंचारिणोरपि। प-
रिपंथिरसांगस्य विभावादेः परिग्रहः। आक्षेपः कल्पितः कृच्छ्रादनुभावविभावयोः। अकांडे प्रथनच्छेदौ तथा दीप्तिः पुनः पु-
नः। अंगिनोननुसंधानमनंगस्य च कीर्त्तनं। अतिविस्तृतिरंगस्य प्रकृतीनां विपर्ययः। अर्थानौचित्यमन्यच्च दोषा रसगता म-
ताः। रसस्य स्वशब्दो रसशब्दः शृंगारादिशब्दश्च॥ क्रमेण यथा॥ तामुद्वीक्ष्य कुरंगाक्षीं रसो नः कोप्यजायत। चंद्रमंडलमालो-
क्य शृंगारे मग्नमंतरं। स्थायिभावस्य स्वशब्दवाच्यत्वं यथा। अजायत रतिस्तस्यास्त्वयि लोचनगोचरे। व्यभिचारिणः॥ स्वश-
ब्दवाच्यत्वं यथा॥ जाता लज्जावती मुग्धा प्रियस्य परिचुंबने। अत्र प्रथमपादे आसीन्मुकुलिताक्षी सेति लज्जाया अनुभाव-
मुखेन कथने युक्तः पाठः। मानं मा कुरु तन्वंगि ज्ञात्वा यौवनमस्थिरं। अत्र यौवनास्थिरत्वनिवेदनं शृंगारपरिपंथिनः शांतर-

सस्यांगंज्ञातस्यैवचविभावइतितत्परिग्रहोनयुक्तः। धवलयतिशिशिररोचिषिभुवनतलंलोकलोचनानंदे। ईषद्विभ-
कटाक्षास्मेरमुखीसानिरीक्षतेतन्वी। अत्रशृंगाररसस्योद्दीपनालंबनविभावावनुभावपर्यवसायिनौस्थितावितिकष्टक-
ल्पना॥ परिहरतिरतिंमतिंलुनीतेस्खलतितरांपरिवर्त्ततेचभूयः। इतिवतविषमादशास्यदेहंपरिभवतिप्रसभंकिमत्रकु-
र्मः। अत्ररतिपरिहारादीनांकरुणादावपिसंभवात्कामिनीरूपोविभावःकष्टादाक्षेप्यः। अकांडेप्रथनंयथा। वेणीसंहारे
द्वितीयेंकेप्रवर्त्तमानानेकक्षये। दुर्योधनस्यभानुमत्यासहशृंगारप्रथनं। छेदोयथावीरचरितेराघवभार्गवयोर्धाराधिरूढे
ऽन्योन्यसंरंभेकंकणमोचनायगच्छामीतिराघवस्योक्तिः॥ पुनःपुनःदीप्तिर्यथा॥ कुमारसंभवेरतिविलापे। अंगिनोननु-
संधानंयथारत्नावल्यांचतुर्थेंकेबाभ्रव्यागमनेसागरिकायाविस्मृतिः। अनंगस्यकीर्त्तनंयथाकर्पूरमंजर्यांराज्ञानायिक-
यास्वयंकृतंवसंतस्यवर्णनमनादृत्यवंदिवर्णितस्यतस्यप्रशंसा। अंगस्यातिविस्तृतिर्यथाकिरातेसुरांगनाविलासादिः। प्र-
कृतयोदिव्याअदिव्यादिव्यादिव्याश्चतेषांचधीरोदात्तादितातेषामप्युत्तमाधममध्यमत्वंतेषुयोयथाभूतस्तस्यायथावर्णनेप्रकृ-
तिविपर्ययदोषः। यथाधीरोदात्तस्यरामस्यधीरोद्धतवत्छद्मनावालिवधः। यथाकुमारसंभवेउत्तमदेवयोः। पार्वतीपरमेश्व-
रयोःसंभोगशृंगारवर्णनं। इदंहिपित्रोःसंभोगवर्णनमिवात्यंतमनुचितमित्याहुः। अन्यदनौचित्यंदेशकालादीनामयथा-
वर्णनं। तथासतिहिकाव्यस्यासत्यताप्रतिभासेनविनेयानामुन्मुखीकारासंभवः। एभ्यःपृथगलंकारदोषाणांनैवसंभ-

वः। एभ्यः उक्तदोषेभ्यः॥ तथा हि॥ उपमायामसादृश्यासंभवयोरुपमानस्य जातिप्रमाणगतन्यूनत्वाधिकत्वयोरर्थान्तर-
न्यासे उत्प्रेक्षितार्थासमर्थने चानुचितार्थत्वं क्रमेण यथा। ग्रथ्नामि काव्यशशिनं। प्रज्वलज्ज्वलधारावन्निपतन्ति शरास्तव। च-
ण्डाल इव राजासौ संग्रामेऽधिकसाहसः। कर्पूरखंड इव राजति चंद्रबिंबं। दरवन्नीलकंठेयं विराजति शिखानलः। स्तनावद्रिस-
मानौ ते। दिवाकराद्रक्षति यो गुहासु लीनं दिवाभीतमिवांधकारं। क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैःशिरसां सतीव। एवमादि-
षूत्प्रेक्षितार्थस्यासंभूततयैव प्रतिभासनस्वरूपमेवेत्यनुचितं तत्समर्थनं। यमकस्य पादत्रयगतस्याप्रयुक्तत्वं दोषः। यथा
सदसालिङ्गनैः स्निग्धैः सदसाङ्कजमंदिरं। उदिते रजनीनाथे सदसायाति सुंदरी॥ उत्प्रेक्षायां यथा॥ शब्दस्योत्प्रेक्षाद्योतक-
त्वेऽवाचकत्वं यथा। एष मूर्त्तो यथा धर्मः क्षितिपो रक्षति क्षितिं। एवमनुप्रासे वृत्तिविरुद्धस्य प्रतिकूलवर्णत्वं यथा। अवद इव ग्लन
इत्यादौ। उपमायां च साधारणधर्मस्याधिकन्यूनत्वयोरधिकपदत्वं न्यूनत्वयोरधिकपदत्वं न्यूनपदत्वं च। क्रमेणोदाहरणं
। नयनज्योतिषा भाति शंभुर्भूतिसितद्युतिः। विद्युतेव शरन्मेघो नीलवारिदखंडधृक्। अत्र भगवतो नीलकंठत्वस्याप्रतिपाद-
नाच्चतुर्थपादोऽधिकः। कमलालिंगितस्तारहारहारी मुरद्विषन्। विद्युद्विभूषितो नीलजीमूत इव राजते। अत्रोपमानस्य सब-
लाकत्वं वाच्यं। अस्यामेवोपमानोपमेययोर्लिंगवचनभेदस्य कालपुरुषविध्यादिभेदस्य च भग्नप्रक्रमत्वं॥ क्रमेण यथा॥
सुधेव विमलश्चन्द्रमसो रिव। अत्र तथाभूतचित्राचंद्रमसोः शोभा न खल्वासीदपितु सर्वदा नवति। लतेव राजसे तन्वि। अत्र

लताराजतेत्वंतुराजसे।चिरंजीवतुतेसूनुर्मार्कंडेयोमुनिर्यथा।अत्रमार्कंडेयोजीवत्येवनखलुजीवतुतस्यजीवत्वित्यनेनवि
धेय।इदंतुयत्रलिंगवचनभेदेपिनसाधारणधर्मस्यान्यथाभावस्तत्रनदोषः।क्रमेणोदाहरणं।मुखंचंद्रइवाभाति।तद्वेषोऽ
सदृशोन्याभिःस्त्रीभिर्मधुरताभृतः।दधतेस्मपरांशोभांतदीयाविभ्रमाइव।पूर्वोदाहरणेषुतूपमानोपमेययोरेकस्यैवसा
धारणधर्मेणैवान्वयसिद्धेःप्रक्रांतस्यस्फुटमनिर्वाहः।एवमनुप्रासवैफल्यस्यापुष्टार्थत्वं।यथाऽनणुरणन्मणिमेखलमा
विरतसिंजानमंजुमंजीरं।परिसरणमरुणचरणेरणरणकमकारणंकुरुते।एवंसमासोक्तौसाधारणविशेषणवशात्पर
र्थस्यप्रतीतावपिपुनस्तस्यशब्देनोपादानस्याप्रस्तुतप्रशंसायांव्यंजनयैवप्रस्तुतावगतेःशब्देनतदभिधानस्यचपुनरुक्
त्वं॥क्रमेणोदाहरणानि॥अनुरागवंतमपिलोचनयोर्दधतंवपुःसुखमतापकरं।निरकाशयद्रविमपेतवसुंवियदाल
यादपरदिग्गणिका।अत्रापरदिगित्येतावतैवतस्यागणिकात्वंप्रतीयते।आकृष्टेषुविहंगमेषुमशकोनायात्पुरोवार्यतेम
ध्येवाधिकरिवावसंस्तृणमणिर्धत्तेमणीनांरुचं।खद्योतोपिनकल्पतेप्रचलितुंमध्येपितेजस्विनांधिक्सामान्यमचेतनंप्रभुमिवा
नामृष्टतत्वांतरं।अत्राचेतसःप्रभोरभिधानमनुचितं।एवमनुप्रासेपिप्रसिद्ध्यभावस्यख्यातविरुद्धत्वं।चक्राधिष्ठिततांचक्रीगो
त्रंगोत्रभिदुच्छ्रितं।वृषंवृषभकेतुश्चप्रायःछत्रस्यभूभुजः।उक्तदोषाणांक्वचिददोषत्वंक्वचिद्गुणत्वमित्याह।वक्तरिक्रोधसं ७१
युक्तेतथावाच्येसमनुद्धते।रौद्रादौतुरसेत्यंतंदुःश्रवत्वंगुणोभवेत्।एषुचास्वादरूपविशेषात्मकमुख्यगुणप्रकर्षोपकारित्वा

ण इति व्यपदेशो युक्तः। क्रमेणोदाहरणानि॥ तद्विच्छेदकृशस्य कंठलुलितप्राणस्य मे निर्दयं क्रूरः पंचशरः शरैरतिशि-
तैर्भिन्दन्मनो निर्भरं। शंभोर्भूतकृपाविधेयमनसः प्रोद्दामनेत्रानलज्वालाजालकरालितः पुनरसावास्तां समस्तात्मना। अत्र शृं-
गारे कुपितो वक्ता। मूर्द्धव्याधूयमानध्वनदमरधुनीलोलकल्लोलजालोद्धूतांतः क्रोधदंशात्तवसनमभिनन्नः क्लिन्ननद्धत्रलद्ध्य।
ऊर्द्ध्वन्यस्ताघ्रिदंडभ्रमितरररसोद्यन्नभस्वत्स्ववेगग्रांतब्रह्मांडखंडप्रवितरतुश्रुनंदशानवं तांडवं वः। अत्रोद्धतं वाच्यं। इमे पद्येम-
म। रौद्रादिरसेष्वेतद्वितयापेक्षयापि तु: अवस्थमत्यंतगुणः। यथा उत्कृत्योत्कृत्य कृत्तिमित्यादि अत्र वीभत्सो रसः। सुरतारंभगो-
ष्ठ्यादावश्लीलत्वं तथा पुनः। तथा पुनरिति गुण एव। करिहस्तेन संबाधे प्रविश्यांतर्विलोडिते। उपसर्पन्ध्वजः पुंसः साधनांतर्विरा-
जते। अत्र हि सुरतारंभगोष्ठ्याद्यर्थैः पदैः पिशुनयेच्च रहस्यवस्त्विति कामशास्त्रस्थितिः। आदिशब्दाच्छमकथाप्रवृत्तिषु वोऽव्य-
स्यातामदोषौ श्लेषादौ निहतार्थाप्रयुक्तते॥ यथा॥ पर्वतभेदि पवित्रं जैत्रं नरकस्य बहुमतं गहनं। हरिमिव हरिमिव हरिमिव सु-
रसरिद्भः पतन्नमत। अत्रैंद्रपक्षे पवित्रशब्दो निहतार्थः। सिंहपक्षे मतंगशब्दो मातंगार्थेऽप्रयुक्तः। गुणः स्यादप्रतीतत्वज्ञत्वे च वक्तृ-
वाच्ययोः॥ यथा॥ त्वामामनंति प्रकृतिं पुरुषार्थप्रवर्त्तिनीं। तद्दर्शिनमुदासीनं त्वामेव पुरुषं विदुः। स्वयं वापि परामर्शेऽप्रतीतत्व-
गुण इत्यनुषज्यते॥ यथा॥ युक्तः कलाभिस्तमसां विवृद्ध्यै क्षीणश्च ताभिः क्षतये य एषां। शुद्धं निरालंबपदावलंबं तमात्मचंद्रं परि-
शीलयामि। कथितं च पदं पुनः विहितस्यानुवाद्यत्वे विषादे विस्मये क्रुधि। दैन्येऽप्यलाटानुप्रासे नुकंपायां प्रसादने। अर्थांतरसं-

क्रमितवाच्येहर्षेविधारणे। गुणइत्येव। उदेतिसविताताम्रइत्यादिअत्रविदितस्यानुवादः। हंतहंतगतःकांतोवसंतेसखिना
गतःअत्रविषादः। चित्रंचित्रमनाकाशेकथंसुमुखिचंद्रमाःअत्रविस्मयः। सुनयनेनयनेनिधेहिइत्यत्रलाटानुप्रासः। नयनेत
स्यैवनयनेचेत्यर्थांतरसंक्रमितवाच्योध्वनिः। एवमन्यत्र। संदिग्धत्वंतथाव्याजस्तुतिपर्यवसायिचेत्॥ गुणइत्येवयथा॥ इष्टुका
मेस्वरपात्रंभूषितनिःशेषपरिजनंदेव। विलसत्करेणुगहनंसंप्रतिसममावयोःसदनं। वैयाकरणमुख्येचप्रतिपाद्येयनित्तः
कश्चिद्यत्रसंनिहितेननते। अत्रार्थःकष्टः। वैय्याकरणश्चवक्ता। एवमस्यप्रतिपाद्यत्वेपि। अत्रानार्घ्यमुपाध्यायत्वमहंनकदाचन
अत्रदुःश्रवत्वं। वैय्याकरणोवाच्यः। एवमस्यवक्तृत्वेपि। ग्राम्यत्वमधमोक्तिषु गुणः॥ यथामम॥ एसोसहरविंवोदीसइहेअंगवी
णपिंडोय। एएअअस्समोहापडंतिआसासमुद्धधाराव्वइयंविदूषकोक्तिः। निर्हेतुतातुख्यातेर्थेदोषतांनैवगच्छति। यथासंप्रति
समयश्चक्रद्वंद्वानिविघटयति। कवीनांसमयेख्यातेगुणःख्यातविरुद्धता। कविसमयख्यातानिच। मालिन्यंव्योम्निपापेयशसि
धवलतावर्ण्यतेहासकीर्त्योःरक्तौचक्रोधरागौसरिदुदधिगतंपंकजेंदीवरादि। तोयाधारेखिलेपिप्रसरतिचमरालादिकःपक्षि
संघोज्योत्स्नापेयाचकोरैर्जलधरसमयेमानसंयांतिहंसाः। पादाघातादशोकंविकसतिबकुलंयोषितामास्यमद्यैर्यूनामंगेषु
हारःस्फुटतिचहृदयंविप्रयोगस्यतापैः। मौर्वीरोलंबमालाधनुरथविशिखाःकौसुमाःपुष्पकेतोर्भिन्नंस्यादस्यबाणैर्युवजनहृ ७२
दयंस्त्रीकटाक्षेणतद्वत्। अह्न्यंभोजंनिशायांविकसतिकुमुदंचंद्रिकाशुक्लपक्षेमेघध्वांतेषुनृत्यंभवतिचशिखिनांनाप्यशोके

फलं स्यात् । नस्याज्जातीवसंते न च कुसुमफलैर्गंधसारद्रुमाणामित्याद्युन्नेयमन्यत्कविसमयगतं सत्कवीनां प्रबंधे । एषा
मुदाहरणान्याकरेषु बोद्धव्यानि । धनुर्ज्यादिषु शब्देषु शब्दाः धनुरादयः । आरूढत्वादिबोधाय ॥ यथा ॥ द्वरितेरोदसी ध्वानैर्धनु
र्ज्यास्फालनोद्भवैः । अत्र ज्याशब्देनापिगतार्थत्वे धनुःशब्देन ज्यायाः धनुष्यायतीकरणं बोध्यते । आदिशब्दात् । नातिकर्णावतंस
स्ते । अत्र कर्णस्थितत्वबोधनाय कर्णशब्दः । एवं श्रवणकुंडलशिरःशेखरप्रभृतिः । एवं निरूपपदो मालाशब्दः पुष्पस्रजमेवाभिध
त्ते इति स्थितावपि पुष्पमालाविभाति ते । अत्र पुष्पशब्दः उत्कर्षबुध्यै । एवं मुक्ताहारइत्यत्र मुक्ताशब्देनान्यरत्नामिश्रितत्वं प्रयोक्तमाः
स्थिताश्रमी । धनुर्ज्यादियः शब्दाः सत्काव्यस्थिता एव निबद्धव्याः न त्वस्थिता जघनकांचीकरणंकणादयः । उक्तावानंदमग्नादेः स्या
न्न्यूनपदता गुणः ॥ यथा ॥ गाढालिंगनवामनीकृतकुचप्रोद्भिन्नरोमोद्गमा सांद्रस्नेहरसातिरेकविगलच्छ्रीमन्नितंबांबरा । मामा ।
मानदमातिमामलमितिक्षामाक्षरोल्लापिनी सुप्ता किंनु मृता नु किं मनसि मे लीना विलीना नु किं । क्वचिन्न दोषो न गुणः न्यूनपद
मित्येव ॥ यथा ॥ तिष्ठेत्कोपवशात्प्रभावपिहिता दीर्घं न सा कुप्यति स्वर्गायोत्पतिता भवेन्मयि पुनर्भावार्द्रमस्या मनः । तां हर्तुं वि
बुधद्विषोपि न च मे शक्ताः पुरोवर्तिनी सा चात्यंतमगोचरं नयनयोर्यातेति कोयं विधिः । अत्र पिहितेति त्वेदित्यनंतरं नैतद्युतइ
तिपदानि न्यूनानि । एषां च पदानां न्यूनतायामप्येतद्वाक्यव्यंग्यस्य वितर्काख्यव्यभिचारिणावस्योत्कर्षीकरणान्न गुणः दीर्घं न से
त्यादिवाक्यजन्यया च प्रतिपत्त्या तिष्ठेदित्यादिवाक्यप्रतिपत्तेर्बाधः स्फुटमेवावभासत इति न दोषः । गुणः क्वाप्यधिकं पदं । यथा

आचरतिदुर्जनोयत्सहसामनसोप्यगोचरानर्थान्। तन्ननजानेजानेस्पृशतिमनःकिंतुनैवनिष्ठुरतां। अत्रननजानेइत्यने
नायोगव्यवछेदोद्वितीयजानेइत्यनेनाहमेवजानेइत्यन्ययोगव्यवछेदादिछित्तिविशेषः समाप्तपुनरात्तत्वंनदोषोनगुणः
क्वचित्॥यथा॥अन्यास्तागुणरत्नेत्यादि। अत्रप्रथमार्द्धेनवाक्यसमाप्तावपिद्वितीयार्द्धवाक्यंपुनरुपात्तं। एवंचविशेषणमात्र
स्यपुनरुपादानेसमाप्तपुनरात्तत्वंनवाक्यांतरस्येतिज्ञेयं। गर्भितत्वंगुणःक्वापि। यथादिग्मातंगघटाविभक्तचतुराघाटाम
हीसाध्यतेसिद्धासापिवदंतएवहिवयंरोमांचिताःपश्यत। विप्रायप्रतिपाद्यतेकिमपरंरामायतस्मैनमोयस्मात्प्रादुरभूत्क
थाद्भुतमिदंयत्रैवचास्तंगतं। अत्रवदंतएवेत्यादिवाक्यंवाक्यांतरप्रवेशाच्चमत्कारातिशयंपुष्णाति। पतत्प्रकर्षतातथा। त
थेतिक्वचिद्गुणः। यथाचंचद्भुजेत्यादि। अत्रचतुर्थपादेसुकुमारार्थतयाशब्दाडंबरत्यागोगुणः। क्वचिदुक्तौस्वशब्देननदो
षोव्यभिचारिणः। अनुभावविभावाभ्यांरचनायत्रनोचिता। यत्रानुभावविभावमुखेनप्रतिपादनेविशदप्रतीतिर्नास्ति। यत्र
चविभावानुभावकृतपुष्टिराहित्यमेवानुगुणंतत्रव्यभिचारिणःस्वशब्देनोक्तौनदोषः। यथाऔत्सुक्येनकृतत्वरासहभुवा
व्यावर्त्तमानाह्रियातैस्तैर्बंधुवधूजनस्यवचनैर्नीताभिमुख्यंपुनः। दृष्ट्वाग्रेवरमात्तसाध्वसरसागौरीनवेसंगमेसंरोहत्पुल
काहरेणहसताश्लिष्टाशिवायास्तुवः। औत्सुक्यस्यत्वरारूपानुभावमुखेनप्रतिपादनेनझटितिप्रतीतिः। त्वरायाःस्नयादिना १३
पिसंभवात्। ह्रियोनुभावस्यचव्यावर्त्तनस्यचकोपादिनापिसंभवः। साध्वसहासयोस्तुविभावादिपरिपोषकस्यप्रकृतरस

इतिकुलश्लाघ्यत्वादित्येषांस्वशब्दाभिधानमेवनास्य।संचार्यादेर्विरुद्धस्यबाध्यत्वेनवचोगुणः॥यथा॥क्वाकार्यंशशलक्ष्म
णइत्यादि।अत्रप्रशमांगानांवितर्कमतिशंकाधृतीनामभिलाषादौत्सुक्यस्मृतिदैन्यचिंतानिस्तिरस्कारः।पर्यंतेचिंताप्रधाने
मास्वादप्रकर्षमाविर्भावयति।विरोधिनोपिस्मरणेसामान्येनवचनेपिवा।भवेद्विरोधोनान्योन्यमंगिन्यंगत्वमाप्तयोः॥क्रमेण
यथाऽयंसरसनोत्कर्षीत्यादि।अत्रालंबनविच्छेदेनरतेररसात्मतयास्मर्यमाणानांतदंगानांशोकोद्दीपकतयाकरुणा
नुकूलता।सरागयास्रुतघनघर्मतोययाकराहतिध्वनितपृथूरुपीठया।मुहुर्मुहुर्दशनविखंडितोष्ठयारुषानृपाःप्रियतम
येवभेजिरे।अत्रसंभोगशृंगारोवर्णनीयस्यवीरव्यभिचारिणःक्रोधस्यानुभावसाम्येनविवक्षितः।एवंध्याननिमीलनान्मु
कुलितप्रायंद्वितीयंपुनःपार्वत्यावदनांबुजस्तनतटेसंभोगलाभालसं।अन्यद्दूरविकृष्टचापमदनक्रोधानलोद्दीपितंशं
भोर्भिन्नरसंसमाधिसमयेनेत्रत्रयंपातुनः।अत्रशांतशृंगाररौद्ररसपरिपुष्टाभगवद्विषयारतिः।यथाक्षिप्तोहस्ताव
लग्नःप्रसभमभिहतोप्याददानोंशुकांतंगृह्णन्केशेष्वपास्तश्चरणनिपतितोनेक्षितःसंभ्रमेण।आलिंगन्योवधूतस्त्रिपुर
युवतिभिःसाश्रुनेत्रोत्पलाभिःकामीवार्द्रापराधःसदहतुदुरितंशांभवोवःशराग्निः।अत्रकविगताभगवद्विषयारतिःप्र
धानंतस्यपरिपोषकतयाभगवतस्त्रिपुरध्वंसंप्रत्युत्साहस्यापरिपुष्टतयारसपदवीमप्राप्ततयाभावमात्रस्यकरुणोंगं॥
तस्यचकामीवेतिसाम्यबलादायातःशृंगारः।एवंचविश्रांतिधामतयाकरुणस्याप्यंगतैवेतिद्वयोरपिकरुणशृंगारयो

र्गवत्तस्मादपरिपुष्टतद्विषयरतिभावास्वादप्रकर्षतयायौगपद्यसद्भावादंगत्वेननविरोधः।ननुसमूहालंबनात्मक
पूर्णघनानंदस्वरूपस्यरसस्यतादृशेनकथंविरोधःसंभावनीयः।एकवाक्यनिवेशप्राप्तयोरप्ययौगपद्यविरहेणपरस्प
रोपमर्दकत्वानुपपत्तेः।नाप्यंगांगिभावः।द्वयोरपिपूर्णतयास्वातंत्र्येणविश्रान्तेः।सत्यमुक्तं।अतएवात्रप्रधानेतरेषुरसेषु
स्वातंत्र्यविश्रामराहित्यात्पूर्णरसभावमात्राद्विलक्षणतयासंचारिरसनाम्नाव्यपदेशःप्राच्यानामस्मत्पितामहानुज
कविपंडितमुख्यश्रीचंडीदासपादानांतुखंडरसनाम्ना॥यदाहुः॥अंगंबाध्योथसंसर्गीयद्यंगीस्याद्रसांतरे।नास्वाद्यते
समग्रंयत्ततःखंडरसःस्मृतइति।नन्वाद्यःकरुणबीभत्सरौद्रवीरभयानकैरित्युक्तनयेनविरोधिनोर्वीरशृंगारयोःक
थमेकत्र।कपोलेजानक्याःकरिकलभदंतद्युतिमुषिस्मरस्मेरस्फारोड्डमरपुलकंवक्त्रकमलं।मुहुःपश्यन्शृण्वन्रजनि
चरसेनाकलकलंजटाजूटग्रंथिंद्रढयतिरघूणांपरिवृढः।इत्यादौसंनिवेशः।अत्रोच्यते।इहखलुरसानांविरोधितायाअवि
रोधितायाश्चत्रिविधाव्यवस्था।कयोश्चिदालंबनैक्येनकयोश्चिदाश्रयैक्येनकयोश्चिन्नैरंतर्येणेति।तत्रवीरशृंगारयोरालंब
नैक्येनविरोधः।तथाहास्यरौद्रबीभत्सैःसंभोगस्यवीरकरुणरौद्रादिभिर्विप्रलंभस्यालंबनैक्येनाश्रयैक्येनचवीरभयानक
योर्नैरंतर्यविभावैक्याभ्यांशांतशृंगारयोः।त्रिधाप्यविरोधोवीरस्याद्भुतरौद्राभ्यांशृंगारस्याद्भुतेनभयानकस्यबीभत्सेनेति ७४
तेनात्रवीरशृंगारयोर्भिन्नालंबनत्वान्नविरोधः।एवंचवीरस्यनायकनिष्ठत्वेनतिवधेभिन्नाश्रयत्वेननविरोधः।यच्चनागानंदे

शामाश्रयस्यापि जीमूतवाहनस्य मलयवत्यनुरागो दर्शितः। तत्राहो गीतमहो वादित्रमित्यद्भुतस्यांतरा निवेशनान्नैरंत
र्याभावान्न शांतशृंगारयोर्विरोधः। एवमन्यदपि ज्ञेयं। पांडुक्षामं वदनमित्यादौ च पांडुतादीनामंगत्वावः करुणविप्रलंभेपी
ति न विरोधः। अनुकारे च सर्वेषां दोषाणां नैव संभवः। सर्वेषां तु अश्लीलत्वप्रवृत्तीनां॥ यथा॥ एष दुश्च्यवनं नौमि इत्यादि जल्पति
कश्चन। अत्र दुश्च्यवनशब्दोऽप्रयुक्तः। अन्येषामपि दोषाणामित्यौचित्यान्मनीषिभिः। अदोषता च गुणता ज्ञेया चानुभयात्म
ता। अनुभयात्मताऽदोषगुणात्मता॥ ॥इति श्रीमद्विश्वनाथकविराजविरचिते साहित्यदर्पणे दोषनिरूपणो नाम सप्त
मः परिच्छेदः॥७॥ ॥गुणानाह॥ ॥रसस्यांगित्वमाप्तस्य धर्माः शौर्यादयो यथा। गुणाः। यथा खल्वंगित्वमाप्तस्यात्मनः
उत्कर्षहेतुत्वाच्छौर्यादयो गुणशब्दवाच्यास्तथा काव्येंगित्वमाप्तस्य रसस्य धर्माः स्वरूपविशेषा माधुर्यादयोपि स्वसमर्थक
पदसंदर्भस्य काव्यपदस्यौपयिकानुगुणभाज इत्यर्थः। यथा चैषां रसमात्रस्य धर्मत्वं तथा दर्शितमेव। माधुर्यमोजोथ प्रसा
द इति ते त्रिधा। तत्र। चित्तद्रवीभावमयो ह्लादो माधुर्यमुच्यते। यत्तु ध्वनिकेनोक्तं द्रुतिकारणमिति। तन्न। द्रवीभावस्यास्वादरू
पाह्लादाभिन्नत्वेन तत्कार्यस्याभावात्। द्रवीभावश्चास्वादस्य विकाराविष्टत्वात्मकः काठिन्यमन्युक्रोधादिकृतदीप्तत्वविस्मयहा
साद्युपहितविक्षेपपरित्यागेन रसाद्याकारानुविद्धानंदोद्बोधेन सहृदयचित्तस्यार्द्रप्रायत्वं। तच्च संभोगे करुणे विप्रलंभे शांते
तेधिकं क्रमात्। संभोगादिशब्दाः उपलक्षणानि। तेन संभोगाभासादिष्वप्येतस्य स्थितिर्ज्ञेया। मूर्ध्नि वर्गांत्यवर्णेन युक्ताष्टठड

ढढ्विना। रणौलघूचतद्यक्तौवर्णाःकारणतांगताः। अवृत्तिर्मध्यवृत्तिर्वामधुरारचनातथा। यथा अनंगमंगलभुवस्तदपां
गस्यरंगयः जनयंतिमुहुर्यूनामंतःसंतापसंततिं॥ यथावामम॥ लताकुंजंगुंजन्मदवदलिपुंजंचपलयन्समालिंगन्नंगंद्रु
ततरमनंगंप्रवलयन्। मरुन्मंदंमंदंदलितमरविंदंतरलयन्रजोवृंदंविंदन्किरतिमकरंदंदिशिदिशि। ओजश्चित्तस्यविस्ता
ररूपंदीप्तत्वमुच्यते। वीरवीभत्सरौद्रेषुक्रमेणाधिक्यमस्यतु। अस्यओजसः। अत्रापिवीरादिशब्दाउपलक्षणानि। तेनवीरा
भासादावप्यस्यस्थितिः। वर्गस्याद्यतृतीयाभ्यांयुक्तौवर्णौतदंतिमौ। उपर्यधोद्वयोर्वासरेफौटठडढैःसहशकारश्चषकारश्च
तस्यव्यंजकतांगताः। तथासमासोवहुलोघटनौद्धत्यशालिनी। यथाचंचद्भुजेत्यादि। चित्तंव्याप्नोतियःक्षिप्रंशुष्केंधनमिवा
नलः। सप्रसादःसमस्तेषुरसेषुरचनासुच। व्याप्नोतिआविःकरोति। शब्दास्तद्व्यंजकाअर्थबोधकाःश्रुतिमात्रतः। यथा। सूची
मुखेनसकृदेवकृतव्रणस्त्वंमुक्ताकलापलुठसिस्तनयोःप्रियायाः। वाणैःस्मरस्यशतशोविनिकृत्तमर्मास्वप्नेपितांकथमहं
नविलोकयामि। एषांशब्दगुणत्वंचगुणवृत्त्योच्यतेबुधैः। शरीरस्यशौर्यादिगुणयोगइवेतिशेषः। श्लेषःसमाधिरौदार्यंप्र
सादइतियेपुनः॥ गुणाश्चिरंतनैरुक्ताओजस्यंतर्भवंतिते॥ ओजःशब्दवाच्येशब्दार्थधर्मविशेषे। तत्रश्लेषोवहूनामपिपदा
नामेकवद्भासनात्मा॥ यथाउन्मज्जज्जलकुंजरेंद्ररभसास्फालानुवंधोद्धतःसर्वाः पर्वतकंदरोदरभुवःकुर्वन्प्रतिध्वानिनीः ७५
उच्चैरुच्चरतिध्वनिःश्रुतिपथोन्माथीयथायंतथाप्रायःप्रेंखदसंख्यशंखधवलावेलयमुद्गच्छति। अयंवंधवैकट्यात्मक

त्वादोज एव । समाधिरारोहावरोहक्रमरूपः आरोह उत्कर्षो परोहोपकर्षः तयोः क्रमो वैरस्यानावहो विन्यासः । यथा चं-
चञ्चज्जेत्यादि । अत्र पादत्रये क्रमेणवंधस्य गाढता चतुर्थपादे त्वपकर्षश्च तथापि च तीव्रप्रयत्नोच्चार्यतया ओजस्विता । उदा-
रता च विकटत्वलक्षणा । विकटत्वं च पदानां नृत्यप्रायत्वं । यथा । स्वचरणनिविष्टैर्नूपुरैर्नर्त्तकीनां झणितिरणितमासीत्तत्र
चित्रं कलं च । अत्र च तन्मतानुसारेण रसानुसंधानमंतरेणैव शब्दप्रौढोक्तिमात्रेणौजः प्रसादश्चौजमिश्रशैथिल्यात्मा ॥ य-
था ॥ यो यः शस्त्रं बिभर्ति स्वभुजगुरुमदः पांडवानां चमूनां यो यः पांचालगोत्रे शिशुरधिकवया गर्भशय्यां गतो वा । यो य-
स्तत्कर्मसाक्षी चरति मयि रणे यश्च यश्च प्रतीपः । क्रोधांधस्तस्य स्वयमिह जगतामंतकस्यांतकोहं । माधुर्यव्यंजकत्वं य-
दसमासस्य वर्णितं । पृथक्पदत्वं माधुर्ये तेनैवांगीकृतं पुनः ॥ यथा ॥ श्वासान्मुंचतीत्यादि । अर्थव्यक्तेः प्रसादाख्यगुणेनै-
व परिग्रहः अर्थव्यक्तिः पदार्थानां झटितिप्रत्यर्थसमर्पणं । स्पष्टमुदाहरणं । ग्राम्यदुःश्रवतात्यागात्कांतिश्च सुकुमारता अंगीकृ-
तेति संबंधः । कांतिरौज्वल्यं । तच्च हालिकादिपदविन्यासवैपरीत्येन लौकिकशोभाशालित्वं । सुकुमारताऽपारुष्यं । अनयो-
रुदाहरणे स्पष्टे । क्वचिद्दोषस्तु समता मार्गाभेदस्वरूपिणी । अन्यथोक्तगुणेष्वस्यांतःपातो यथायथं । मसृणेन विकटेन
वा मार्गेणोपक्रांतस्य संदर्भस्य तेनैव परिनिष्ठानं मार्गाभेदः । स च क्वचिद्दोषः ॥ तथाहि ॥ अरूढागमरूढपाणिजवरालोगं च
विद्रवत्तु पारींद्रः शिशुरेष पाणिपुटके संमातु किं तावता । उद्यद्दुर्द्धरगंधसिंधुरशतप्रोद्दामदानार्णवस्रोतःशोषणरोषणा

साहित्यदर्पण
७६
76

त्तुनरितः कल्याग्निरन्यायते। अत्रोद्धतार्थे वाच्ये सुकुमारवर्णत्यागो गुण एव। अनेवंविधे तु स्थाने माधुर्यादावेवांतःपा-
तः। यथा लताकुंजं गुंजन्नित्यादि। ओजः प्रसादो माधुर्यं सौकुमार्यमुदारता। तदभावस्य दोषत्वात्स्वीकृता अर्थगा गुणाः॥
ओजः साभिप्रायत्वरूपं प्रसादोर्थवैमल्यं। माधुर्यमुक्तिवैचित्र्यं सौकुमार्यमपारुष्यं। उदारताऽग्राम्यत्वं एषां पंचानामप्य-
र्थगुणानां यथाक्रमं अपुष्टार्थाधिकपदानवीकृतामंगलरूपाश्लीलग्राम्यतानां निराकरणेनांगीकारः स्पष्टान्युदाहरणा-
नि। अर्थव्यक्तिः स्वभावोक्त्यलंकारेण तथा पुनः। रसध्वनिगुणीभूतव्यंग्यास्यां कांतिनामकः। अंगीकृत इति संबंधः। अ-
र्थव्यक्तिर्वस्तुस्वभावस्फुटत्वं कांतिर्दीप्तरसत्वं स्पष्टान्युदाहरणानि। श्लेषो विचित्रतामात्रमदोषः समता परं। श्लेषः क्रम-
कौटिल्यानुल्बणत्वोपपत्तियोगरूपघटनात्मा। तत्र क्रमः क्रियासंततिः विदग्धचेष्टितं कौशल्यं। अप्रसिद्धवर्णनाविरहोऽनु-
ल्बणत्वं उपपादकयुक्तिविन्यास उपपत्तिः एषां योगः संमेलनं स एव रूपं यस्याः घटनायास्तद्रूपः श्लेषो वैचित्र्यमात्रं। अन-
न्यसाधारणरसोपकारित्वातिशयविरहादिति भावः॥ यथा॥ दृष्ट्वैकासनसंस्थिते प्रियतमे पश्चादुपेत्यादरादेकस्या नय-
ने निमील्य विहितक्रीडेत्यादौ अत्र दर्शनादयः क्रियाः उत्तरय समर्थनरूपं कौटिल्यं। लोकसंव्यवहाररूपमनुल्बणत्वं
एकासनसंस्थितिपश्चादुपेत्य नयने निमील्य ईषद्वक्रितकंधर इति चोपपादकानि एषां योगः। अनेन च वाक्योपपत्तिर्यद्व-
णव्यग्रतया रसास्वादो व्यवहितप्राय इत्यस्यागुणता। समता च प्रक्रांतप्रकृतिप्रत्ययाविपर्यासेनार्थस्यविसंवादिता विर- ७६

हः। सचश्रुक्रमनंगरूपदोषविरहएव। स्पष्टमुदाहरणं। नगुणत्वंसमाधेश्च। समाधिश्चायोन्यन्यच्छायायोनिरूपद्विविधा
र्थदृष्टिरूपः तत्रायोनिरर्थोयथा। सद्योमुंडितमत्तहूणचिबुकप्रस्पर्धिनारंगकं। अन्यच्छायायोनिर्यथा॥ निजनयनप्रति-
बिंबैरंबुनिबहुशः प्रतारितातन्वी। नीलोत्पलेपिविमृशतिकरमर्पयितुंकुसुमलावी॥ अत्रनीलोत्पलनयनयोरतिप्रसिद्धंसादृ
श्यंविच्छित्तिविशेषेणनिबद्धं। अस्यचासाधारणशोभानाधायकत्वान्नगुणत्वंकिंतुकाव्यशरीरमात्रनिर्वर्तकत्वं। क्वचिद्भमि
तिवक्तव्येअत्रेर्नयनसमुत्थंज्योतिरितिवाक्यवचनं। क्वचिन्निदाघशीतलाहिमकालोष्णसुकुमारशरीरावरयोषिदितिवाक्या
र्थेवरवर्णिनीतिपदाभिधानं। क्वचिदेकस्यवाक्यस्यकिंचिद्विशेषनिवेशादनेकैर्वाक्यैरभिधानमित्येवंरूपोव्यासः। क्वचिद्बहुप्र
तिपाद्यस्यैकवाक्येनाभिधानमित्येवंरूपः समासश्चेत्येवमादीनामप्यन्यैरुक्तानामपिनार्थगुणत्वमुचितंअपितुवैचित्र्यमात्राव
हत्वं। तेननार्थगुणाःपृथक्। तेनोक्तप्रकारेणार्थगुणाःओजःप्रभृतयःपरोक्ताः॥ ॥इतिश्रीसाहित्यदर्पणेगुणविवेचनोना
माष्टमःपरिच्छेदः॥ ॥अथोद्देशक्रमप्राप्तमप्यलंकारनिरूपणंवक्तव्यत्वेनोल्लंघ्यरीतिमाह॥ पदसंघटनारीतिरंगसंस्था
नविशेषवत्। उपकर्त्रीरसादीनां। रसादीनामर्थात्शब्दार्थशरीरस्यकाव्यस्यात्मभूतानां। सापुनःस्याच्चतुर्विधा। वैदर्भीचाथ
गौडीचपांचालीलाटिकातथा। सारीतिः। तत्र। माधुर्यव्यंजकैर्वर्णैःरचनाललितात्मिका। अवृत्तिरल्पवृत्तिर्वावैदर्भीरीतिरिष्य
ते। यथाअनंगमंगलभुवइत्यादि। रुद्रटस्त्वाह। असमस्तैकसमस्तायुक्तादशभिर्गुणैश्चवैदर्भी। वर्गद्वितीयबहुलास्वल्पप्रा

साहित्यदर्पण
७७

णाङ्करावस्तुविधेया। अत्रदशगुणास्तन्मतोक्ताःश्लेषादयः। ओजःप्रकाशकैर्वर्णैर्बंधआडंबरःपुनः। समासबहुलागौडी
यथाचञ्चद्भुजेत्यादि। पुरुषोत्तमस्त्वाह। बहुतरसमासयुक्तासुमहाप्राणाक्षराचगौडीया। रीतिरनुप्रासमहिमपरतंत्रास्तोक
वाक्याच। वर्णैःशेषैःपुनर्द्वयोः। समस्तपंचषपदोबंधःपांचालिकामता। द्वयोर्वैदर्भीगौड्योः॥ यथा॥ मधुरयामधुबोधितमाधवी
मधुसमृद्धिसमेधितमेधया। मधुकरांगनयामुहुरुन्मदध्वनिभृतानिभृताक्षरमुज्जगे॥ भोजस्त्वाह। समस्तपंचषपदामोजः
कांतिसमन्वितां। मधुरांचपांचालींकवयोविदुः। लाटीतुरीतिवैदर्भीपांचाल्योरंतरेस्थिता। यथा॥ अयमुदयतिमुद्राभंजनःप
द्मिनीनामुदयगिरिवनालीबालमंदारपुष्पं। विरहविधुरकोकद्वंद्वबंधुर्विभिंदन्कुपितकपिकपोलक्रोडताम्रस्तमांसि।
कश्चिदाह। मृदुपदसमाससुभगायुक्तैर्वर्णैर्नचातिभूयिष्ठा। उचितविशेषणपूरितवस्तुन्यासाभवेल्लाटी। अन्येत्वाहुः। गौडीडं
बरबंधास्याद्वैदर्भीललितक्रमा। पांचालीमिश्रभावेनलाटीतुमृदुभिःपदैः। क्वचित्तुवक्त्राद्यौचित्यादन्यथारचनादयः। वक्त्रादीत्या
दिशब्दाद्वाच्यप्रबंधौ। रचनादीत्यादिशब्दाद्वृत्तिवर्णौ। तत्रवक्त्रौचित्याद्यथा। मंथायस्तार्णवांभःप्लुतकुहरचलन्मंदरध्वानदीर्घः
कोणाघातेषुगर्जत्प्रलयघनघटान्योन्यसंघट्टचंडः। कृष्णाक्रोधाग्रदूतःकुरुकुलनिधनोत्पातनिर्घातवातःकेनास्मत्सिंहना
दप्रतिरसितसखोदुंदुभिस्ताडितोयं। अत्रवाच्यस्यक्रोधाद्यव्यंजकत्वेपिभीमसेनवक्तृत्वेनोद्धतारचनादयः। वाच्यौचित्याद्यथो ७७
दाहृतेमूर्द्धव्याधूयमानेत्यादौ॥ प्रबंधौचित्याद्यथा॥ नाटकादौरौद्रेप्यभिनयप्रतिकूलत्वेननदीर्घसमासादयः। एवमाख्यायि

काष्ठंगारेऽपि नमसृणा वर्णादयः। कथायां रौद्रेऽपि नात्यन्तमुद्धताः। एवमन्यदपि ज्ञेयं॥ ॥इति श्रीमद्विश्वनाथकविराजकृ
तौ साहित्यदर्पणे रीतिविवेको नाम नवमः परिच्छेदः॥९॥ ॥अथावसरप्राप्तानलंकारानाह॥ ॥शब्दार्थयोरस्थिरा ये
धर्माः शोभातिशायिनः। रसादीनुपकुर्वन्तोऽलंकारास्तेऽङ्गदादिवत्। यथाङ्गदादयः शरीरशोभातिशायिनः शरीरिणमलंकुर्व
न्ति तथानुप्रासोपमादयः शब्दार्थशोभातिशायिनो रसादेरुपकारका अलंकाराः। अस्थिरा इति नैषां गुणवदावश्यकी स्थि
तिः। शब्दार्थयोः प्रथमं शब्दस्य बुद्धिविषयत्वात् शब्दालंकारेषु वक्तव्येषु शब्दार्थालंकारस्य पुनरुक्तवदाभासस्य चिरंतनैः
॥शब्दालंकारमध्ये लक्षितत्वात् प्रथमं तमेवाह॥ आपाततो यदर्थस्य पौनरुक्त्यावभासनं। पुनरुक्तवदाभासः स भिन्नाका
रशब्दगः॥ उदा॥ भुजंगकुण्डलीव्यक्तशशिशुभ्रांशुशीतगुः। जगन्त्यपि सदापायादव्याच्चेतोहरः शिवः॥ अत्र भुजंगकुण्डल्या
दिशब्दानामापातमात्रेण सर्पाद्यर्थतया पौनरुक्त्यप्रतिभासनं। पर्यवसाने तु भुजंगरूपं कुण्डलं विद्यते यस्येत्याद्यन्यथार्थ
त्वं। पायादव्यादित्यत्र क्रियातोऽयमलंकारः। पायादित्यस्यापायादित्यत्र पर्यवसानात्। भुजंगकुण्डलीति शब्दयोः प्रथमस्यैव
परिवृत्तिसहत्वं। हरः शिवः इति द्वितीयस्यैव। शशिशुभ्रांशुरिति द्वयोरपि। भातिसदानत्याग इति न द्वयोरपीति शब्दपरिवृत्ति
सहत्वासहत्वाभ्यामस्योभयालंकारत्वं। अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत्। स्वरसादृश्यमात्रं तु वैचित्र्याभावान्न
गणितं। रसाद्यनुगतत्वेन प्रकर्षेण न्यासोऽनुप्रासः। छेको व्यञ्जनसंघस्य सकृत्साम्यमनेकधा। छेकानुप्रासः। अनेकधेति

रसः सर इत्यादिः क्रमस्ते देन सादृश्यं पनास्यालंकारस्य विषयः। उदाहरणं मम तातपादानां। आदाय वकुलगंधानंधीकु
र्वन्पदे पदे भ्रमरान्। अयमेति मंदमंदं कावेरीवारिपावनः पवनः। अत्र गंधानंधीति संयुक्तयोः कावेरीवारीत्यसंयुक्तयोः पा
वनः पवन इति वक्नानां सकृदावृत्तिः। छेको विदग्धस्तत्प्रयोज्यत्वाच्छेकानुप्रासः। अनेकस्यैकधा साम्यमसकृद्वाप्यनेक-
धा॥ एकस्य सकृदप्येष वृत्त्यनुप्रास उच्यते। एकधा स्वरूपत एव न तु क्रमतोपि। अनेकधा स्वरूपतः क्रमतश्च सकृदपीत्यपि
शब्दादसकृदपि॥ उदाहरणं॥ उन्मीलन्मधुगंधलुब्धमधुपव्याधूतचूतांकुरक्रीडत्कोकिलकाकलीकलकलैरुद्गीर्ण-
कर्णज्वराः। नीयंते पथिकैः कथंकथमपि ध्यानावधानक्षणप्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः। अत्र रसोल्ला
सैरमी वासरा इति रसयोरेकधैव साम्यं न तु तेनैव क्रमेणापि। द्वितीये पादे कलयोरसकृत्तेनैव क्रमेण। प्रथमे एकस्य तका
रस्य धकारस्य चासकृत्। रसविषयव्यापारवती वर्णरचना वृत्तिः। तदनुगतत्वेन प्रकर्षेण न्यसनात्त्वनुप्रासः। उच्चार्य
तेयदेकत्र स्थाने तालुरदादिके। सादृश्यं व्यंजनस्यैतत्श्रुत्यनुप्रास उच्यते॥ उदाहरणं॥ दृशा दग्धं मनसिजं जीवयंति दृशै
वयाः। विरूपाक्षस्य जयिनीस्ताः स्तुवे वामलोचनाः। अत्र जीवयंति जयिनीरित्यत्र चजकारयकारयोरेकत्र स्थाने तालावु
च्चार्यत्वात्सादृश्यं। एवं दंत्यकंठ्यानामप्युदाहार्यं। एष सहृदयानामतीव श्रुतिसुखावहत्वात्श्रुत्यनुप्रासः। व्यंजनं चेद्यथा ७८
वस्थं सहाद्येन स्वरेण तु। आवर्त्यतेंतयोज्यत्वादंत्यानुप्रास एव तत्। यथावस्थमिति यथासंभवमनुस्वारविसर्गस्वरसंयु

काङ्करविशिष्टं । एषचप्रायेणपादस्यपदस्यचांतेप्रयोज्यः । पादांतगोयथाममं । केशाःकाशास्तवकविकाशाःकायःप्रक
टितकरस्तविलासः । चक्षुर्दग्धवराटककल्पंत्यजतिनचेतःकाममनल्पं । पदांतगोयथामदहसंतःपुलकंवदंतइत्यादि
शब्दार्थयोःपौनरुक्त्येभेदेतात्पर्यमात्रतः । लाटानुप्रासइत्युक्तः । उदाहरणं । स्मेरराजीवनयनेनयनेकिंनिमीलिते । पश्य
निर्जितकंदर्प्पंकंदर्प्पवशंगंप्रियं । अत्रविभक्त्यर्थस्यापौनरुक्त्येपिमुख्यतरस्यप्रातिपदिकद्योत्यधर्मिरूपस्याभिन्नार्थत्वा
त्लाटानुप्रासोयं । नयनेतस्यैवनयनेवात्रद्वितीयनयनशब्दोभाग्यवत्तादिगुणविशिष्टत्वरूपतात्पर्यमात्रेणभिन्नार्थः । य
थावायस्यचसविधेदयितादवदहनस्तुहिनदीधितिस्तस्य । यस्यनसविधेदयितादवदहनस्तुहिनदीधितिस्तस्य । अत्राने
कपदानांपौनरुक्त्यं । एषचप्रायेणलाटजनप्रियत्वाल्लाटानुप्रासः । अनुप्रासःपंचधामतः । स्पष्टं । सत्यर्थेपृथगर्थायाःस्वरव्यं
जनसंहतेः । क्रमेणतेनैवावृत्तिर्यमकंविनिगद्यते । अत्रद्वयोरपिपदयोःक्वचित्सार्थकत्वं । क्वचिन्निरर्थकत्वं । क्वचिदेकस्यसार्थ
कत्वमपरस्यनिरर्थकत्वं । क्वचिद्वयोर्द्वयोरपिपदयोःक्वचित्सार्थकत्वं । क्वचिन्निरर्थकत्वं । क्वचिदेकस्यसार्थकत्वमपरस्या
निरर्थकत्वं । क्वचिद्वयोर्निरर्थकत्वमतउक्तंसत्यर्थेइति । तेनैवक्रमेणदमोमोदइत्यादेर्विभक्तविषयत्वंसूचितं । एतच्चपदपा
दार्द्धश्लोकावृत्तित्वेनपदाद्यावृत्तेश्चानेकविधतयाप्रभूततममितिदंदिग्मात्रंतदाह्रियते । नवपलाशपलाशवनंपुरःस्फुटपराग
परागतपंकजं । मृदुलतांतलतांतमलोकयत्ससुरभिंसुरभिंसुमनोभरैः । अत्रपदावृत्तिः । पलाशपलाशेतिसुरभिंसुरभिमि

तिद्वयोःसामार्थकत्वं।लतांतलतांतेतिअत्रप्रथमस्यनिरर्थकत्वं।परागपरागेतिअत्रद्वितीयस्य।एवमन्यत्राप्युदाहार्यं।
यमकादौनवेदैक्यंडलोर्ववोर्लरोस्तथा।इत्युक्तनयात्भुजलताजडतामबलाजनःइत्यत्रनयमकत्वहानिः।अन्यस्यान्या
र्थकंवाक्यमन्यथायोजयेद्यदि।अन्यःश्लेषेणकाक्वावासावक्रोक्तिस्ततोद्विधा।द्विधेतिश्लेषवक्रोक्तिःकाकुवक्रोक्तिश्च॥क्र
मेणोदाहरणं॥केयूयंस्थलएवसंप्रतिवयंप्रश्नोविशेषाश्रयःकिंब्रूतेविहगःसवाफणिपतिर्यत्रास्तिसुप्तोहरिः।वामायूयम
होविडंवरसिकःकीदृक्स्मरोवर्त्ततेयेनास्मासुविवेकशून्यमनसःपुंस्स्वेववामाभ्रमः।अत्रविशेषपदस्यविःपक्षीशेषोनागइ
त्यर्थद्वयेयोगत्वात्सभंगश्लेषःअन्यत्रत्वभंगः।कालेकोकिलवाचालेसहकारमनोहरे।कृतागसःपरित्यागात्तस्याश्चेतोनदू
यतेअत्रकयासख्यानिषेधार्थेनियुक्तोनञ्अन्ययाचकाक्वाक्षिप्यतएवेतिविध्यर्थेघटितः।शब्दैरेकविधैरेवभाषासुविविधा
स्वपि।वाक्यंयत्रभवेत्सोयंभाषासमइतीष्यते॥यथामम॥मंजुलमणिमंजीरेकलगंभीरेविहाररसरसीतीरे।विरसासिकेलि
कीरेकिमालिधीरेचगंधसाररसमीरे।एषश्लेषःसंस्कृतप्राकृतसौरसेनीप्राच्यावंतीनागरापभ्रंशेष्वेकविधएव।सरसंकईएा
कव्वमित्यादौतुसरसमित्यत्रसंस्कृतप्राकृतयोःसाम्येपिवाक्यगतत्वाभावेवैचित्र्याभावान्नायमलंकारः।श्लिष्टैःपदैरेकार्था
भिधानेश्लेषइष्यते।वर्णप्रत्ययलिंगानांप्रकृत्योःपदयोरपि।श्लेषाद्विभक्तिवचनभाषाणामष्टधाचसः॥क्रमेणोदाहरणं॥प्र ७९
तिकूलतामुपगतेहिविधौविफलत्वमेतिबहुसाधनता।अवलंवनायदिनभर्त्तुरभून्नपतिष्यतःकरसहस्रमपि।अत्रविधा।

वितिविक्षविधिशब्दयोरुकारैकारयोर्वर्णयोरौकाररूपत्वात्श्लेषः। किरणाहरिणांकस्यदक्षिणश्चसमीरणः। कांतोत्संग
जुषांनूनंसर्वएवसुधाकिरः। अत्रसुधाकिरइतिक्विप्प्रत्ययकप्रत्यययोः। किंचात्रबहुवचनैकवचनयोरैक्यरूप्याद्वचनश्ले
षोपि। विकसन्नेत्रनीलाब्जेतथातस्याःस्तनद्वयी। तवदत्तांसदामोदंलसत्तरलहारिणी। अत्रवचनश्लेषोपि। अयंसर्वाणिशा
स्त्राणिहृदिज्ञेषुचवक्ष्यति। सामर्थ्यकृदमित्राणांमित्राणांचनृपात्मजः। अत्रवक्ष्यतीतिवहिवच्योःसामर्थ्यकृदितिकृंततिक
रोत्योःप्रकृत्योःपृथुकार्तस्वरमित्यादि। अत्रपदभंगेविभक्तिसमासयोरपिवैलक्षण्यात्पदश्लेषोनतुप्रकृतिश्लेषः।। एवंच।। नी
तानामाकुलीभावंलुब्धैर्भृशंशिलीमुखैः। सदृशेवनवृद्धानांकमलानांतदीक्षणे। अत्रलुब्धशिलीमुखादिशब्दानांश्लिष्टत्वेपि
विभक्तेरभेदात्प्रकृतिश्लेषः। अन्यथासर्वत्रपदश्लेषःस्यात्। सर्वस्वंहरसर्वस्यत्वंभवच्छेदतत्परः। नयोपकारसांमुख्यमा
यासितनुवर्तनं। अत्रहरइतिपक्षेशिवसंबोधनमितिसुप्पक्षेलधातोस्तिङितिविभक्त्योः। एवंभवेत्यादौ। अस्यवचनभेदस्यप्र
त्ययश्लेषेणापिगतार्थत्वेप्रत्ययांतरासाध्यसुवंततिङंतगतत्वेनविच्छित्तिविशेषणाश्रयात्पृथगुक्तिः। महदेसुरसंधम्मेत
मवसमासंगमागमाहरणे। हरबहुसरणंतंचित्तमोहमवसरउमेसहसा। अत्रसंस्कृतमहाराष्ट्र्योः। पुनस्त्रिधासभंगोऽभंगस्त
दुभयात्मकः। एतद्भेदत्रयंचोक्तभेदाष्टकेयथासंभवंज्ञेयं। यथावायेनध्वस्तमनोभवेनबलिजित्कायःपुरास्त्रीकृतोयश्चो
द्वृत्तभुजंगहारवलयोगंगांचयोधारयत्। यस्याहुःशशिमच्छिरोहरइतिस्तुत्यंचनामामराःपायात्सःस्वयमंधकक्षयकर

स्त्वां सर्वदो माधवः । अत्र येन ध्वस्तेत्यादौ सभंगश्लेषः । अंधकेत्यादावभंगः । अनयोश्चैकत्र संभवात्सभंगाभंगात्मकः । ग्रंथगौ
रवभयात्पृथङ्नोदाहृतः ॥ इह केचिदाहुः ॥ सभंगश्लेष एव शब्दश्लेषविषयः यत्रोदात्तादिस्वरभेदाद्भिन्नप्रयत्नोच्चार्यत्वेन भि
न्नयोः शब्दयोर्जतुकाष्ठन्यायेन श्लेषः । अभंगस्त्वर्थश्लेष एव । यत्र स्वरभेदादभिन्नप्रयत्नोच्चार्यतया शब्दाभेदादर्थयोरेकवृंतग
तफलद्वयन्यायेन श्लेषः । यो हि यदाश्रितः स तदलंकार एव । अलंकार्यालंकरणभावस्य लोकवदाश्रयाश्रयिभावेनोपपत्ते
रिति । तदन्ये न मन्यंते । तथा ह्यत्र ध्वनिगुणीभूतव्यंग्यदोषगुणालंकाराणां शब्दार्थगतत्वेन व्यवस्थितेरन्वयव्यतिरेकानुविधा
यित्वेन नियमात् । न चाबधक इत्यादौ शब्दभेदः ॥ अर्थभेदेन शब्दभेद इति दर्शनात् ॥ किं चात्र शब्दस्यैव मुख्यतया वैचित्र्य
बोधोपायत्वेन कविप्रतिभयोट्टंकनात् शब्दालंकारत्वमेव । विसदृशशब्दद्वयबंधे चैवंविधस्य वैचित्र्यस्याभावात् वैचित्र्य
स्यैवालंकारत्वात् । अर्थमुखप्रेक्षितया चार्थालंकारत्वेऽनुप्रासादीनामपि रसादिपरत्वेनार्थमुखप्रेक्षितयार्थालंकारत्व
प्रसंगः । शब्दस्याभिन्नोच्चार्यत्वे चार्थालंकारत्वे प्रतिकूलतामुपगते हि विधावित्यादौ शब्दभेदेऽप्यर्थालंकारत्वं तवापि प्रस
ज्यत इत्युभयत्रापि शब्दालंकारत्वमेव । यत्र तु शब्दपरिवर्तनेऽपि न श्लेषत्वखंडना तत्र स्तोकेनोन्नतिमायाति स्तोकेनायात्यधो
गतिं । अहो सुसदृशी वृत्तिस्तुलाकोटेः खलस्य चेत्यादावर्थश्लेषः । अस्य चालंकारांतरविविक्तविषयतयाऽसंभवात् । विद्य
मानेष्वलंकारांतरेष्वपवादत्वेन तद्बाधकतया तत्प्रतिभोत्पत्तिहेतुत्वमिति केचित् । इत्थमत्र विचार्यते । समासोक्त्यप्रस्तु

तद्वंशमादौ द्वितीयार्थस्यानभिधेयतया नास्य गंधोऽपि । विद्वन्मानसहंसेत्यादौ श्लेषगर्भे रूपकेऽपि मानसहंसस्य चित्त
सरोरूपोभयार्थत्वेऽपि रूपकेन श्लेषो बाध्यते । सरोरूपस्यैवार्थस्य विश्रांतिधामतया प्राधान्यात् ॥ श्लेषे ह्यर्थद्वयस्यापि सम
कक्षत्वं । संनिहितवदलांधकाराभास्वन्मूर्त्तिश्लिष्टेत्यादौ विरोधाभासेऽपि विरुद्धार्थस्य प्रतिभातमात्रस्य प्ररोहाभावान्न श्लेषः ।
एवं पुनरुक्तवदाभासेऽपि । तेन येन ध्वस्तेत्यादौ प्राकरणिकयोर्नीताभामित्यादौ चाप्राकरणिकयोरेकधर्माभिसंबंधात्तुल्य
योगितायां । स्वेच्छोपजातविषयोऽपि न याति वक्तुं देहीति मार्गणव्रातैश्च ददाति दुःखं मोहात्समाक्षिपति जीवनमप्यकांडे क
ष्टं प्रसूनविशिखः प्रभुरल्पबुद्धिः । इत्यादौ च प्राकरणिकाप्राकरणिकयोरेकधर्माभिसंबंधाद्दीपकं । सकलकलं पुरमेत
ज्जातं संप्रति सितांशुबिंबमिव इत्यादौ चोपमायां विद्यमानायामपि श्लेषस्यैतद्विषयपरिहारेणासंभवात् । एषां च श्लेषविष
यपरिहारेणापि स्थितेः । एतद्विषये श्लेषस्य प्राबल्येन चमत्कारित्वप्रतीतेश्च श्लेषेणैव व्यपदेशो भवितुं युक्तः । अन्यथा तद्व्यप
देशस्य सर्वथाभावप्रसंगाच्चेति । अत्रोच्यते । न तावत्परमार्थतः श्लेषस्यालंकाराविविक्तविषयता । येन ध्वस्तेत्यादिना विविक्त
विषयत्वात् । न चात्र तुल्ययोगिता । तस्या द्वयोरप्यर्थयोर्वाच्यत्वनियमाभावात् । अत्र हि माधवोमाधवयोरेकस्यावाच्यत्व
नियमे परस्य व्यंग्यत्वं स्यात् । किंच तुल्ययोगितायामेकस्यैव धर्मस्यानेकधर्मिसंबद्धतया प्रतीतिः । इह त्वनेकेषां धर्मिणां
पृथक् स्वधर्मिसंबंधतया । सकलकलेत्यादौ च नोपमाप्रतिभोत्पत्तिहेतुः श्लेषः । पूर्णोपमाया निर्विषयत्वापत्तेः । कमलमिव

मुखं मनोज्ञमित्याद्यस्ति पूर्णोपमाया विषय इति चेत् । यदि सकलकलेत्यादौ शब्दश्लेषतया नोपमा तत्किमपराद्धं मनोज्ञ
मित्यर्थश्लेषेण । स्फुटमर्थालंकारावेतावुपमासमुच्चयौ किं तु । आश्रित्य शब्दमात्रं सामान्यमिहापि संभवतः इति रुद्रटोक्तदि
शा गुणक्रियासाम्यवच्छब्दसाम्यस्याप्युपमाप्रयोजकत्वात् ननु गुणक्रियासाम्यस्यैवोपमाप्रयोजकता युक्ता । तत्र साम्य
स्य वास्तवत्वात् । शब्दसाम्यस्य तु न तथा । तत्र साम्यस्यावास्तवत्वात् । ततश्च पूर्णोपमाया अन्यथानुपपत्तेर्गुणक्रियासाम्य
स्यैवार्थश्लेषविषयतापरित्यागेन पूर्णोपमाविषयता युक्ता । ननु सकलकलेत्यादौ शब्दसाम्यस्येति चेन्न । साधर्म्यमुपमेत्ये
वाविशिष्टस्य उपमालक्षणस्य शब्दसाम्यात् व्यावृत्तेरभावात् यदि शब्दसाम्ये साधर्म्यमवास्तवत्वान्नोपमाप्रयोजकं कथं वि
द्वन्मानसेत्यादावाधारत्वे विष्णोः सरोवराद्यारोपे राजादेर्हंसत्वाद्यारोपः प्रयोजकः । किं च यदि वास्तवसाम्य एवोपमांगी
कार्या कथं त्वयापि सकलकलेत्यादौ बाध्यत्वेनोपमांगीक्रियते । किं चात्र श्लेषस्यैव साम्यनिर्वाहकता न तु साम्यस्य श्लेषनि
र्वाहकता । श्लेषबंधतः प्रथमं साम्यस्यासंभवादिति उपमाया एवांगित्वेन व्यपदेशो न्याय्यः । प्रधानेन व्यपदेशा भवंतीति युक्त
न्यायात् । ननु शब्दालंकारविषयेऽगांगिभावः संकरो नांगीक्रियते तत्कथमत्र श्लेषोपमयोरंगांगिभावः संकर इति चेन्न । अ
र्थानुसंधानविरहिण्यनुप्रासादावेव तथानंगीकारात् एवं दीपकादावपि ज्ञेयं । सत्पक्षा मधुरगिरः प्रसाधिताशा मदोद्धतारंभाः
निपतंति धार्तराष्ट्राः कालवशान्मेदिनीपृष्ठे । अत्र धार्तराष्ट्रवर्णनप्रकारेण धार्तराष्ट्रादिशब्दानां हंसाद्यर्थाभिधाने नियमनादु ८१

र्योधनादिरूपोर्थः शब्दशक्तिमूलोध्वनिः। इदंत्वत्रतत्त्वंयदभिधेयद्वितीयार्थस्यसूच्यतयैवविवक्षितत्वादुपमानोपमेया-
तार्थेनविवक्षितइतिनोपमाध्वनिः नचश्लेषइतिसर्वमवदातं। पद्माद्याकारहेतुत्वेवर्णानांचित्रमुच्यते। आदिशब्दात्खड्गमु-
रजचक्रगोमूत्रिकादयः। अस्यचतथाविधलिपिसन्निवेशेनचमत्कारविधायिनामपिवर्णानांतथाविधश्रोत्राकाशसमवाय-
विशेषवशेनचमत्कारविधायित्वेतैर्वर्णैरभेदेनोपचाराच्छब्दालंकारत्वं॥ तत्रपद्मबंधोयथा॥ मारमासुषमाचारुचामारव-
वधूत्तमा। मात्तधूर्ततमारासासारामामेस्तुमारमा। एषोष्टदलःपद्मबंधोदिग्दलेषुनिर्गमप्रवेशाभ्यांश्लिष्टवर्णःकिंचविदिग्द-
लेष्वन्यथा। कर्णिकाक्षरंतुश्लिष्टमेव॥ एवंखड्गबंधादिकमप्यूह्यं॥ काव्यान्तर्गडुभूततयातुनेदंप्रपंच्यते। रसस्यपरिपंथित्वा-
न्नालंकारःप्रहेलिका। उक्तिवैचित्र्यमात्रंसाच्युतदत्ताक्षरादिका। च्युताक्षरादत्ताक्षराच्युतदत्ताक्षरा। उदाहरणं। कूजंति
कोकिलाःसालेयौवनेफुल्लमंबुजं। किंकरोतुकुरंगाक्षीवदनेननिपीडिता। अत्ररसालइतिवक्तव्येसालइतिरश्च्युतः।
वनइत्यत्रयौवनमित्ययंयौदत्तः। वदनइत्यत्रनेच्युतेवोदत्तः। आदिशब्दात्क्रियाकारकगुप्तादयः॥ तत्रक्रियागुप्तिर्यथा॥
पांडवानांसभामध्येदुर्योधनउपागतः। तस्मैगांचसुवर्णंचसर्वाण्याभरणानिच। अत्रदुर्योधनइत्यत्रादुःयःअधनइति।
अदुरितिक्रियागुप्ता। एवमन्यत्र॥ ॥अथावसरप्राप्तेष्वर्थालंकारेषुप्राधान्यात्सादृश्यमूलेषुलक्षितव्येषुतेषामुपजीव्य-
त्वेनप्रथममुपमामाह॥ साम्यवाच्यमवैधर्म्येवाक्यैक्यउपमाद्वयोः। रूपकादिषुसाम्यस्यव्यंग्यत्वंव्यतिरेकेचवैधर्म्यस्याप्यु-

क्तिः।उपमेयोपमायांवाक्यद्वयं।अनन्वयेचैकस्यैवसाम्योक्तिरित्यस्याभेदः।सापूर्णायदिसामान्यधर्मऔपम्यवाचि च।
उपमेयंचोपमानंस्याद्वाच्यं।साउपमासाधारणधर्मोद्वयोःसादृश्यहेतुःगुणक्रियेमनोज्ञत्वादिःऔपम्यवाचकमिवादिउपमे
यंमुखादिउपमानंचन्द्रादि।इयंपुनः।श्रौतीयथेववाशब्दाइवार्थोवावतिर्यदि।आर्थीतुल्यसमानाद्यास्तुल्यार्थेयत्रवावतिः।य
थेववादयःशब्दाःउपमानानन्तरप्रयुक्तातुल्यादिपदसाधारणाअपिश्रुतिमात्रेणोपमानोपमेयगतंसादृश्यलक्षणसंबंधं
वोधयंतीतितत्सद्भावेश्रौतीउपमा।एवंतत्रतस्येवेत्यनेनेवार्थेविहितस्यवतेरुपादाने।तुल्यादयस्तुकमलेनतुल्यंमुखमित्या
दावुपमेयएव।कमलंमुखस्यतुल्यमित्यादावुपमानएव।कमलंमुखंचतुल्यमित्यादौउभयत्रापिविश्राम्यंतीत्यर्थानुसंधा
नादेवसाम्यंप्रतिपादयंतीतितत्सद्भावेआर्थी।एवंतेनतुल्यमित्यादिनातुल्यार्थेविहितस्यवतेरप्युपादाने।द्वेतद्धितेसमासे
थवाक्येद्वे।श्रौतीआर्थीच॥उदाहरणं॥सौरभमंभोरुहवन्मुखस्यकुंभाविवस्तनौपीनौ।हृदयंमदयतिवदनंतवशरदि
न्दुर्यथावाले।अत्रक्रमेणत्रिविधाश्रौती।मधुरःसुधावदधरःपल्लवतुल्योतिपेलवःपाणिः।चकितमृगलोचनाभ्यांसदृशेच
पलेचलोचनेतस्याः।अत्रक्रमेणत्रिविधार्थी।पूर्णाःषडेवतत्स्युः।लुप्तासामान्यधर्मादेरेकस्ययदिवाद्वयोः।त्रयाणांवा
नुपादानेश्रौत्यार्थीसापिपूर्ववत्।सालुप्ता॥तद्भेदानाह॥पूर्णावद्धर्मलोपेसाविनाश्रौतीतुतद्धिते।सालुप्तोपमा॥धर्मस्यसा
धारणगुणक्रियारूपस्यलोपेपूर्णावदिति।पूर्वोक्तरीत्याषट्प्रकारा।किंत्वत्रतद्धितेश्रौत्याअसंभवात्पंचप्रकारा॥उदा०॥ ८२

मुखमिंदुर्यथापाणिःपल्लवेनसमःप्रिये।वाचःसुधाइवोष्ठंतेबिंबतुल्यंमनोऽश्मवत्।आधारकर्मविहितेद्विविधेचक्य
चिक्यङि।कर्मकर्त्रोर्णमुलिचस्यादेवंपंचधापुनः।धर्मलोपेत्यनुषज्यते।क्यच्क्यङ्णमुलः।कलापमते।यिन्नायिणमः॥क्र
मेणोदाहरणं॥अंतःपुरीयसिरणेषुसुतीयसित्वंपौरंजनंतवसदारमणीयतेश्रीः।दृष्टःप्रियाभिरमृतद्युतिदर्शमिंदुसंचा
रमत्रभुविसंचरसिक्षितीश।अत्रांतःपुरीयसीत्यत्रसुखविहारास्पदत्वस्यसुतीयसीत्यत्रस्नेहनिर्भरत्वस्यचसाधारणध
र्मस्यलोपः।एवमन्यत्र।इदंचयथातुल्यादिविरहात्श्रौत्यादिविशेषचिंतानास्ति।इदंचकेचिदौपम्यप्रतिपादकस्यवतेर्लोप
उदाहरंति।तदयुक्तं॥क्यङादेरपितदर्थविहितत्वेनौपम्यप्रतिपादकत्वात्।ननुक्यङादिषुसम्यगौपम्यप्रतीतिर्नास्तिप्रत्यये
नास्वतंत्रत्वात्।इवादिप्रयोगाभावाच्चेतिनवाच्यं।कल्पकादावपितथाप्रसंगात्॥नचकल्पवादीनामिवादितुल्यतयौपम्य
स्यवाचकत्वं।क्यङादीनांतुद्योतकत्वं।इवादीनामपिवाचकत्वेनिश्चयाभावात्वाचकत्वेवासमुदितंपदंवाचकंप्रकृतिप्रत्य
यौस्वस्वार्थबोधकावितिचमतद्वयेपिवत्यादिक्यङाद्योःसाम्यमेवेति।यत्तुकेचिदाहुः।वत्यादयइवाद्यर्थेनुशिष्यंतेक्यङा
दयस्त्वाचारार्थइतितदपिनन।खलुक्यङादयआचारार्थाअपितुसादृश्याचारार्थाइति।तदेवंधर्मलोपेदशप्रकारालुप्ता।उ
पमानानुपादानेद्विधावाक्यसमासयोः॥उदाहरणं॥तस्यामुखेनसदृशंनास्तेरम्यंनयनतुल्यं।अत्रमुखनयनप्रतिनिधि
वस्त्वंतरयोर्गम्यमानत्वादुपमानलोपः।अत्रैवचमुखेनसदृशमित्यत्रमुखंयथेदमितिनयनमित्यत्रदृगिवेतिपाठेश्रौत्यपि

संस्रवतीत्यनयोर्भेदयोः प्रत्येकं श्रौत्यार्थित्वभेदेन चतुर्विधत्वसंभवेऽपि प्राचीनैर्द्विप्रकारत्वमेवोक्तं । औपम्यवाचिनो लोपे
समासे क्विपि च द्विधा ॥ क्रमेणोदाहरणं ॥ वदनं मृगशावाक्ष्याः सुधाकरमनोहरं । गर्दभति श्रुतिपरुषं व्यक्तं निनदन्महात्म
तां पुरतः ॥ अत्र गर्दभतीत्यत्रौपम्यवाचिनः क्विपो लोपः । न चैवोपमेयस्यापि लोपः । निनदन्नित्यनेनैव निर्देशात् ॥ द्विधा समा
से वाक्ये च लोपे धर्मोपमानयोः । तस्या मुखेनेत्यादौ रम्यमिति स्थाने लोक इति पाठे । अनयोरुदाहरणं ॥ क्विप्समासगता द्विधा ध
र्मेवादिविलोपने । विधवति मुखाब्जमस्याः । अत्र विधवतीति मनोहरक्विप्प्रत्यययोर्लोपः । केचित्त्वत्रापि प्रत्ययलोपमाहुः । मु
खाब्जमिति च समासगता । उपमेयस्य लोपे तु स्यादेकाप्रत्यये क्यचि ॥ यथा ॥ अरातिविक्रमालोकविकस्वरविलोचनः । कृपाणो
दग्रदोर्दण्डः ससहस्रायुधीयति । अत्र सहस्रायुधमिवात्मानमाचरतीत्युपमेयस्यात्मनो लोपः । न चैवौपम्यवाचकलोपः । उ-
क्तादेव न्यायात् । अत्र केचिदाहुः । सहस्रायुधेन सहवर्त्तत इति ससहस्रायुधः स इवाचरतीति वावयवात् ससहस्रायुधीय-
तीति पदसिद्धौ विशेषस्य शब्दानुपात्तत्वादिहोपमेयलोप इति तन्न विचारसहं । कर्त्तरि क्यचानुशासनविरुद्धत्वात् । धर्मोप
मेयलोपेऽन्या ॥ यथा ॥ यशसि प्रचरति भवतः क्षीरोदीयंति सागराः सर्वे । अत्र क्षीरोदमिवात्मानमाचरंतीत्युपमेयस्यात्मा
साधारणधर्मः शुक्लता च लुप्तौ । त्रिलोपे तु समासगा । यथा राजते मृगलोचना । अत्र मृगस्य लोचने इव लोचने यस्या इति स
मासे उपमाप्रतिपादकसाधारणधर्मोपमेयानां लोपः । तेन उपमायाः भेदाः स्युः सप्तविंशतिसंख्यकाः । पूर्णा षड्विधा लुप्ता चै

कविंशतिविधेति मिलित्वा सप्तविंशतिप्रकारोपमा। एषु चोपमाभेदेषु मध्येऽलुप्तसाधारणधर्मेषु भेदेषु विशेषः। प्रतिपाद्य-
ते। एकरूपः कश्चित्क्वापि भिन्नः साधारणो गुणः। भिन्ने विंबानुविंबत्वं शब्दमात्रेण वा भिदा। तत्रैकरूपो यथोदाहृतं। मधुकरः सु-
धावदधरे इत्यादि। विंबप्रतिविंबत्वे यथा॥ तल्पापवर्ज्जितैस्तेषां शिरोभिः श्मश्रुलैर्मही॥ तस्तार सरघाव्याप्तैः सक्षौद्रपटलैरि-
व। अत्र श्मश्रुलैरित्यस्य सरघाव्याप्तैरिति दृष्टांतवत्प्रतिविंबनं। शब्दमात्रेण भिन्नत्वे यथा। स्मेरं विधाय नयनं विकसितमि-
व नीलमुत्पलं मयि सा। कथयामास सकृदंगागी मनोगतिं निखिलमाकूतं। अत्रैक एव स्मेरत्वविकासितत्वे प्रतिवस्तूवच्छेदेन
निर्दिष्टे। एकदेशविवर्त्तिन्युपमा वाच्यत्वगम्यते न वेतां यत्र साम्यस्य यथा। नेत्रैरिवोत्पलैः पद्मैर्मुखैरिव सरःश्रियं। पदे पदे।
विलांतिस्म चक्रवाकैः स्तनैरिव। अत्र नेत्रादीनामुत्पलसादृश्यं वाच्यं। सरःश्रीणां चांगनासादृश्यं व्यंग्यं। कथितारसनोपमा
।यथोर्ध्वमुपमेयस्य यदि स्यादुपमानता॥ यथा॥ चंद्रायते शुक्लरुचापि हंसो हंसायते चारुगतेन कांता। कांतायते स्पर्श-
सुखेन वारि वारीयते स्वच्छतया विहायः। मालोपमा यदेकस्योपमानं बहु दृश्यते॥ यथा॥ वारिजेनेव सरसी शशिनेव
निशीथिनी। यौवनेनेव वनिता नयेन श्रीर्मनोहरा। क्वचिदुपमानोपमेययोर्द्वयोरपि प्रकृतत्वं दृश्यते॥ यथा॥ हंसश्चंद्र इ-
वाभाति जलं व्योम जलं यथा। विमलाः कुमुदानीव तारकाः शारदागमे। अत्र राज्ञो गृहेस्तांतिरूपानीता विभूतयः पुरंदरस्य
नवने कल्पवृक्षा नवा इव। अत्रोपमेयभूतविभूतिभिः कल्पवृक्षा नवा इवेत्युपमानभूतविभूतयश्चाक्षिप्यंते इत्याक्षेपोप

साहित्यदर्प० मात्रैव गृहे इत्यस्यानवने इत्यनेन प्रतिनिर्देशात्प्रतिनिर्देशोपमा । इत्यादयश्च न लक्षिताः एवंविधवैचित्र्यस्य सहस्रधा द-
८४ र्शनात् । उपमानोपमेयत्वमेकस्यैव त्वनन्वयः ॥ अर्थादेकवाक्ये न यथा ॥ राजीवमिव राजीवं जलं जलमिवाजनि । चन्द्रश्च-
न्द्र इवातन्द्रः शरत्समुदयोद्यमे । अत्र राजीवादीनामनन्यसदृशत्वप्रतिपादनार्थमुपमोपमेयभावो वैवक्षिकः । राजीवमि-
व पाथोजमिति चास्य लाटानुप्रासाद्भिन्नो विषयः किंत्वौचित्यादेकशब्दप्रयोग एव श्रेयान् ॥ तदुक्तं ॥ अनन्वये च शब्दै-
क्यमौचित्यादानुषंगिकं । इदं तु लाटानुप्रासे साक्षादेव प्रयोजकमिति । पर्यायेण द्वयोरेतदुपमेयोपमा मता ॥ एतदुपमा-
नोपमेयत्वमर्थाद्वाक्यद्वये यथा ॥ कमलेव मतिर्मतिरिव कमला तनुरिव विभा विभेव तनुः ॥ धरणीव धृतिर्धृतिरिव धरणी
सततं विभाति बत यस्य । अत्रास्य राज्ञः श्रीबुद्ध्यादिसदृशं नान्यदस्तीति भावः । सदृशानुभवाद्वस्तुस्मृतिः स्मरणमुच्यते
॥ यथा ॥ अरविन्दमिदं वीक्ष्य खेलत्खञ्जनगञ्जनं । स्मरामि वदनं तस्याश्चारु चञ्चललोचनं । मयि सकपटमित्यादौ तु स्मृतेः
सादृश्यानुभवं विनापि स्थापितत्वान्नायमलंकारः ॥ राघवानंदमहापात्रास्तु वैसादृश्यात्स्मृतिमपि स्मरणालंकारमिच्छं-
ति ॥ अत्रोदाहरणं तेषामेव यथा ॥ शिरीषमृद्वी गिरिषु प्रपेदे यदा यदा दुःखशतानि सीता । तदा तदास्याः सदनेषु सौख्य-
लक्षाणि दध्यौ गलदश्रु रामः । रूपकं रूपितारोपाद्विषये निरपह्नवे । रूपितेति परिणामाद्व्यवच्छेदः । तच्च परिणामप्रस्ता- ८४
वे विवेचयिष्यामः । निरपह्नव इत्यपह्नुतिव्यवच्छेदार्थं । तत्परंपरितं सांगं निरंगमिति च त्रिधा । तद्रूपकं । तत्र । यस्य कस्य चि

दारोपः परारोपणकारणं। तत्परंपरितं श्लिष्टाश्लिष्टशब्दनिबंधनं। प्रत्येकं केवलं मालारूपं चेति चतुर्विधं। तत्र केवलं श्लि-
ष्टशब्दनिबंधनं परंपरितं यथा। आहवे जदुद्दंडराजमंडलराहवे॥ श्रीनृसिंहमहीपाल स्वस्त्यस्तु तव बाहवे। अत्र राजमंडलो
नृपसमूह एव चंद्रबिंबमित्यारोपो राजबाहोः राहुत्वारोपे निमित्तं॥ मालारूपकं यथा॥ पद्मोदयादिनाधीशः सदागतिसमीर-
णः। भूभृदावलिदंभोलिरेक एव भवान्भुवि। अत्र पद्माया उदय एव पद्मानामुदयः सदामागतिः सदागमनं। भूभृतो राजान ए-
व पर्वता इत्यारोपो राज्ञः सूर्यत्वाद्यारोपे निमित्तं। अश्लिष्टशब्दनिबंधनं केवलं यथा। पांतु वो जलदश्यामाः शार्ङ्गज्याघातकर्क-
शाः। त्रैलोक्यमंडपस्तंभाश्चत्वारो हरिबाहवः। अत्र त्रैलोक्यमंडपत्वारोपो हरिबाहूनां स्तंभत्वारोपे निमित्तं॥ मालारूपं यथा॥
मनोजराजस्य सितातपत्रं श्रीखंडचित्रं हरिदंगनायाः। विराजते व्योमसरःसरोजं कर्पूरपूरप्रभमिंदुबिंबं। अत्र मनोजादेः राज-
त्वाद्यारोपश्चंद्रबिंबस्य सितातपत्राद्यारोपे निमित्तं। एषु च राजभुजादीनां राहुत्वाद्यारोपो राजमंडलादीनां चंद्रबिंबत्वाद्यारो-
पे निमित्तमिति केचित्। अंगिनो यदि सांगस्य रूपणं सांगमेव तत्। समस्तवस्तुविषयमेकदेशविवर्ति च। तत्र आरोप्याणाम-
शेषाणां शाब्दत्वे प्रथमं मतं॥ प्रथमं समस्तवस्तुविषयं यथा॥ रावणावग्रहक्लांतमिति वागमृतेन सः। अभिवृष्य मरुत्सस्यं कृ-
ष्णमेघस्तिरोदधे॥ अत्र कृष्णस्य मेघत्वारोपे वागादीनाममृतत्वाद्यारोपितं। यस्य कस्यचिदार्थत्वमेकदेशविवर्ति तत्॥ कस्य-
चिदारोप्यमाणस्य यथा॥ लावण्यमधुभिः पूर्णमास्यमस्या विकस्वरं। लोकलोचनरोलंबकदंबैः कैर्न पीयते। अत्र लावण्या

दौमधुत्वाद्यारोपःशाब्दोमुखेपद्मत्वारोपस्त्वार्थः।नचेयमेकदेशावर्त्तिन्युपमा।विकस्वरधर्मस्यारोप्यमाणपद्मएवमुख्यतया
वर्णनात्।मुखेचोपचरितत्वात्।निरंगंकेवलस्यैवरूपणात्॥तत्रमालारूपंनिरंगंयथा॥निर्माणकौशलंधातुश्चंद्रिकालो
कचक्षुषां।क्रीडागृहमनंगस्यसेयमिंदीवरेक्षणा।केवलंयथा॥दासेकृतागसिभवत्युचित।प्रभूणांपादप्रहारइतिसुंदरि
नात्रदूये।उद्यत्कठोरपुलकांकुरकंटकाग्रैर्यत्खिद्यतेमृदुपदंननुसाव्यथामे।तेनाष्टौरूपकभेदाः।निरंगनैरूप्याइतिशेषः
क्वचित्परंपरितमप्येकदेशविवर्त्तियथा।खड्गःक्ष्मासौविदल्लःसमितिविजयतेमालवाखंडलस्य।अत्रार्थःक्ष्मायांमहिषी
त्वारोपःखड्गेसौविदल्लत्वारोपेहेतुः।अस्यभेदस्यपूर्ववन्मालात्वेप्युदाहरणंमृग्यं।दृश्यतेक्वचिदारोप्याःश्लिष्टाःसांगेपिरूप
के॥तत्रैकदेशविवर्त्तिश्लिष्टंयथामम॥करमुदयमहीधरस्तनाग्रेइत्यादि।समस्तवस्तुविषयंयथातत्रैवविमुंचतीत्यादौ
चुचुंवेहरिदवलामुखमिंदुनायकेनेतिपादे।नचात्रश्लिष्टपरंपरितं।तत्राहि।भूभृदावलिदंतोलिरित्यादौराजादौपर्वतत्वा
दिरूपणंविनावर्णनीयस्यराजादेर्दन्तोलितादिरूपणसर्वथैवसादृश्यासंभवादसंगतं।तर्हिकथंपद्मोदयदिनाधीशेत्या
दौपरंपरितं।राजादेःसूर्यादीनांसादृश्यस्यतेजस्वितादिहेतुकस्यसंभवादितिनवाच्यं॥तथाहि॥राजादेस्तेजस्वितादि
हेतुकंसुव्यक्तंसादृश्यंनतुप्रकृतेतद्विवक्षितंपद्मोदयादेरेवद्वयोःसाधारणधर्मतयाविवक्षितत्वात्।इहतुमहीधरादेः
स्तनादिनासादृश्यंपीनोत्तुंगत्वादिनासुव्यक्तमेवेतिनश्लिष्टपरंपरितं।क्वचित्समासाभावेपिरूपकंदृश्यते।यथामुखंतव ८५

सरोजाक्षि सरोजमिति नान्यथा। क्वचिद्वैयधिकरण्येऽपि। यथा विदधे मधुपश्रेणीमिह भ्रूलतया विधिः॥ क्वचिद्वैधर्म्येण
यथा॥ सौजन्याम्बुमरुस्थली सुचरितालेख्यद्युभित्तिर्गुणज्योत्स्नाकृष्णचतुर्दशी सरलतायोगश्वपुच्छच्छटा। यैरेषापि दुरा
शया कलियुगे राजावली सेविता तेषां शूलिनि भक्तिमात्रसुलभे सेवा कियत्कौशलं। अत्र केषांचिद्रूपकाणां शब्दमूलत्वेऽपि
रूपकविशेषत्वादर्थालंकारमध्ये गणनं। एवं वक्ष्यमाणालंकारेष्वेवंविधेष्ववोद्धव्यं। अधिकारूढवैशिष्ट्यं रूपकं यत्तदेव तत्
तदेवाधिकारूढमवैशिष्ट्यसंज्ञं रूपकं॥ यथा मम॥ इदं वक्त्रं साक्षाद्विरहितकलंकः शशधरः सुधाधाराधारश्चिरपरिणतं
विंबमधरः। इमे नेत्रे रात्रिंदिवमधिकशोभे कुवलये तनुर्लावण्यानां जलधिरवगाहे सुखतरः। अत्र कलंकराहित्यादिना
आधिक्यवैशिष्ट्यं। विषयात्मतयारोप्ये प्रकृतार्थोपयोगिनि। परिणामोऽत्र वै तुल्यातुल्याधिकरणो द्विधा। आरोप्यमाणस्या
रोपविषयात्मतया परिणमनात्परिणामः। यथा स्मितेनोपायनं दूरादागतस्य कृतं मम। स्तनोपपीडमाश्लेषः कृतो द्यूतपण
स्तया। अत्रोपायनपणौ वसनाभरणादित्वेनोपयुज्येते। अत्र तु नायकसंभावनद्यूततयोः स्मिताश्लेषरूपतया। तत्र
प्रथमे वैयधिकरण्येन प्रयोगः द्वितीये तु सामानाधिकरण्येन रूपके मुखचंद्रं पश्यामीत्यादौ आरोप्यचंद्रादेरुपरंजक
त्वमात्रेण तु प्रकृते दर्शनादावुपयोगः। इदं तत्पायनादेर्विषयेण तादात्म्य। प्रकृते न च नायकसंभावनादावुपयोगः। अत
एव रूपके आरोप्यस्यावच्छेदकत्वमात्रेणान्वयः। अत्र तु तादात्म्ये। दासे कृतागसीत्यादौ रूपकमेव न तु परिणामः। आरो

प्यमाणकंटकस्यपादस्तेदेनकार्यस्याप्रस्तुतत्वात्।नखलुतत्कस्यचिदप्रकृतकार्यस्यघटनार्थमनुसंधीयते।अयम-
पिरूपकवदधिकारूढवैशिष्ट्योद्भिद्यते॥यथा॥वनेचराणांवनितासखानांदरीगृहोत्संगनिषिक्तभासः।भवंतियत्रौषधयो
रजन्यामतैलपूराःसुरतप्रदीपाः।अत्रप्रदीपानामौषध्यात्मतयाप्रकृतेसुरतोपयोगिन्यंधकारनाशेउपयोगः।अतैलपरत्वे
नाधिकारूढवैशिष्ट्यं॥संदेहःप्रकृतेन्यस्यसंशयःप्रतिभोत्थितः।शुद्धोनिश्चयगर्भोसौनिश्चयांतइतित्रिधा।यत्रसंशयएव
पर्यवसानंसशुद्धः॥यथा॥किंतारुण्यतरोरियंरसभरोद्भिन्नानवामंजरीवेलाप्रोच्छलितस्यकिंलहरिकालावण्यवारांनिधेः
उद्गाढोत्कलिकावतांस्वसमयोपन्यासविस्रंभणःकिंसाक्षादुपदेशयष्टिरथवादेवस्यशृंगारिणः।यत्रादावंतेचसंशयएव
मध्येचनिश्चयःसनिश्चयमध्यः॥यथा॥अयंमार्तंडःकिंसखलुतुरगैः।सप्तभिरितःकृशानुःकिंसर्वाःप्रसरतिदिशोनैषनियत-
तं।कृतांतःकिंसाक्षान्महिषवहनोसावितितिरःसमालोक्याजौत्वांविदधतिविकल्पान्प्रतिभटाः।अत्रमध्येमार्तंडाद्यभावनि
श्चयःराजनिश्चयेद्वितीयसंशयस्योत्थानासंभवात्।यत्रादौसंशयोंतेचनिश्चयःसनिश्चयांतः॥यथा॥किंतावत्सरसिसरो
जमेतदारादाहोस्विन्मुखमवभासतेतरुण्याः।संशय्यक्षणमितिनिश्चिकायकश्चिद्बिब्बोकैर्बकसहवासिनांपरोक्षैः।अत्र
प्रतिभोत्थापितेष्वस्थाणुर्वापुरुषोवेतीत्यादिसंशयेषुनायमलंकारः।मध्यंतवसरोजाक्षिपयोधरभरार्दितं।अस्तिनास्ती
तिसंदेहःकस्यचित्तेनभासते।अत्रातिशयोक्तिरेव।उपमेयेउपमानसंशयस्यैतदलंकारविषयत्वात्।साम्यादतस्मिंस्तद्बु

द्धिर्भ्रांतिमान्प्रतिभोत्थिता ॥ यथा ॥ मुग्धादुग्धधियागवांविदधतेकुंभानधोवल्लवाःकर्णेकैरवशंकयाकुवलयंकुर्वंति
कांताअपि। कर्कंधूफलमुच्चिनोतिशबरीमुक्ताफलाकांक्षयासांद्राचंद्रमसोनकस्यकुरुतेचित्तभ्रमंचंद्रिका। स्वरस्योत्थापि
ताभ्रांतिर्नायमलंकारः। यथाशुक्तिकायांरजतमिति। नचासादृश्यमूला ॥ यथा ॥ संगमविरहवितर्केवरमिहविरहोनसंग
मस्तस्याः। संगेसापुनरेकात्रिभुवनमपितन्मयंविरहे। क्वचिद्भेदाद्ग्रहीतॄणांविषयाणांतथाक्वचित्। एकस्यानेकधोल्लेखोयः
सउल्लेखइष्यते। क्रमेणोदाहरणं। प्रियइतिगोपवधूभिःशिशुरितिवृद्धैरधीशइतिदेवैः। नारायणइतिभक्तैर्ब्रह्मेत्यग्राहियो
गिभिर्देवः॥ अत्रैकस्यापिभगवतस्तत्तद्गुणयोगादनेकधोल्लेखेगोपवधूप्रभृतीनांरुच्यादयोयथायोगंप्रयोजिकाः
॥ यथावा ॥ यथारुचियथार्थित्वंयथाव्युत्पत्तिभिद्यते। आभासोप्यर्थएकस्मिन्ननुसंधानसाधितः। तत्रभगवतःप्रियत्वादीनां
वास्तवत्वात्तद्ग्रहीतृभेदाच्चनमालारूपकं। नचभ्रांतिमान्। नचायमभेदेभेदइत्येवंरूपातिशयोक्तिः ॥ तत्रहि ॥ अन्यदेवांगला
वण्यमित्यादौलावण्यादेर्विषयस्यपृथक्त्वेनाध्यवसानं। नचेहभगवतिगोपवधूप्रभृतिभिःप्रियत्वाद्यध्यवसीयतेप्रियत्वादेर्भ
गवतितत्कालेतात्त्विकत्वात्। केचिदाहुः। अयमलंकारोनियमेनालंकारांतरविच्छित्तिमूलः। उक्तोदाहरणेचशिशुत्वादीनां
नियतातिशायत्वात्प्रियत्वादेर्भिन्नत्वाध्यवसायइत्यतिशयोक्तिरस्तितत्सद्भावेपिग्रहीतृभेदेननानात्वप्रतीतिरूपोविच्छित्ति
विशेषउल्लेखभिन्नालंकारत्वप्रयोजकः। श्रीकंठजनपदवर्णनेवज्रपंजरमितिशरणागतैरंबरविवरमितिवातिकैरित्यादि

ष्वातिशयोक्तेर्विविक्तो विषयः इह च रूपकालंकारयोगः वस्तुतस्त्वंबरविवरमित्यादौ भ्रांतिमेवेछंति। न रूपकं नेदप्रतीति
पुरःसरस्यैवारोपस्य गौणीमूलरूपकादिप्रयोजकत्वात्। यदाहुः शारीरमीमांसाव्याख्याने श्रीमद्वाचस्पतिमिश्राः॥ अपि च
परशब्दः परत्र लक्ष्यमाणगुणयोगेन वर्त्तत इति। यत्र प्रयोक्तृप्रतिपत्त्रोः संप्रतिपत्तिः स गौणः। स च नेदंप्रत्ययपुरःसर इति। इह
तु वातिकानां श्रीकंठादिजनपदे भ्रांतिकृत एवांबरविवरत्वाद्यारोप इति। अत्रैव च तपोवनमिति मुनिभिः कामायतनमिति।
वेश्याभिरित्यादौ च परिणामालंकारयोगः। गांभीर्येण समुद्रोसि गौरवेणासि पार्वतः इत्यादौ चानेकोल्लेखे गांभीर्यादि विषय
भेदः प्रयोजकः अत्र च रूपकयोगः गुरुर्वचसि पृथुरुरसि अर्जुनो यशसीत्यादि श्लेषस्य रूपकादिविविक्तो विषयः अत्र श्लेषमू
लातिशयोक्तियोगः प्रकृतं प्रतिषिध्यान्यत्स्थापनं स्यादपह्नुतिः। इयं च द्विधा। क्वचिदपह्नवपूर्वक आरोपः क्वचिदारोपपूर्वको
पह्नव इति॥ क्रमेणोदाहरणं॥ नेदं नभोमंडलमंबुराशिर्नैताश्च तारा नवफेनभंगाः। नायं शशी कुंडलितः फणींद्रो नायं क
लंकः शयितो मुरारिः। एतद्विभाति चरमाचलचूडचुंबिडिंडीरपिंडरुचिशीतमरीचिबिंबं। उज्वालितस्य रजनीमदनानल
स्य धूममं दधत्प्रकटलांछनकैतवेन॥ इदं पद्यं मम॥ एवं विराजति व्योमवपुः पयोधिस्तारामयास्तत्र च फेनभंगाः। इत्याद्या
कारेण प्रकृतनिषेधो वाच्यः। गोपनीयं कमप्यर्थं द्योतयित्वा कथंचन। यदि श्लेषेणान्यथा वान्यथयेत्साप्यपह्नुतिः॥ श्लेषेण
यथा॥ काले वारिधराणामपतितया नैव शक्यते स्थातुं। उत्कंठितासि तरले न हि न हि सखि पिच्छिलः पंथाः। अत्रापतितयेति ८१

पतिं विनेत्तुं त्वा पश्चात्पतनाभावेनेत्यन्यथाकृतं । एवं सीत्कारं शिक्षयति व्रणयत्यधरं तनोति रोमांचं । नागरिकः किमु मि-
लितो न हि न हि सखि हैमनः पवनः ॥ अश्लेषेण यथा ॥ इदमुरोनिलकंपितविग्रहा मिलति काननवनस्पतिना लता । स्मरसि
किं सखि कांतरतोत्सवं न हि घनागमरीतिरुदाहृता । वक्रोक्तौ परोक्तेरन्यथाकारः इदमस्योक्तेरिति भेदः । गोपनकृता गोपनी-
यस्यापि प्रथममभिहितत्वाच्च व्याजोक्तेः । अन्यन्निषिध्य प्रकृतस्थापनं निश्चयः पुनः । निश्चयाख्योलंकारः । अन्यदारोप्यमाणे
॥ यथा मम ॥ वदनमिदं न सरोजं नयने नेंदीवरे एते । इह सविधे मुग्धदृशो मधुकर न मुधा परिभ्राम्य ॥ यथा वा ॥ हृदि विस-
लताहारो नायं भुजंगमनायकः कुवलयदलश्रेणी कंठे न सा गरलद्युतिः । मलयजरजो नेदं भस्म प्रियारहिते मयि प्रहर
न हरभ्रांत्यानंग क्रुधा किमु धावसि । न ह्ययं निश्चयांतः संदेहः । तत्र संशयनिश्चययोरेकाश्रयत्वेनावस्थानात् । अत्र तु भ्रम-
रादेः संशयो नायकादेर्निश्चयः । किंच न भ्रमरादेरपि संशयः एककोट्यनधिकेज्ञानेन तथा समीपगमनासंभवात् । तर्हि
भ्रांतिमानस्तु । अस्य नाम भ्रमरादेर्भ्रांतिर्न चेदं तस्याश्चमत्कारविधायित्वमपि तु तथाविधनायकाद्युक्तेरेवेति सहृदयसंवे-
द्यं । किंच विवक्षिते पि भ्रमरादेः पतनादौ भ्रांतौ वा नायिकाचाटूद्दिरूपेणैव संभवत्येव तथाविधोक्तिः । न च रूपकध्वनिरयं
। मुखस्य कमलत्वेनानिर्धारणात् । न चापह्नुतिः अप्रस्तुतानिषेधादिति ध्येयमेवायमलंकारश्चिरंतनोक्तालंकारेभ्यः शुक्तिका-
यां रजतधिया पतति पुरुषे शुक्तिकेयं न रजतमिति कस्यचिदुक्तिर्नालंकारो वैचित्र्याभावात् । न चेत्संभावनोत्प्रेक्षा प्रकृत

साहित्यदर्पण॰ ८८ स्यात्परात्मना । वाच्या प्रतीयमाना सा प्रथमं द्विविधा मता । वाच्ये वादेः प्रयोगे स्यादप्रयोगे परा पुनः । जातिर्गुणः क्रिया द्रव्यं यदु-
त्प्रेक्ष्यं द्वयोरपि । तदष्टधापि प्रत्येकं भावाभावाभिमानिता । गुणक्रियास्वरूपत्वान्निमित्तस्य पुनश्च ताः । द्वात्रिंशद्विधतां यांति ॥ त-
त्र वाच्योत्प्रेक्षाया उदाहरणदिक् ॥ यथा ॥ ऊरूकुरंगकदृशश्चंचलचेलांचलो भाति । सपताकः कनकमयो विजयस्तंभः
स्मरस्येव । अत्र विजयस्तंभस्य बहुवाचकत्वाज्जात्युत्प्रेक्षा । ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः । गुणा गुणानुबंधित्वा-
त्तस्य सप्रसवा इव । अत्र सप्रसवत्वं गुणः । गंगांभसि सुरत्राण तव निःसाणनिःस्वनः । स्नातीवारिवधूवर्गगर्भपातनपात-
की ॥ अत्र स्नातीवेति क्रिया । मुखमेणीदृशो भाति पूर्णश्चंद्र इवापरः । अत्र चंद्र इत्येकवाचित्वाद्द्रव्यशब्दः । एते भावाभिमा-
ने । अभावाभिमाने यथा ॥ कपोलफलकावस्याः कष्टं भूत्वा तथाविधौ । अपश्यंताविवान्योन्यमीदृक्षां क्षामतां गतौ । अत्रा-
पश्यंताविति क्रियाया अभावः । एवमन्यत् । निमित्तस्य गुणक्रियारूपत्वे । यथा गंगांभसीत्यादौ स्नातीवेत्युत्प्रेक्षाया फलं
पातकित्वं गुणः । अपश्यंतावित्यादौ क्षामतागमनरूपं निमित्तं क्रिया । एवमन्यत् ॥ प्रतीयमानोत्प्रेक्षा यथा ॥ तन्वंग्याः स्त-
नयुग्मेन मुखं न प्रकटीकृतं । हाराय गुणिने स्थानं न दत्तमिति लज्जया । अत्र लज्जयेवेतीवाद्यभावात्प्रतीयमानोत्प्रेक्षा
एवमन्यत् । ननु ध्वनिनिरूपणप्रस्तावेऽलंकाराणां सर्वेषामपि व्यंग्यत्वं भवतीत्युक्तं संप्रति पुनर्विशिष्य कथमुत्प्रेक्षायाः प्र- ८८
तीयमानत्वमुच्यते । उच्यते । व्यंग्योत्प्रेक्षायां । महिलासहस्सभरिए तुह हिअए सुहअ सा अमाअंती । अणुदिणमणण्णक

म्भाऽङ्गं तप्तुमर्पितप्तुए इ । इत्यादावुत्प्रेक्षां विनापि वाक्यविश्रान्तिः इदं तु स्तनयोर्लज्जायाश्चासंभवात् । लज्जयेवेत्युत्प्रे
क्षवेति व्यङ्ग्यप्रतीयमानोत्प्रेक्षयोर्भेदः । तत्र वाच्योत्प्रेक्षायाः ॥ षोडशभेदेषु मध्येमध्ये विशेषमाह ॥ तत्र वाच्यस्तिदास्तु नः ।
विनाद्रव्यं त्रिधा सर्वा स्वरूपफलहेतुगाः । तत्रोक्तेषु वाच्यप्रतीयमानयोर्भेदेषु मध्ये ये वाच्योत्प्रेक्षाया भेदास्तेषु जात्यादीनां
त्रयाणां ये भावादश भेदास्तेषां प्रत्येकं स्वरूपफलहेतुगतत्वेन भावदशतया षट्त्रिंशद्भेदाः । द्रव्यस्य स्वरूपोत्प्रेक्षणमेव संभ
वतीति चत्वार इति मिलित्वा चत्वारिंशद्भेदाः तत्र स्वरूपोत्प्रेक्षा यथा पूर्वोदाहरणेषु स्मरस्य विजयस्तम्भ इव सप्रसवा इव
त्यादयः जातिगुणरूपाः फलोत्प्रेक्षा यथा । रावणस्यापि रामास्त्रो भित्त्वा हृदयमाशुगः विवेश भुवमाख्यातुमुरगेभ्य इव प्रि
यं । अत्राख्यातुमिति भुवेशस्य फलं क्रियारूपमुत्प्रेक्षितं ॥ हेतूत्प्रेक्षा यथा ॥ सैषा स्थली यत्र विचिन्वता त्वां भ्रष्टं मया नूपु
रमेकमुर्व्यां । अदृश्यत त्वच्चरणारविंदविश्लेषदुःखादिव बद्धमौनं । अत्र दुःखरूपो गुणो हेतुत्वेनोत्प्रेक्षितः । एवमन्यत् । उ
क्तानुक्तयोर्निमित्तस्य द्विधा तत्र स्वरूपगाः । तेषु चत्वारिंशत्संख्यकेषु भेदेषु मध्ये स्वरूपगायाः षोडश भेदाः । ते उत्प्रेक्षा नि
मित्तस्योपादानानुपादानाभ्यां द्वात्रिंशद्भेदा इति मिलितत्वात् षट्पंचाशद्भेदा वाच्योत्प्रेक्षायाः ॥ तत्र निमित्तस्योपादानं यथा
॥ पूर्वोदाहृते स्नातीवेत्युत्प्रेक्षायां निमित्तं पातकित्वमुपात्तं । अनुपादाने यथा चंद्र इवापर इत्यत्र तथाविधसौंदर्यातिश
योनोपात्तः हेतुफलयोस्तु नियमेन निमित्तस्योपादानमेव । तथाहि विश्लेषदुःखादित्यत्र यन्निमित्तं बद्धमौनत्वं । आख्या

तुमिवेत्यत्र नृपवेशस्तनयोरनुपादाने संगतमेव वाक्यस्यात्। प्रतीयमानायाः षोडशभेदेषु विशेषमाह। प्रतीयमानास्ते
दाश्चोत्प्रेक्षैकंफलहेतुगाः। यथोदाहृते। तन्व्यागास्तनयुग्मेनेत्यत्र लज्जयेवेति हेतूत्प्रेक्षितः। अस्यामपि निमित्तस्यानुपाद
नेन संभवति हेत्वाद्यनुपादाने निमित्तस्य वा कीर्तने उत्प्रेक्षणस्य प्रमातुर्निश्चेतुमशक्यत्वात् न भवति। धर्म्यंतरतादात्म्य
निबंधनायामस्यामिवाद्यप्रयोगे सत्यतिशयोक्तेरस्तु पगमात्॥ यथा राजापरः॥ पाकशासन इति विशेषणाभावे चक्र
पक्षस्य यथा। राजा पाकशासन इति। तदेवं द्वात्रिंशत्प्रकारा प्रतीयमानोत्प्रेक्षा। उक्त्यनुक्त्योः प्रस्तुतस्य प्रत्येकं ताऽपि द्वि
धा तावत्प्रेक्षाः॥ उक्तौ यथा॥ उरुः कुरंगकदृशः इत्यादि। अनुक्तौ यथा॥ मम प्रभावत्यां प्रद्युम्नः॥ इदं हि संप्रति प्रतिदिगंत
रमाछादयता तिमिरपटलेन। घटितमिवांजनपुंजैः पूरितमिव मृगमदक्षोदैः। ततमिव तमालतरुभिर्वृतमिव नीलांशुकैः
रेवनं। अत्रांजनघटितत्वादेरुत्प्रेक्षणीयस्य विषयो व्यापनत्वं नोपात्तं॥ यथा वा॥ लिंपतीव तमोंगानि वर्षतीवांजनं नभः
अत्र तमसो लेपनस्य व्यापनरूपो विषयो नोपात्तः अंजनवर्षणं तमःसंपातः अनयोरुत्प्रेक्षा निमित्तं च तमसो तिवहल
त्वं धारारूपेणाधः॥ संयोगश्च यथा॥ सरंभ। केचित्त्वलेपनकर्तृत्वं तमपि तमो लेपनकर्तृत्वेनोत्प्रेक्षितं व्यापनं च निमित्तं एवं
नभोपि वर्षणक्रियाकर्तृत्वेनेत्याहुः। अलंकारांतरोत्थासा वैचित्र्यमधिकं वदेत्॥ तत्र सापह्नवोत्प्रेक्षा यथा मम॥ अश्रु
छलेन सुदृशो हुतपावकधूमकलुषाक्ष्याः। अप्राप्य मानिवांगे विगलति लावण्यवारिभरइव॥ श्लेषहेतुका यथा॥ मुक्तो ८९

त्कारः संकटशुक्तिमध्याद्विनिर्गतः सारसलोचनायाः । जानीमहेऽस्याः कमनीयकंबुग्रीवाधिवासाद्गुणवत्त्वमाप । अत्र
गुणवत्त्वे श्लेषः कंबुग्रीवाधिवासादेवेति हेतूत्प्रेक्षाया हेतुः ॥ अत्र जानीमह इत्युत्प्रेक्षावाचकं । एवमन्येऽपि शंके ध्रुवं प्रायो नून
मित्येवमादयः ॥ क्वचिदुपमोपक्रमोत्प्रेक्षा यथा ॥ पाले जलं नीरनिधेरपश्यन्मुरारिरानीलपलाशराशीः वनावलीरुत्क
लिकासहस्रप्रतिक्षणोत्कूलितशैवलाभाः । इत्यत्राभाशब्दस्योपमावाचकत्वादुपक्रमे उपमा । पर्यवसाने तु जलधितीरे शै
वलक्षितेः संभवोपपत्तेः संभावनोत्थानमित्युत्प्रेक्षा । एवं विरहवर्णने केयूरस्वायितमंगदैरित्यत्र । विकासिनीलोत्पलति
स्मकर्णमृगायताक्ष्याः कुटिलः कटाक्षः इत्यादौ च ज्ञेयं । भ्रांतिमदलंकारे मुग्धो दुग्धधियेवेत्यादौ भ्रांतानां वल्लवादीनां विष
यस्य चंद्रिकादेर्ज्ञानेनाश्रितदुपनिबंधस्य कविनैव कृतत्वात् इह तु संभावनाकर्तुर्विषयस्यापि ज्ञानमिति द्वयोर्भेदः । सं
देहे तु समकक्षतया कोटिद्वयस्य प्रतीतिः इह तूत्कटा संभाव्यमानैककोटिः अतिशयोक्तौ विषयिणः प्रतीतस्य पर्यव
सानेऽसत्यता प्रतीयते इह तु प्रतीतिकाल एवेति भेदः । रंजिता नु विविधास्तरुशैला नामितं नु गगनं स्थगितं नु । पूरिता नु वि
षमेषु धरित्री संहृता नु ककुभस्तिमिरेण इत्यत्र यत्रर्वादौ तिमिराक्रांततारंजनादिरूपेण संदिह्यत इति संदेहालंकार इति
केचिदाहुः । तन्न । एकविषये समानबलतयानेककोटिस्फुरणस्यैव संदेहत्वात् । इह तु तर्वादिव्याप्तः प्रतिसंबंधिभेदः
व्यापनादेर्निगरणेन रंजनादेः स्फुरणं च । अन्यत्वनिर्धारणरूपविच्छित्त्याश्रयत्वेनैककोटावधिकेऽपि निर्णीयं संदेहप्रकारे

इतितदप्युक्तं। निगीर्णस्वरूपस्यान्यतादात्म्यप्रतीतिर्हिसंभावनातस्याश्चात्रस्फुटतयासद्भावात्। नतुशब्देनसैवशब्दवत्त
स्याद्योतनादुत्प्रेक्षैवेयंनवितुंयुक्ता। अलमदृष्टसंदेहप्रकारकल्पनया। यदेतच्चंद्रांतर्जलदलवलीलांवितनुतेयदाचष्टेलो॥
कःशशकइतिनोमांप्रतितथा। अहंत्विंदुमन्येत्वदरिविरहाक्रांततरुणीकटाक्षोल्कापातव्रणकिणकलंकांकिततनुं। अ
त्रमन्येशब्दप्रयोगेप्युक्तरूपायाःसंभावनायाअप्रतीतेर्वितर्कमात्रंनसापन्हुत्वोत्प्रेक्षा। सिद्धत्वेध्यवसायस्यातिशयोक्तिर्निग
द्यते। विषयनिगरणेनाभेदप्रतिपत्तिर्विषयिणोध्यवसायः। तस्यचोत्प्रेक्षायांविषयिणोऽनिश्चितत्वेननिर्देशात्साध्यत्वं। इह
तुनिश्चितत्वेनैवप्रतीतिरितिसिद्धत्वं। विषयनिगरणंचोत्प्रेक्षायांविषयस्याधःकरणमात्रेणइदायिमुखंद्वितीयश्चंद्रइत्यादौ
॥यदाह॥ विषयस्यानुपादानेप्युपादानेपिसूरयः। अधःकरणमात्रेणनिगीर्णत्वंप्रचक्षतइति। भेदेप्यभेदःसंबंधेसंबंधस्त
द्विपर्ययौ। पौर्वापर्यात्ययःकार्यहेत्वोःसापंचधाततः। तद्विपर्ययोअभेदेभेदःअसंबंधेसंबंधःसातिशयोक्तिः॥तत्रभेदेभेदो
यथा॥मम॥ कथमुपरिकलापिनःकलापोविलसतितस्यत[illegible]लेष्टमीदुखंडं। कुवलययुगलंततोविलोलंतिलकुसुमंतदधः
प्रवालमस्मात्। अत्रकांताकेशपाशादेर्मयूरकलापादिभिरभेदेनाध्यवसायः। यथावाविश्लेषदुःखादिववद्धमौनंअत्रचेत
नगतंमौनित्वमन्यदचेतनगतंचान्यदितिद्वयोर्भेदेप्यभेदः। एवंसद्वाधरदलेनास्ययौवनेरागभाक्प्रियः। अत्राधरस्यरागोलो॥ ८०
हित्यंप्रियस्यरागःप्रेमद्वयोरभेदः॥अभेदेभेदोयथा॥ अन्यदेवांगलावण्यमन्याःसौरभसंपदः। तस्याःपद्मपलाशाक्ष्याःसरस

त्वमलौकिकं ॥ संवंधेऽसंवंधो यथा ॥ अस्याः सर्गविधौ प्रजापतिरभूच्चंद्रो नु कांतिप्रदः शृंगारैकरसः स्वयं नु मदनो मासो नु
पुष्पाकरः । वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः । अत्र पुराणप्रजापते
र्निर्माणसंवंधेप्यसंवंधः ॥ असंवंधे संवंधो यथा ॥ यदि स्यान्मंडले सक्तमिंदोरिंदीवरद्वयं । तदोपमीयते तस्याः वदनं चारुलो
चनं । अत्र यद्यर्थवलादाहृतेन संभवेन संभावनया संवंधः । कार्यकारणयोः पौर्वापर्यविपर्ययश्च द्विधा भवति कारणात्प्र
थमं कार्यस्य भावे द्वयोः ॥ समानकालत्वे च क्रमेण यथा ॥ प्रागेव हरिणाक्षीणां चित्तमुत्कलिकाकुलं । पश्चादुद्भिन्नवकुल
रसालमुकुलश्रियः । सममेव समाक्रांतं द्वयं द्विरदगामिना । तेन सिंहासनं पित्र्यं मंडलं च महीक्षितां । इह केचिदाहुः । केशपा
शादिगतो लौकिकोतिशयो लौकिकत्वेनाध्यवसीयते । केशपाशादीनां कलापादिभिरभेदाध्यवसायेन्यदेवांगलावण्यमि
त्यादिप्रकारे व्याप्तिर्लक्षणस्येति । तन्न । तत्रापि ह्यन्यदंगलावण्यमित्यन्यत्वेनाध्यवसीयते तथाप्यत्रान्यदेवेति स्थानेन्यदिवेति
पाठेध्यवसायस्य साध्यत्वमित्युत्प्रेक्षांगीक्रियते । प्रागेव हरिणाक्षीणामित्यत्र वकुलादिश्रीणां प्रथमभावितापि पश्चाज्ज्ञावि
त्वेनाध्यवसिता । अत एवात्रापीवशब्दप्रयोगे उत्प्रेक्षा । एवमन्यत्र । पदार्थानां प्रस्तुतानामन्येषां वा यदा भवेत् । एकधर्माभिसंवं
धः स्यात्तदा तुल्ययोगिता । अन्येषामप्रस्तुतानां धर्मो गुणक्रियारूपः ॥ उदाहरणं ॥ अनुलेपनानि कुसुमान्यवलाः कृतमन्यु
वः पतिषु दीपशिखाः समयेन तेन सुचिरं शयितप्रतिवोधितं स्मरमवोधिषत । अत्र तमोवर्णनस्य प्रस्तुतत्वात्प्रस्तुतानामनुले

पनादीनामेकवोधनक्रियायां संवंधः। तदंगमार्द्रवद्दृष्टुः कस्यचिन्नेन नाम ते। मालतीशशभृल्लेखाकदलीनां कठोरता॥
अत्र मालत्यादीनामप्रस्तुतानां कठोरतारूपैकगुणसंवंधः। एवं दानं वित्ताद्दृतं वाचः कीर्तिधर्मौ तथायुषः। परोपकरणं का
यादसारात्सारमुद्धरेत्। अत्र दानादीनां कर्मभूतानां सारतारूपैकगुणसंवंधः एकदृरणक्रियासंवंधश्च। अप्रस्तुतप्रस्तु
तयोर्दीपकं तु निगद्यते। अथ कारकमेकं स्यादनेकासु क्रियासु चेत्॥ क्रमेणोदाहरणं॥ वलावलेपादधुनापि पूर्ववत्प्र
वाध्यते तेन जगज्जिगीषुणा। सतीव योषित्प्रकृतिः सुनिश्चला पुमांसमभ्येति भवान्तरेष्वपि। अत्र प्रस्तुताया निश्चलप्रकृतेरप्र
स्तुतायाश्च सत्या योषितः एकानुगमनक्रियासंवंधः। दूरं समागतवति त्वयि जीवनाथे भिन्ना मनोभवशरेण तपस्विनी सा। उ
त्तिष्ठति स्वपिति वासगृहं मदीयमायाति याति हसति श्वसिति क्षणेन॥ इदं मम पद्यं॥ अत्रैकस्या नायिकाया उत्थापनाद्यने
कक्रियासंवंधः। अत्र गुणक्रिययोरादिमध्यावसानसद्भावेन त्रैविध्यं न लक्षितं। तथाविधवैचित्र्यस्य सर्वत्रापि सहस्रधा सं
भवात्। प्रतिवस्तूपमा सा स्याद्वाक्ययोर्गम्यसाम्ययोः। एकोपि धर्मः सामान्यो यत्र निर्दिश्यते पृथक्॥ यथा॥ धन्यासि वैदर्भि
गुणैरुदारैर्यया समाकृष्यत नैषधोपि। इतः स्तुतिः का खलु चन्द्रिकाया यदब्धिमप्युत्तरलीकरोति। अत्र समाकर्षणमुत्तर
लीकरणं च क्रिया एकैव पौनरुक्त्यनिरासाय भिन्नवाचकतया निर्दिष्टा। इयं मालयापि दृश्यते॥ यथा॥ विमल एव रवि
र्विशदः शशी प्रकृतिशोभन एव हि दर्पणः। शिवगिरिः शिवहाससहोदरो सहजसुंदर एव हि सज्जनः। अत्र विमलविशा ८१

दादिरर्थतएकएव ॥ वैधर्म्येण यथा ॥ चकोर्य्यएवचतुराश्चन्द्रिकाचामकर्मणि । विनावंतीनंनिपुणाः सुदृशोरतकर्मणि ।
दृष्टांतस्तुसधर्मस्यवस्तुनः प्रतिबिंबनं साधर्म्यस्येतिप्रतिवस्तूपमाव्यवच्छेदः । अयमपिसाधर्म्यवैधर्म्याभ्यांद्विधा ॥ क्रमेण
उदाहरणं ॥ अविदितगुणापिसत्कविभणितिः कर्णेषुवमतिमधुधारां । अनधिगतपरिमलापिहिहरतिदृशंमालतीमाला । त्व
यिदृष्टेकुरंगाक्ष्याःस्रंसतेमदनव्यथा । दृष्टानुदयनाजीदौस्लानिः कुमुदसंहतेः । वसंतलेखांकनिवेधत्वावपरास्तुकांतास्तुम
नःकुतोनः । षट्फुल्लमल्लीमधुलंपटः किंमधुव्रतःकांक्षतिवल्लिमन्यांइदंपद्यंमम । अत्रमनःकुतोनःइत्यस्यकांक्षतिवल्लिम
न्यामित्यस्यचैकरूपतयैवपर्यवसानात्प्रतिवस्तूपमैव । इदंतुकर्सेमधुकरावमन्यस्यनेत्रहरणस्यसाम्यमेवनत्वैकरूप्यं
अत्रसमर्थ्यासिमर्थकवाक्ययोःसामान्यविशेषभावेर्थांतरन्यासः । प्रतिवस्तूपमादृष्टांतयोस्तुनतथेतिभेदः । संभवन्व
स्तुसंबंधोऽसंभवन्वापिकुत्रचित् । यत्रबिंबानुबिंबत्वंसाधयेत्सानिदर्शना । तत्रसंभवद्वस्तुसंबंधनिबंधना । यथाक्रोत्र
नृभिवलयेजनान्सुधातापयन्स्तुस्थिरमेतिसंपदं । वेदयन्नितिदिनेनभानुमानासमाससादचरमाचलंततः । अत्ररवेरीदृशा
र्थवेदनाक्रियायांकर्तृत्वेनान्वयःसंभवत्येव ईदृशार्थज्ञापनसमर्थचरमाचलप्राप्तिरूपकर्मवशात् स्वस्वरवेरस्ताच
लगमनस्यपरतापिनांविपत्प्राप्तेश्चबिंबप्रतिबिंबभावंबोधयति । असंभवद्वस्तुसंबंधनिबंधनात्वेकवाक्यानेकवाक्य
गतत्वेनद्विधा । तत्रैकवाक्यगायथा । कलयतिकुवलयमालाललितंकुटिलः कटाक्षविक्षेपः । अधरःकिशलयलीला

माननमस्याः कला निर्वधविलासं । अत्रान्यस्य धर्मं कथमन्यो वहत्विति कटाक्षविक्षेपादीनां कुवलयमालादिगतललि
तादीनां कलनमसंभवत्तल्ललितादिकमवगमयत्कटाक्षविक्षेपादेः कुवलयमालादेश्च बिंबप्रतिबिंबभावं बोधयति ॥ य
था वा ॥ प्रयाणे तव राजेन्द्र मुक्ता वैरिमृगीदृशां । राजहंसगतिः पद्भ्यामाननेन शशिद्युतिः । अत्र पादाभ्यामसंबंधराजगते
स्त्यागो ऽनुपपन्न इति तयोस्तत्संबंधः कल्प्यते स चासंभवन् हंसगतिमिव गतिं बोधयति ॥ अनेकवाक्यगा यथा ॥ इदं किला
व्याजमनोहरं वपुरित्यादि । अत्र यच्छब्दनिर्दिष्टवाक्यार्थयोरभेदेनान्वयोऽनुपपद्यमानस्तादृशवपुरूषस्तपःसाधनक्ष
मत्वेच्छा नीलोत्पलपत्रधारया समिल्लताछेदनेच्छेवेति बिंबप्रतिबिंबभावे पर्यवस्यति । अत्र भवभोगविलोभनेन जन्मनो
व्यर्थतानयनं काचमूल्येन चिंतामणिविक्रय इति पर्यवसानं । एवं क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः । तितीर्षुर्दु
स्तरं मोहादुडुपेनास्मि सागरं । अत्र मन्मत्या सूर्यवंशवर्णनमुडुपेन सागरतरणमिवेति पर्यवसानं । इयं क्वचिदुपमेय
वृत्तस्योपमाने ऽसंभवे ऽपि भवति । यथा योऽनुभूतः कुरंगाक्ष्यास्तस्या मधुरिमाधरे । समास्वादि स मृद्वीकारसे रसविशा
रदैः ॥ अत्र भूतस्याधरस्य मधुरिमधर्मस्य द्राक्षारसे ऽसंभवात्तद्वत्साम्ये पर्यवसानं ॥ मालारूपमपि यथा मम ॥ क्षिप
ति शुकं विषदंष्ट्राकरदने मृगसर्पव्यसि मृगादनदमने । वितरसि तुरगं महिषविषाणे विदधच्चेतो भोगविताने । इह बिंब
प्रतिबिंबताक्षेपं विना वाक्यार्थापर्यवसानं । दृष्टांते तु पर्यवसितेन वाक्यार्थेन सामर्थ्यादिबिंबप्रतिबिंबताप्रत्यायनं । नापी ८२

यमर्थापत्तिः। हारोयं हरिणाक्षीणामित्यादौ साहश्यपर्यवसानाभावात्। आधिक्यमुपमेयस्योपमानान्न्यूनताथवा
व्यतिरेकः सच। एकउक्ते हेतौ नोक्ते पुनस्त्रिधा। चतुर्विधोपि साम्यस्य बोधनाच्छब्दतोर्थतः। आक्षेपाच्च द्वादशधा श्लेषेपी
ति त्रिरष्टधा प्रत्येकं स्यान्मिलित्वाष्टचत्वारिंशद्विधः पुनः उपमेयस्योपमानादाधिक्ये हेतुरुपमेयगतमुत्कर्षकारणमुप
मानगतं निःकर्षकारणं च तयोर्द्वयोरप्युक्तावेकः प्रत्येकं समुदायेन वानुक्तौ त्रिविध इति चतुर्विधेप्यस्मिन्नुपमानोपमे
यस्य निवेदनं शाब्देनार्थेनाक्षेपेण चेति। द्वादशप्रकारोपि श्लेषेपि शब्दाच्छ्लेषेपि न भवतीति चतुर्विंशतिप्रकाराः। उपमाना
न्न्यूनतायामप्यनयैव संख्या चतुर्विंशतिप्रकारतेति मिलित्वाष्टाचत्वारिंशत्प्रकारो व्यतिरेकः॥ उदाहरणं॥ अकलंकं मु
खं तस्याः न कलंकिविधुर्यथा॥ अत्रोपमेयगतमकलंकत्वमुपमानगतं च कलंकित्वं हेतुद्वयमप्युक्तं। यथात्र शब्दप्रति
पादनाच्छाब्दौपम्यं। अत्रैव न कलंकिविधूपममिति पाठे त्वार्थं। जयंतीन्दुं कलंकिनमिति पाठे त्विवादितुल्यादिपदवि
रहादाक्षिप्तं। अत्रैवाकलंकपदत्यागे उपमेयगतोत्कर्षकारणानुक्तिः कलंकिपदत्यागे चोपमानगतनिकर्षकारणा
नुक्तिः द्वयोरनुक्तौ द्वयोरनुक्तिः। श्लेषे यथा॥ अतिगाढगुणायाश्च नाब्जवद्भंगुरा गुणाः। अत्रेवार्थे वतिरिति शाब्दमौपम्य
मुत्कर्षनिकर्षकारणयोर्द्वयोरप्युक्तिः गुणशब्दः श्लिष्टः अन्ये भेदाः पूर्ववदूह्याः। एतानि चोपमेयस्योपमानादाधिक्ये उ
दाहरणानि॥ न्यूनत्वे दिग्मात्रं यथा॥ क्षीणः क्षीणोपि शशी भूयो भूयोपि वर्द्धते सत्यं। विरम प्रसीद सुन्दरि यौवनमनि

वर्त्तियातं तु अत्रोपमेयभूतयौवनास्थैर्यस्याधिक्यं तेनात्रोपमानादुपमेयस्याधिक्ये विपर्यये वा व्यतिरेक इति केषांचि
ल्लक्षणे विपर्यये चेति पदमनर्थकमिति यत्केचिदाहुः तन्न विचारसहं तथाह्यत्राधिक्यन्यूनत्वे सत्त्वासत्त्वे एव विवक्षिते अत्र
त्वं चेड्डापेक्षया यौवनस्यासत्त्वं स्फुटमेव अस्तु वात्रोदाहरणे यथाकथंचिद्गतिः हनूमदाद्यैर्यशसा मया पुनर्द्विषां हसैर्दू
तपथः सितीकृत इत्यादिषु का गतिरिति सुष्ठूक्तं न्यूनताथवेति सहार्थस्य बलादेकं यत्र स्याद्वाचकं द्वयोः सा सहोक्तिर्मू
लभूतातिशयोक्तिर्यदा भवेत् अत्रातिशयोक्तिरप्यत्राभेदाध्यवसायमूला कार्यकारणपौर्वापर्यविपर्ययरूपा च अ
भेदाध्यवसायमूला च श्लेषभित्तिका अन्यथा च ॥क्रमेणोदाहरणं॥ सहाधरदलेनास्या यौवने रागभाक्प्रियः अत्र रागपद
श्लेषः सह कुमुदकदंबैः काममुल्लासयंतः सह घनतिमिरौघैर्धैर्यमुत्सारयंतः सह समरसिजखंडैः स्वांतरामीलयंतः प्र
तिदिशममृतांशोरंशवः संचरंति इदं मम अत्रोल्लासादीनां संबंधिभेदादेव भेदः ॥नतु क्लिष्टतया॥ सममेव नराधिपेन
सा गुरुसंमोहविलुप्तचेतना अगमत्सह तैलबिंदुना ननु दीपार्चिरिव क्षितेस्तलं इयं मालायामपि यथोदाहृते सह
कुमुदकदंबैरित्यादौ लक्षणेन समं रामः काननं गहनं ययावित्यादौ चातिशयोक्तिमूलत्वाभावान्नायमलंकारः विनो
क्तिर्यद्विनान्येन नासाध्वन्यदसाधु वा नासाधु अशोभनं न भवति एवं यद्यपि शोभनत्व एव पर्यवसानं तथाप्यशोभ
नत्वाभावमुखेन शोभनत्ववचनस्यायमभिप्रायो यत्कस्यचिद्वर्णनीयस्याशोभनत्वं तत्परसंनिधेरेव दोषस्तस्य पुनः स्व

त्तावतः शोभनत्वमेवेति ॥ यथा ॥ विना जलदकालेन चंद्रो निस्तंद्रतां गतः । विना ग्रीष्मोष्मणा मंजुर्वनराजिरजायत ॥ अ-
साध्वशोभनं यथा । अनुयान्त्या जनातीतं कान्तं साध्व त्वया कृतं । का दिनश्रीर्विनार्केण का निशा शशिना विना ॥ निरर्थकं ज-
न्मगतं नलिन्या यया न दृष्टं तुहिनांशुबिंबं । उत्पत्तिरिंदोरपि निष्फलैव दृष्टा विनिद्रा नलिनी न येन ॥ अत्र परस्परविनोक्तिरू-
पश्चमत्कारातिशयः । विना शब्दप्रयोगाभावेपि विनार्थविवक्षायां विनोक्तिरेवेयं । एवं सहोक्तिरपि सहशब्दप्रयोगाभा-
वे सहार्थविवक्षायां भवतीति बोध्यं ॥ समासोक्तिः समैर्यत्र कार्यलिंगविशेषणैः । व्यवहारसमारोपः प्रस्तुतेन्यस्य वस्तुनः ॥
अत्र कार्येण प्रस्तुते व्यवहारसमारोपो यथा । आधूनयन्सरसमंबुजलोचनाया वक्षोजयोः कनककुंभविलासभाजोः ।
आलिंगसि प्रसभमंगमशेषमस्माद्धन्यस्त्वमेव मलयाचलगंधवाह ॥ अत्र गंधवाहे कामुकत्वव्यवहारसमारोपः ॥ लिंग-
साम्येन यथा ॥ असमाप्तजिगीषस्य स्त्रीचिंता का मनस्विनः । अनाक्रम्य जगत्कृत्स्नं नो संध्यां भजते रविः ॥ पुंस्त्रीलिंगमात्रे-
ण रविसंध्ययोर्नायकनायिकाव्यवहारः । विशेषणसाम्यं तु श्लिष्टतया साधारण्येनौपम्यगर्भत्वेन च त्रिधा । तत्र श्लिष्टत-
या यथा मम । विकसितमुखीं रागाद्वेगाद्गलत्तिमिरावृतिं दिनकरकरस्पृष्टामैंद्रीं निरीक्ष्य दिशं पुरः । जरठलवलीपांडुच्छा-
योच्चैः शशी कलुषान्तरः श्रयति हरितं हंत प्राचेतसीं तुहिनद्युतिः ॥ अत्र मुखरागादिशब्दानां श्लिष्टता । अत्र हि तिमिरावृतिमित्य-
त्र तिमिरांशुकामिति पाठे एकदेशस्य रूपणेपि समासोक्तिरेव । न त्वेकदेशविवर्त्ति रूपकं । अत्र हि तिमिरांशुकयोः रूप्य-

रूपकत्वाबोधयोरावरकत्वेन स्फुटसादृश्यतया परस्पराविश्रान्तमनपेक्ष्यापि स्वमात्रे विश्रान्त इति न समासोक्तिबुद्धिं व्य
पदेष्टुमीशः। यत्र तु रूप्यरूपकयोः सादृश्यमस्फुटं तत्रैकदेशान्तररूपणं विना तदसंगतं स्यादित्याक्षिप्तमप्येकदेशान्तर
रूपणमार्थमपेक्ष्यत एवेति। तत्रैकदेशविवर्ति रूपकमेव॥ यथा॥ जस्स रणंतेउरए करे कुणंतस्स मंडलग्गलअं। रससं
मुही वि सहसा परम्मुही होइ रिउसेणा। अत्र रणान्तःपुरयोः सादृश्यमस्फुटमेव। क्वचिच्च यत्र स्फुटसादृश्यानामपि वक्त
नां रूपणं शाब्दमेकस्य चार्थं तत्रैकदेशविवर्ति रूपकमेव। रूपकप्रतीतेर्व्याप्यतया समासोक्तिप्रतीतितिरोधायकत्वा
त्। नन्वत्र रणान्तःपुरयोरपि सुखसंचारितया स्फुटसादृश्यमिति चेत्। सत्यमुक्तमस्त्येव किंतु वाक्यपर्यालोचनसापे
क्षं मुखचन्द्रादेर्मनोहरत्वादिवद्रणान्तःपुरयोः सुखसंचारित्वाभावात्॥ साधारण्येन यथा॥ निसर्गसौरभोद्भ्रान्तभृंगसं
गीतशालिनी। उदिते वासराधीशे स्मेरा जनि सरोजिनी। अत्र निसर्गेत्यादिविशेषणस्य साम्यात्सरोजिन्याः नायिकाव्य
वहारप्रतीतौ स्त्रीमात्रगामिनः स्मेरत्वधर्मस्य समारोपः कारणं। तेन विना विशेषणसाम्यमात्रेण नायिकाव्यवहारप्रती
तेरसंभवात्। उपमागर्भत्वे तु पुनस्त्रिधा संभवति। उपमारूपकसंकरगर्भत्वात्। तत्रोपमागर्भत्वे यथा। दंतप्रभापुष्पचि
ता पाणिपल्लवशोभिनी। केशपाशालिवृंदेन सुवेषा हरिणेक्षणा। अत्र सुवेषत्ववशात्प्रथमं दंतप्रभाः पुष्पाणीवेत्युप ९४
मागर्भत्वेन समासः। अनंतरं च दंतप्रभासदृशैः पुष्पैश्चितेत्यादिसमासान्तराश्रयेण समासविशेषणमाहात्म्याद्धरिणेक्ष

णायाल्लताव्यवहारप्रतीतिः । रूपकगर्भत्वे यथा लावण्यमधुभिः पूर्णमित्यादि । संकरगर्भत्वे यथा दंतप्रभापुष्पेत्या
दौ स्तुवेषेत्यस्य स्थाने परीतेति पाठेऽत्र ह्युपमारूपकसाधकाभावात्संकरसमाश्रयणे समासांतरं । पूर्ववत्समासांतर
मद्दिम्नालताप्रतीतिः । एषु चैकेषां मते उपमासंकरयोरेकदेशविवर्तिता नास्ति तन्मते आद्यद्वितीययोः समासोक्तिः द्वि
तीयस्तु प्रकार एकदेशविवर्तिरूपकविषय एव । पर्यालोचनेत्वाद्यप्रकारे एकदेशविवर्तिन्युपमैवांगीकर्तुमुचित । अ
न्यथा ॥ ऐंद्रं धनुः पांडुपयोधरेण शरद्दधानार्द्रनखक्षताभं । प्रसादयंती सकलंकमिंदुं तापं रवेरप्यधिकं चकार । इत्यत्र
कथं शरदो नायिकाव्यवहारप्रतीतिः । नायिकापयोधरेणार्द्रनखक्षताभशक्रचापधारणासंभवात् । नन्वत्रार्द्रनखक्ष
ताभमित्यत्राक्षिप्तमप्युपमानत्वं वस्तुपर्यालोचनया ऐंद्रधनुषि संचारणीयं । यथा दध्ना जुहोतीत्यादौ द्रवनस्यान्यथा
सिद्धे दध्नि संचार्यते विधिः । एवं चेंद्रचापाभमार्द्रनखक्षतं दधानेति प्रतीतिरेव विषयतीति चेन्न । एवंविधानिर्वाह्यकष्टसृष्टि
कल्पनात् एकदेशविवर्तिन्युपमांगीकारस्यैव न्याय्यत्वात् ॥ अस्तु वात्र यथाकथंचित्समासोक्तिः । नेत्रैरिवोत्पलैः पद्मैरि
त्यादौ चान्यगत्यसंभवात् । किंचोपमायां व्यवहारप्रतीतेरभावात्कथं तदुपजीवितायाः समासोक्तेः प्रवेशः । यदाहुः । व्यव
हारोऽथवा तत्त्वमौपम्ये तत्प्रतीयते । तत्रौपम्ये समासोक्तिरेकदेशोपमास्फुटा । एवं चोपमारूपकयोः एकदेशवर्तित्वांगीकारे त
न्मूलसंकरेऽपि समासोक्तेरप्रवेशो न्यायसिद्ध एव । तेनौपम्यगर्भविशेषणोत्थापितत्वेनास्या विषय इति । विशेषणसाम्येऽपि श्लि

ष्टविशेषणोत्थापिता साधारणविशेषणोत्थापिता चेति द्विधा । कार्यलिंगयोस्तुल्यत्वे च द्विधेति चतुःप्रकारा समासोक्तिः स
र्वत्र चात्र व्यवहारसमारोपः कारणं । स च क्वचिल्लौकिके वस्तुनि लौकिकव्यवहारसमारोपः शास्त्रीये वस्तुनि शास्त्रीयव्यव
हारसमारोपः । लौकिके शास्त्रव्यवहारसमारोपः शास्त्रीये लौकिकव्यवहारसमारोप इति चतुर्धा । अत्र लौकिकवस्त्वपि र
सादिभेदादनेकविधं शास्त्रीयमपि तर्कायुर्वेदज्योतिःशास्त्रप्रसिद्धतयेति बहुप्रकारा समासोक्तिः । दिङ्मात्रं यथा व्याधूनयद्व
सनमित्यादौ लौकिकस्य हठकामुकव्यवहारादेः समारोपः । यैरेकरूपमखिलास्वपि वृत्तिषु त्वां पश्यद्भिरव्ययमसंख्यत
या प्रवृत्तं । लोपः कृतः किल परत्वजुषो विभक्तेस्तैर्लक्षणं तव कृतं ध्रुवमेव मन्ये । अत्रागमशास्त्रप्रसिद्धे वस्तुनि व्याकरणा
शास्त्रप्रसिद्धवस्तुव्यवहारसमारोपः । एवमन्यत्र रूपके प्रकृतमात्मरूपसन्निवेशेन प्रकृतस्य रूपमवच्छादयति । इह तु स्वा
वस्थासमारोपेणानवच्छादितस्वरूपमेव तं स्वीयावस्थातो विशेषयति । अत एवात्र व्यवहारमारोपो न तु रूपसमारोप इत्या
हुः । उपमाध्वनौ श्लेषे च विशेषस्यापि साम्यं इह तु विशेषमात्रस्य । अप्रस्तुतप्रशंसायां प्रस्तुतस्य गमत्वं । इह त्वप्रस्तुतस्येति भे
दः । उक्तैर्विशेषणैः साभिप्रायैः परिकरो मतः । यथात्राङ्गराजसेनापते द्रोणोपहासिन्कर्ण रक्षैनं भीमाद्दुःशासनं । शब्दैः
स्वभावादेकार्थैः श्लेषोऽनेकार्थवाचनं । स्वभावादेकार्थैरिति शब्दश्लेषस्य व्यवच्छेदः वाचनमिति ध्वनेः । ॥उदाहरणं॥ प्रवर्त्त
यन्क्रियाः साध्वीर्मालिन्यं हरितां हरन् । महसा भूयसा दीप्तो विराजति विभाकरः । अत्र प्रकरणादिनियमाभावाद्द्वावपि ।

राजसूर्यौ वाच्यौ । क्वचिद्विशेषः सामान्यात्सामान्यं वा विशेषतः । कार्यान्निमित्तं कार्यं च हेतोरथ समात्समं । अप्रस्तुतात्प्र
स्तुतं चेद्गम्यते पंचधा ततः । अप्रस्तुतप्रशंसा स्यात् ॥ क्रमेणोदाहरणं ॥ पादाहतं यदुत्थाय मूर्धानमधिरोहति । स्वस्थादेवा
पमानेपि देहिनस्तद्वरं रजः । अत्रास्मदपेक्षया रजोपि वरमिति विशेषे प्रस्तुते सामान्यमभिहितं । स्रगियं यदि जीवितापहा हृ
दये किं निहिता न हन्ति मां । विषमप्यमृतं भवेत्क्वचिदमृतं वा विषमीश्वरेच्छया । अत्रेश्वरेच्छया क्वचिदहितकारिणोपि हित
कारित्वं हितकारिणोप्यहितकारित्वमिति सामान्ये प्रस्तुते विशेषोभिहितः ॥ एवं चाप्रस्तुतप्रशंसामूलोर्थान्तरन्यासः । दृष्टान्ते
प्ररमातमेव वस्तु प्रतिबिंबत्वेनोपादीयते इह तु विषामृतयोरमृतविषीभावस्याभावः इन्दुर्लिप्त इवाञ्जनेन जडिता दृष्टिर्मृगीणा
मिव प्रम्लानारुणिमेव विद्रुमदलं श्यामेव हेमप्रभा । कार्कश्यं कलया च कोकिलवधूकंठेष्विव प्रस्तुतं सीतायाः पुरतश्च हन्त शि
खिनां बर्हाः सगर्हा इव । अत्र संभाव्यमानेन्द्वादिगताञ्जनतुल्यत्वादिना कार्येण सीतावदनादिगतसौन्दर्यविशेषरूपं प्रस्तुतं
कारणं प्रतीयते । गच्छामीति मयोक्तया मृगदृशा निःश्वासमुद्रेकिणं मुक्त्वा तिर्यगवेक्ष्य बाष्पकलुषेणैकेन मां चक्षुषा । अद्य
प्रेममदर्पितं प्रियसखीवृन्दे त्वया बध्यतामित्थं स्नेहविवर्धितो मृगशिशुः सोत्प्रासमाभाषितः । अत्र कस्यचिद्गमनरूपे का
र्ये प्रस्तुते कारणमभिहितं । तुल्ये प्रस्तुते तुल्याभिधाने द्विधा । श्लेषमूला सादृश्यमूला च श्लेषमूलापि समासोक्तिवद्विशेषणमा
त्रश्लेषवद्विशेष्यस्यापि भवतीति द्विधा ॥ क्रमेण यथा ॥ सद्कारसदामोदो वसन्तश्रीसमाश्रितः । समुज्ज्वलरुचिः श्रीमान्प्र

तोत्कलिकाकुलः। अत्र विशेषणस्य श्लेषवशादप्रस्तुतात्सद्व्यवहारात्कस्यचित्प्रस्तुतस्य नायकस्य प्रतीतिः। पुंस्त्वादपि प्र
विचलेद्यदि यद्यधोपि यायाद्यदि प्रणयेन न महानपि स्यात्। अभ्युद्धरेत्तदपि विश्वमितीदृशीयं केनापि दिक्प्रकटिता पुरुषो
त्तमेन। अत्र पुरुषोत्तमपदेन विशेष्येणापि श्लिष्टेन प्रचुरप्रयोगसिध्यात्प्रथमं विष्णुरेव बोध्यते इति न वर्णनीयः कश्चित्पुरुषः प्र
तीयते। सादृश्यमात्रमूला यथा। एकः कपोतः शतशः श्येनाः क्षुधयाभिधावंति। अंबरमावृतिशून्यं परमिह शरणं विधेः करु
णा। अत्र कपोतादप्रस्तुतात्कश्चित्प्रस्तुतः प्रतीयते। इयं च क्वचिद्वैधर्म्येणापि संभवति॥ यथा॥ धन्याः खलु वने वाताः कल्हा
रस्पर्शशीतलाः। राममिंदीवरश्यामं ये स्पृशंत्यनिवारिताः। अत्र वाताः धन्याः अहमधन्य इति वैधर्म्येण प्रस्तुतः प्रतीयते॥
वाच्यस्य संभवासंभवोभयरूपतया त्रिःप्रकारेयं तत्र संभवे उक्तोदाहरणान्येव। असंभवे यथा। कोकिलोहं भवान्का
कः समानः कालिमावयोः। अंतरं कथयिष्यंति काकलीकोविदाः पुनः॥ अत्र काककोकिलयोः॥ कथं कमलनालस्य
मा भवन्भंगुरा गुणाः। अत्र प्रस्तुतस्याकस्य विदारोप्य विनाछिद्राणां गुणभंगुरीकरणे हेतुत्वमसंभवि अन्येषां तु संभवीत्यु
भयरूपत्वमस्याश्च समासोक्तिवद्व्यवहारसमारोपप्राणत्वात्शब्दशक्तिमूलाद्वस्तुध्वनेर्भेदः। उपमाध्वनावप्रस्तुतस्य
व्यंग्यत्वमेवं समासोक्तावपि श्लेषेपि द्वयोरपि वाच्यत्वं। उक्ता व्याजस्तुतिः पुनः। निंदास्तुतिभ्यां वाच्याभ्यां गम्यत्वे सति निंदयोः॥ ८६
निंदया स्तुते गम्यत्वे व्याजेन स्तुतिरिति व्युत्पत्त्या व्याजस्तुतिः। स्तुत्या निंदायाः गम्यत्वे तु व्याजस्तुतिः क्रमेणोदाहरणं। स्तन

युगमुक्तास्तरणाः कंटककलितांगयष्टयो देव । प्रागिव विश्वस्ता अपि कुपिते रिपुस्त्रियो जाताः ॥ इदं मम ॥ व्याजस्तुति
स्तव पयोदमयोदिते यं यज्जीवनाय जगतस्तव जीवनानि । स्तोत्रं तु ते महदिदं घन धर्मराजसाहाय्यमर्जयसि यत्पथिका
न्निहत्य ॥ पर्यायोक्तं यदा भंग्या गम्यमेवाभिधीयते ॥ उदाहरणं ॥ स्पृष्टास्तानंदनेशाच्याः केशसंभोगलालिताः । सावज्ञं पारि
जातस्य मंजर्यो यस्य सैनिकैः ॥ अत्र हयग्रीवेण स्वर्गो विजित इति प्रस्तुतमेव गम्यं कारणरूपं वैचित्र्यविशेषप्रतिपत्तये से
न्यस्य पारिजातमंजरीसावज्ञस्पर्शनरूपकार्यद्वारेणाभिहितं । न चेदं कार्यात्कारणप्रतीतिरूपाऽप्रस्तुतप्रशंसा तत्र का
र्यस्याप्रस्तुतत्वात् । इह तु वर्णनीयप्रभावातिशयबोधकत्वेन कार्यमपि कारणवत्प्रस्तुतं । एवं च । अनेन पर्यासयताश्रु
बिंदून्मुक्ताफलस्थूलतमान्स्तनेषु । प्रत्यर्पिताः शत्रुविलासिनीनामाक्षिप्य सूत्रेण विनैव हाराः ॥ अत्र वर्णनीयस्य राज्ञो
गम्यं यत् शत्रुमारणरूपकारणवत्कार्यं यत्तत्तथाविधशत्रुस्त्रीक्रंदनजननत्वमपि प्रभावातिशयबोधकत्वेन वर्णनार्ह
मिति पर्यायोक्तमेव । राजन् राजसुता न पाठयति मां देव्योऽपि तूष्णीं स्थिताः कुब्जे भोजय मां कुमार सचिवैर्नाद्यापि किं भुज्य
ते । इत्थं राजशुकस्तवारिभवने मुक्तोऽध्वगैः पंजराच्चित्रस्थानवलोक्य शून्यवलभावेकैकमाभाषते ॥ अत्र प्रस्थानोद्यतं भ
वंतमाकर्ण्य सहसैवारयः पलायिता इति कारणं प्रस्तुतं कार्यमपि वर्णनार्हत्वेन प्रस्तुतमिति केचित् । अन्ये तु राजशुक
वृत्तांतेन न कोऽपि प्रस्तुतस्य प्रभावो बोध्यत इत्यप्रस्तुतप्रशंसैवेत्याहुः । सामान्यं वा विशेषेण विशेषस्तेन वा यदि । कार्यं का

साहित्यदर्पण
८१
91

रणतोनेदं कार्येण च समर्थ्यते। साधर्म्येणेतरेणार्थान्तरन्यासोऽष्टधा ततः॥ क्रमेणोदाहरणं॥ बृहत्सहायः कार्यान्तं क्षोदी
यानपि गच्छति। संभूयाम्भोधिमभ्येति महानद्या नगापगा। अत्र द्वितीयार्द्धगतेन विशेषरूपेणार्थेन प्रथमार्द्धगतः सामान्यरू
पोऽर्थः सोपपत्तिकः क्रियते। यावदर्थपदां वाचमेवमादाय माधवः। विरराम महीयांसः प्रकृत्या मितभाषिणः। पृथ्वि स्थिरा भ
व भुजंगम धारयैनां त्वं कूर्मराज तदिदं द्वितयं दधीथाः। दिक्कुञ्जराः कुरुत तत्त्रितये दिधीर्षां रामः करोति हरकार्मुकमातत
ज्यं। अत्र कारणभूतं हरकार्मुकाततज्यमङ्गीकरणं पृथिवीस्थैर्यादेः कार्यस्य सामर्थकं। सहसा विदधीत न क्रियामित्यादौ सं
पत्करणं कार्यं सहसा विधानाभावस्य विमृश्यकारित्वरूपस्य कारणस्य समर्थकं। एतानि साधर्म्योदाहरणानि॥ वैध
र्म्ये यथा। इत्थमाराध्यमानोऽपि क्लिश्नाति भुवनत्रयं। शाम्येत्प्रत्यपकारेण नोपकारेण दुर्जनः। अत्र सामान्यं विशेषस्य
समर्थकं। सहसा विदधीतेत्यस्य सहसा विधानाभावस्यापत्पदत्वविरुद्धं कार्यं समर्थकं। एवमन्यत्। हेतोर्वाक्यपदार्थ
त्वे काव्यलिंगं निगद्यते। तत्र वाक्यार्थता यथा॥ यत्त्वन्नेत्रसमानकान्ति सलिले मग्नं तदिन्दीवरं मेघैरन्तरितः प्रिये तव मुख
च्छायानुकारी शशी। येऽपि त्वद्गमनानुकारिगतयस्ते राजहंसा गतास्त्वत्सादृश्यविनोदमात्रमपि मे दैवेन न क्षम्यते। अ
त्र चतुर्थपादे पादत्रयवाक्यानि हेतवः॥ पदार्थता यथा मम॥ त्वद्वाजिराजिनिर्धूतधूलीपटलपङ्किला। न धत्ते शिरसा गङ्गां ८१
भूरिभारभिया हरः। अत्र द्वितीयार्द्धे प्रथमार्द्धमेकं पदं हेतुः॥ अनेकपदं यथा ममैव॥ पश्यपसां संख्यपप्यगात्वद्धामजल

वाहिनी। देव त्रिपथगात्मानं गोपयस्तुग्रमूर्द्धनि। इह केचिद्वाक्यार्थगतेन काव्यलिंगेनैव गतार्थतया कार्यकारणभावे ऽर्थां
तरन्यासं नाद्रियन्ते॥ तदयुक्तं॥ तथा ह्यत्र हेतुस्त्रिविधो भवति। ज्ञापको निष्पादकः समर्थकश्चेति। तत्र ज्ञापको ह्यनुमानस्य
विषयः निःपादकः काव्यलिंगस्य समर्थको ऽर्थान्तरन्यासस्येति पृथगेव कार्यकारणभावे ऽर्थान्तरन्यासः काव्यलिंगात्॥ तथा हि॥
यत्नेनैत्यादौ चतुर्थपादे वाक्यमन्यथा साकांक्षतया सामंजस्यमेव स्यादिति पादत्रयगतं वाक्यं निःपादकत्वेनापेक्षते। सह
सा विदधीतेत्यादौ तु परापकारनिरतैर्दुर्जनैः सह संगतिः। वदामि भवतस्तत्त्वं न विधेया कदाचनेत्यादिवदुपदेशमात्रेणापि नि
राकांक्षतया स्वतो ऽपि गतार्थं सहसाविधानाभावं संपत्करणासोपपत्तिकमेव करोतीति पृथगेव कार्यकारणभावे ऽर्थान्तरन्यासः
काव्यलिंगात्। न धत्ते शिरसा गंगां भूरिभारभियाद्धरः। त्वद्वाजिराजिनिर्धूतधूलिभिः पंकिलादिमा इत्यत्र द्विशब्दोपादानेन पंकिल
त्वादिव हेतुः तस्य स्फुटतया नालमलंक्रमः। वैचित्र्यस्यैवालंकारत्वात्। अनुमानं तु विच्छित्त्या ज्ञानं साध्यस्य साधनात्॥ यथा॥
जानीमहे ऽस्याः हृदि सारसाक्ष्या विराजतेन्तः प्रियवक्त्रचन्द्रः। तत्कांतिजालैः प्रसृतैस्तदंगेष्वापांडुता कुड्मलताक्षिपद्मे। अत्र रूपक
वशाद्विच्छित्तिः। यथा वा यत्र पतत्यबलानां दृष्टिर्निशिताः पतन्ति तत्र शराः। तच्चारोपितशरो धावत्यासां पुरः स्मरो मन्ये। अत्र कवि
प्रौढोक्तिवशाद्विच्छित्तिः उत्प्रेक्षायामनिश्चिततया प्रतीतिरिति इह हेतुर्निश्चिततयेति उभयोर्भेदः अभेदेनाभिधा हेतुर्हेतोर्हेतुम
ता सह॥ यथा मम॥ तारुण्यस्य विलास इत्यत्र वशीकरणहेतुर्नायिका वशीकरणत्वेनोक्ता। विलासहासयोस्त्वध्यवसायस्त्व

ऽलंकारः अनुकूलं प्रातिकूल्यमानुकूल्यानुवंधि चेत्॥ यथा॥ कुपितासि यदा तन्वि विधाय कररजक्षतं। वधान भुजपाशा-
भ्यां कंठमस्य दृढं तदा। अस्य च विछित्तिविशेषस्य सर्वालंकारविलक्षणत्वेन स्फुरणात्पृथगलंकारत्वमेव न्याय्यं। वस्तुनो व-
क्तुमिष्टस्य विशेषप्रतिपत्तये। निषेधाभासमाक्षेपो वक्ष्यमाणोक्तगो द्विधा। तत्र वक्ष्यमाणविषये क्वचित्सर्वस्यापि सामान्यतः सू-
चितस्य विशेषे निषेधः क्वचिदंशोक्तावंशांतरे निषेध इति द्वौ भेदौ। उक्तविषये क्वचिद्वस्तुस्वरूपस्य निषेधः क्वचिद्वस्तुकथनस्य वा
इत्याक्षेपस्य चत्वारो भेदाः॥ क्रमेणोदाहरणं॥ स्मरशरशतविधुराया भणामि सख्याः कृते किमपि। क्षणमिह विश्राय सखे नि-
र्दयहृदयस्य किं वदाम्यथवा। अत्र सख्या विरहस्य सामान्यतः सूचितस्य वक्ष्यमाणे विशेषे निषेधः। तव विरहे हरिणाक्षी निरीक्ष्य
नवमालिकां दृष्ट्वा। दहति नितांतमिदानीमाः किंह भणितैरथवा॥ अत्र मरिष्यतीत्यंशो नोक्तः॥ वालअ णाहं दूई तीअ पिओ सि-
त्ति ण मह वावारो। सा मरइ तुज्झ अजसो एअं धम्मक्खरं भणिमो। अत्र दूतीत्वस्य वस्तुनो निषेधः। विरहे तव तन्वंगी कथं क्षपयतु
क्षपां। दारुणव्यवसायस्य पुरस्ते भणितेन किं। अत्र कथनस्योक्तस्यैव निषेधः। प्रथमोदाहरणे सख्याः अवश्यंभाविमरणमि-
ति विशेषः प्रतीयते द्वितीये त्ववश्यवक्तव्यत्वादि। तृतीये दूतीत्वे ऽयथार्थवादित्वं चतुर्थे दुःखस्यातिशयः। न चायं विहितनि-
षेधः स्यादाभासत्वात्। अनिष्टस्य तथार्थस्य विध्याभासः परो मतः। तथेति पूर्ववद्विशेषप्रतिपत्तये। यथा गच्छ गच्छसि चेत्कांत पं- ९८
थानः संतु ते शिवाः। ममापि जन्म तत्रैव भूयाद्यत्र गतो भवान्। अत्रानिष्टत्वाद्गमनस्य विधिः प्रस्खलद्रूपो निषेधे पर्यवस्यति

विशेषश्चागमनस्यात्यंतपरिहार्यत्वरूपः प्रतीयते। विभावना विना हेतुं कार्योत्पत्तिर्यदुच्यते। उक्तानुक्तनिमित्तत्वाद्द्वि-
धा सा परिकीर्तिता। विना कारणमुपनिबध्यमानोपि कार्योदयः किंचिदन्यत्कारणमपेक्ष्यैव भवितुं युक्तः। तच्च कारणांतरं
क्वचिदुक्तं क्वचिदनुक्तमिति द्विधा॥ यथा॥ अनायासकृशं मध्यमशंकातरले दृशौ। अभूषणमनोहारि वपुर्वयसि सुभ्रु-
वः॥ अत्र वयोरूपं निमित्तमुक्तं। अत्रैव च वपुर्भातीति मृगीदृशः इति पाठे त्वनुक्तं। सति हेतौ फलाभावो विशेषोक्तिस्तथा द्विधा तेप्य-
ुक्तानुक्तनिमित्तत्वात्॥ तत्रोक्तनिमित्ता यथा॥ धनिनोपि निरुन्मादा युवानोपि न चंचलाः। प्रभवोप्यप्रमत्तास्ते महामहिम-
शालिनः॥ अत्र महामहिमशालित्वं निमित्तमुक्तं। अत्रैव च चतुर्थपादे कियंतः संति भूतले इति पाठे त्वनुक्तं। अचिंत्यनिमित्त-
त्वं चानुक्तनिमित्तस्यैव भेद इति पृथङ्नोक्तं। यथा॥ स एकस्त्रीणि जयति जगंति कुसुमायुधः। हरतापि तनुं यस्य शंभुना न हृतं
बलं॥ अत्र तनुहरणेपि बलाहरणे निमित्तमचिंत्यं। इह च कार्याभावः कार्यविरुद्धसद्भावमुखेनापि निबध्यते। विभावनाया-
मपि कारणाभावः कारणविरुद्धसद्भावमुखेनापि। एवं यः कौमारहर इत्यादौ यः कौमारहर इत्यादेरुत्कंठाकारणविरुद्ध-
स्य निबंधनाद्विभावना। यः कौमारहर इत्यादौ कारणस्य कार्यविरुद्धाया उत्कंठाया निबंधनाद्विशेषोक्तिः। एवं चात्र विभाव-
नाविशेषोक्त्योः संकरः। शुद्धोदाहरणं तु मृग्यं। जातिश्चतुर्भिर्जात्याद्यैर्गुणो गुणादिभिस्त्रिभिः। क्रिया क्रियाद्रव्याभ्यां यद्द्रव्यं द्रव्ये-
ण वा मिथः। विरुद्धमिव भासेत विरोधोसौ दशाकृतिः॥ क्रमेण यथा॥ तव विरहे मलयमरुद्दवानलः शशिरुचोपि सोष्माणः

साहित्यदर्पण
९९

ह्रदयमलिरुतमपिनितांतंनलिनीदलमपिनिदाघरविरस्याः। संततमुशलासंगाद्बहुतरगृहकर्मघटनयानृपते। द्विजप
त्नीनांकठिनाःसतिभवतिकराःसरोजसुकुमाराः। अजस्यगृह्णतोजन्मनिरीहस्यहतद्विषः। स्वपतोजागरूकस्ययाथार्थ्यं
वेदकस्तव। वल्लभोत्संगसंगेनविनाहरिणचक्षुषः। राकाविभावरीजानिर्विषज्वालाकुलोभवत्। नयनयुगासेचनकंमा-
नसवृत्त्यापिदुःप्रापं। रूपमिदंमदिराक्ष्यामदयतिहृदयंदुनोतिचमे। त्वद्वाजिराजीत्यादि। वल्लभोत्संगेत्यादिश्लोकेचतुर्थपा
देमध्यंदिनदिनाधिपइतिपाठेद्रव्ययोर्विरोधः। अत्रतवविरहइत्यादौपवनादीनांबहुव्यक्तिवाचकत्वाज्जातिःशशांकानांद्रव्यान
लोष्महृदयस्वेदनसूर्येजीतिगुणक्रियाद्रव्यरूपैरन्योन्यविरोधोमुखतश्चाभासते। विरहहेतुत्वाच्चसमाधानं। अत्राजस्ये
त्यादावजत्वादिगुणस्यजन्मग्रहणादिक्रिययाविरोधः। भगवतःप्रभावातिशयात्तुसमाधिः। त्वद्वाजीत्यादौहरोपिशिरसा
गंगांनधत्तइतिविरोधः। कविप्रौढोक्त्यातुसमाधानं। स्पष्टमन्यत्। विभावनायांकारणाभावेनोपनिबध्यमानत्वात्कार्यमे
वबाध्यत्वेनप्रतीयतेविशेषोक्तौचकार्यस्याभावेनकारणमेव। इहत्वन्योन्यंद्वयोरपिबाध्यत्वमितिभेदः। कार्यकारणयो
र्भिन्नदेशतायामसंगति॥ यथा॥ साबालावयमप्रगल्भवयसःसास्त्रीवयंकातराःसापीनोन्नतिमत्पयोधरयुगंधत्तेसखे
दावयं। साक्रांताजघनस्थलेनगुरुणागंतुंनशक्तावयंदोषैरन्यजनाश्रितैरपटवोजाताःस्मइत्यद्भुतं। अत्रस्वापवादकत्वा ९९
देकदेशस्थयोर्विरोधेपिविरोधालंकारः। गुणोक्रियेवाचेत्स्यातांविरुद्धहेतुकार्ययोः। यद्वारब्धस्यवैफल्यमनर्थस्यचसंभ

वः विरूपयोः संघटनायाच तद्विषमं मतं । स्त्रिलोकाभरणं प्रसूते ॥क्रमेणोदाहरणानि॥ सद्यः करस्पर्शमवाप्य चित्रं
रणे रणे यस्य कृपाणलेखा । तमालनीला शरदिंदुपाण्डु यशस्त्रिलोकाभरणं प्रसूते । अत्र कारणरूपायाश्च मिलनायाः
कारणगुणाः कार्ये गुणानारंभंत इति स्थिते विरुद्धा शुक्लायशसउत्पत्तिः । आनंदममंदमिमं कुवलयदललोचने ददासि त्वं
विरहस्त्वयैव जनितस्तापयतितरां शरीरं मे । अत्रानंदजनकस्त्रीरूपकारणात्तापजनकविरहोत्पत्तिः । अयं रत्नाकरोंऽभो
धिरित्यसेवि धनाशया धनं दूरेस्तु वदनमपूरि क्षारवारिणा । अत्र न केवलं कांक्षितधनलाभो नाभूत्प्रत्युत क्षारवारिनिर्वि
दनपूरणं । क्व वनं तरुवल्कभूषणं नृपलक्ष्मीः क्व महेंद्रवंदिता । नियतं प्रतिकूलवर्तिनो बत धातुश्चरितं सुदुःसहं । अत्र व
न राज्यश्रियोर्विरूपयोः संघटना ॥इदं मम॥ यथावा॥ विपुलेन सागरशयस्य कुक्षिणा भुवनानि यस्य पपिरे युगक्षये
मदविभ्रमासकलया पपे पुनः स पुरस्त्रियैकतमयैकया दृशा । समं स्यादानुरूप्येण श्लाघायोग्यस्य वस्तुनः । यथा शशि
नमुपगतेयं कौमुदी मेघमुक्तं जलनिधिमनुरूपं जह्नुकन्यावतीर्णा इति समगुणयोगप्रीतयस्तत्र पौराः श्रवणकटु नृपाणा
मेकवाक्यं विवव्रुः । विचित्रं तद्विरुद्धस्य कृतिरिष्टफलाय चेत् । यथा प्रणमत्युन्नतिहेतोर्जीवितहेतोर्विमुंचति प्राणान् । दुः
खीयति सुखहेतोः को मूढः सेवकादन्यः । आश्रयाश्रयिणोरेकस्याधिक्येधिकमुच्यते । आश्रयाधिक्ये यथा । किमधिकमस्य
ब्रूमो महिमानं वारिधेर्हरिर्यत्र । अज्ञात एव शेते कुक्षौ भुवनानि निक्षिप्य ॥आश्रिताधिक्ये यथा॥ युगांतकालप्रतिसंहृता

त्मनोजगंतियस्यांसविकाशमासत। तनौममुस्तत्रनकैटभद्विषस्तपोधनाभ्यागमसंभवामुदः। अन्योन्यमुभयोरेकक्रि
ययोःकारणंमिथः। यथात्वयासाशोभतेतन्वीतयात्वमपिशोभसे। रजन्याशोभतेचंद्रश्चंद्रेणापिनिशीथिनी। यदाधेयमनाधा
रमेकंचानेकगोचरं। किंचित्प्रकुर्वतःकार्यमशक्यस्येतरस्यवा। कार्यस्यकरणंदैवाद्विशेषस्त्रिविधस्ततः। क्रमेणयथा। दि
वमप्युपयातानामाकल्पमनल्पगुणगणायेषां। रमयंतिजगंतिगिरःकथमिवकवयोनतेवंद्याः। काननेसरिदुद्देशेगिरीणा
मपिकंदरे। पश्यंत्यंतकसंकाशंत्वामेकंरिपवःपुरः। गृहिणीसचिवःसखीमिथःप्रियशिष्याललितेकलाविधौ। करुणाविमु
खेनमृत्युनाहरतात्वांवदकिंनमेहृतं। व्याघातःसतुकेनापिवस्तुयेनयथाकृतं। तेनैवचेदुपायेनकुरुतेन्यस्तदन्यथा॥ यथा॥
दृशादग्धंमनसिजंजीवयंतिदृशैवयाः। इत्यादि। सौकर्येणचकार्यस्यविरुद्धंक्रियतेयदि। व्याघातइत्येव। इहैवत्वंतिष्ठकुतम
दमह्नोभिःकतिपयैःसमागंताकांतेमृदुरसिनचायाससहना। मृदुत्वमेहेतुःसुभगभवतागंतुमधिकंनमृद्वीसोढायद्विरहकृ
तमायासमसमं। अत्रनायकेननायिकायामृदुत्वंसहागमनहेतुरुक्तः। नायिकयाचप्रस्तुतगमनेनततोपिसौकर्येणहेतुत
योपन्यस्तं॥ परंपरंप्रतियदापूर्वपूर्वस्यहेतुता। तदाकारणमालास्यात्॥ यथा॥ श्रुतंकृतधियांसंगाज्जायतेविनयःश्रुतात्॥
लोकानुरागोविनयान्नकिंलोकानुरागतः। तन्मालादीपकंपुनःधर्मिणामेकधर्मेणसंबंधोयद्यथोत्तरं। यथात्वयिसंगरसं
प्राप्तेधनुषासादिताःशराः। शरैररिशिरस्तेनभूस्तयात्वंत्वयायशः। अत्रासादनक्रियाधर्मः। पूर्वपूर्वंप्रतिविशेषणत्वेनपरंपरं १००

स्थाप्यतोथोह्यतेवाचेत्स्यात्तदेकावलीद्विधा॥ क्रमेणोदाहरणं॥ सरोविकसितांभोजमंभोजंभृंगसंगतं। भृंगायत्रससंगीताः
संगीतंसस्मरोदयं। नतज्जलंयन्नसुचारुपंकजंनपंकजंतद्यदलीनषट्पदं। नषट्पदोसौनजुगुंजयःकलंनगुंजितंतन्नजहा
रयन्मनः। क्वचिद्विशेष्यमपियथोत्तरविशेषणतयास्थापितमपोहितंचदृश्यते। यथावाप्योभवंतिकमलास्फुटंतिकमला
निवापीषु॥ कमलेषुपतंत्यलयःकरोतिसंगीतमलिषुसंपदं। एवमपोहेपि। उत्तरोत्तरमुत्कर्षोवस्तुनःसारमुच्यते॥ यथा॥
राज्येसारंवसुधावसुंधरायांपुरंपुरेसौधं। सौधेतल्पंतल्पेवरांगनानंगसर्वस्वं। यथासंख्यमनूद्देशउद्दिष्टानांक्रमेणयत्॥ उदा
हरणं॥ उन्मीलंतिनखैर्लुनीहिवहतिक्षौमांचलेनावृणुक्रीडाकाननमाविशंतिवलयक्वाणैःसमुत्त्रासय। इत्थंवंजुलदक्षि
णानिलकुहूकंठेषुसांकेतिकव्यापाराःसुभगत्वदीयविरहेतस्याःसखीनांमिथः॥ क्वचिदेकमनेकस्मिन्ननेकंचैककेक्रमा
त्॥ भवतिक्रियतेवाचेत्तदापर्यायइष्यते॥ क्रमेणयथा॥ स्थिताःक्षणंपक्ष्मसुताडिताधराःपयोधरोत्सेधनिपातचूर्णिताः॥ व
लीषुतस्याःस्खलिताःप्रपेदिरेचिरेणनाभिंप्रथमोदविंदवः॥ विचरंतिविलासिन्योयत्रश्रेणिभरालसाः। वृककाकशिवास्तत्र
धावंत्यरिपुरेतव। विसृष्टरागादधरान्निवर्तितःस्तनांगरागारुणिताच्चकंदुकात्। कुशांकुरादानपरिक्षतांगुलिःकृतोक्षसूत्र
प्रणयीतयाकरः। ययोरारोपितस्तारोहारस्तेरिवधूजनैः। निधीयंतेतयोःस्थूलाःस्तनयोरश्रुविंदवः॥ एषुचक्वचिदाधारःसं
हतरूपोसंहतरूपश्च। क्वचिदाधेयमपि। यथास्थिताःक्षणमित्यत्रोदविंदवःपक्ष्मादावसंहतरूपेआधारेक्रमेणाभवन्। विच

रंतीत्यत्राधेयत्वेन ताडंकादयः संहतरूपा अपि तु रेकक्रमेणाभवन् | एवमन्यत्र | तत्र चैकस्यानेकत्र क्रमेणैव वृत्तेर्विशेषालंका
राद्भेदः विनिमयात्तावात्परिवृत्तेः परिवृत्तिर्विनियमः समन्यूनाधिकैर्भवेत् || क्रमेण यथा || दत्वा कटाक्षमेणाक्षी जग्राह हृदयं
मम | मया तु हृदयं दत्वा गृहीतो मदनज्वरः | अत्र प्रथमेऽर्द्धे समेन द्वितीयेऽर्द्धे न्यूनेन | तस्य च प्रवयसो जटायुषः स्वर्गिणः किमिव
शोच्यतेऽधुना | येन जर्जरकलेवरव्ययात्क्रीतमिंदुकिरणोज्वलं यशः | अत्राधिकेन | प्रश्नादप्रश्नतो वापि कथिताद्वस्तुनो भवेत्
| तादृगन्यव्यपोहश्चेच्छाब्द आर्थोऽथवा तदा | परिसंख्या || क्रमेणोदाहरणं || किं भूषणं सुदृढमत्र यशो न रत्नं किं कार्यमार्य
चरितं सुकृतं न दोषः | किं चक्षुरप्रतिहतं धिषणा न नेत्रं जानाति कस्त्वदपरः सदसद्विचारं | अत्र व्यवच्छेद्यं रत्नादि शाब्दं | कि
माराध्यं सदा पुण्यं कः सेव्यः सत्समागमः | कोऽध्येयो भगवान् विष्णुः किं काम्यं परमं पदं || अत्र व्यवच्छेद्यं पापाद्यार्थं || अन
योः प्रश्नपूर्वकत्वं | अप्रश्नपूर्वकत्वे तु यथा भक्तिर्भवे न विभवे व्यसनं शास्त्रे न युवतिकामास्त्रे | चिंता यशसि न वपुषि प्रा
यः परिदृश्यते महतां | बलमार्त्तभयोपशान्तये विदुषां संमतये बहुश्रुतं | वसु तस्य विभोर्न केवलं गुणवत्तापि परप्रयो
जनं | श्लेषमूलत्वे चास्य वैचित्र्यविशेषो यथा | यस्मिंश्च राजनि जितजगति परिपालयति महीं चित्रकर्मसु वर्णसंकाराश्चा
पेषु गुणच्छेदा इत्यादि | उत्तरं प्रश्नस्योत्तरादुन्नयो यदि | यच्चासकृदसंभाव्यं सत्यपि प्रश्न उत्तरं || यथा || वीक्षितुं न क्षमा श्व १९१
श्रूः स्वामी दूरतरं गतः | अहमेकाकिनी बाला तवेह वसतिः कुतः | अनेन पथिकस्य वसतियाचनं प्रतीयते | का विसमादेह

गाः ईकिं लद्धंद्वंजणोगुणग्गादी। किं सो रकं सुकलत्तं किंदुः रकं जं खलो लोअ। अत्रान्यव्यपोहे तात्पर्याभावात् परिसंख्यातो
भेदः। नचेदमनुमानं साध्यसाधनयोर्निर्देश एव तस्यांगीकारात्। न काव्यलिंगं उत्तरस्य प्रश्नं प्रत्यजनकत्वात् दंडापूपिक
यान्यार्थागमोर्थापत्तिरिष्यते मूषकेण दंडो भक्षित इति अनेन तत्सहचरितमपूपभक्षणमर्थायातं भवतीति न्यायो दंडापू
पिका। अत्र क्वचित्प्राकरणिकार्थादप्राकरणिकस्यार्थस्यापतनं क्वचिदप्राकरणिकार्थात्प्राकरणिकार्थस्येति द्वौ भेदौ। क्र
मेणोदाहरणानि॥ हारोयं हरिणाक्षीणां लुठति स्तनमंडले मुक्तानामप्यवस्थेयं के वयं स्मरकिंकराः। विललाप स बाष्प
गद्गदं सहजामप्यपहाय धीरतां। अतितप्तमयोपि मार्दवं भजते कैव कथा शरीरिषु। अत्र समानन्यायस्य श्लेषमूलत्वे वै
चित्र्यविशेषो यथोदाहृते हारोयमित्यादौ। नचेदमनुमानं समानन्यायस्य संबंधरूपत्वाभावात्। विकल्पस्तुल्यबलयोर्विरो
धश्चातुरीयुतः॥ यथा॥ नमंतु शिरांसि धनूंषि वा कर्णपूरीक्रियंतामाज्ञा मौर्व्यो वा। अत्र धनुषां शिरसां नमनयोः संधिविग्रहो
पलक्षणत्वात् संधिविग्रहयोश्चैकदैव कर्तव्यतासंभवाद्विरोधः स चैकपक्षाश्रयपर्यवसानः। तुल्यबलत्वं चात्र धनुःशिरो
नमनयोर्द्वयोरपि स्पर्धया संभाव्यमानत्वात् चातुर्यं चौपम्यगर्भत्वं एवं कर्णपूरीक्रियंतामित्यत्रापि एवं युष्माकं कुरुतां
भवार्त्तिशमनं नेत्रे तनुर्वा हरेः। अत्र श्लेषावष्टंभेन चारुत्वं दीयतामर्जितं वित्तं देवाय ब्राह्मणाय चेत्यादौ चातुर्याभावान्नाय
मलंकारः समुच्चयोयमेकस्मिन् सति कार्यस्य साधके खलेकपोतिकान्यायात्तत्करः स्यात्परोपि चेत्। गुणौ क्रिये वा युगप

त्स्मातांयद्वागुणक्रिये॥ यथा मम॥ दृढोधीरसमीरदंतजननंतेचंदनक्ष्मारुतोदाक्षिण्यंपजगदुन्नरंपरिचयोगोदावरीवा
रिणि:। अतसंगंदहसीहमेत्वमपिचेदुद्दामदावाग्निवत्मत्रोयंमलिनात्मकोवनचर:किंवक्ष्यतेकोकिल:। अत्रदाहेएकस्मिंश्च
दनक्ष्मारुतजन्मरूपेकारणेसत्यपिदाक्षिण्यादीनांदहेत्वंतराणामुपादानं। अत्रसर्वेषामपिहेतूनांशोभनत्वात्सद्योग:। अत्रैव
वचतुर्थपादेमत्तत्वादीनामशोभनानांयोगादसद्योग:॥ सदसद्योगेयथा॥ शशीदिवसधूसरोगलितयौवनाकामिनीस
रोविगतवारिजंमुखमनक्षरंस्वाकृते:। प्रभुर्धनपरायण: सदसिदुर्गत: सज्जनोनृपांगणगत: खलोमनसिसप्तशल्यानि
मे॥ इहकेचिदाहु:॥ शशिप्रभृतीनांशोभनत्वंखलस्याशोभनत्वमितिसदसद्योग:। अन्येतुशशिप्रभृतिषुधूसरत्वादेरत्यं
तमनुचितत्वमितिविच्छित्तिविशेषस्यैवचमत्कारविधायित्वंमनसिसप्तशल्यानीतिसप्तानामपिशल्यत्वेनोपसंहार:। नृ
पांगणगत: खलइतिप्रस्तुतक्रमभंगाद्दुष्टत्वमावहतिसर्वत्रविशेष्यस्यैवशोभनत्वेनप्रक्रमादितिइहचखलेकपोतवत्स
र्वेषांकारणानांसांहत्येनावतार:। समाध्यलंकारेत्वेकस्यकार्येइतिसाधकत्वेसमयेप्यन्यस्यचकाकतालीयन्यायेना
पतनमितिभेद:। अरुणेचतरुणिनयनेतवमलिनंचप्रियस्यमुखं। मुखमानतंचसखितेज्वलितश्चास्यांतरेज्वलन:। अत्रा
द्येद्वेगुणयोर्यौगपद्यं। द्वितीयेक्रिययो:॥ तयोर्यौगपद्येयथा॥ कलुषंचतवाहितेष्वकस्मात्सितपंकेरुहसोदरश्रिच १०२
क्षु:। पतितंचमहीपतींद्रतेषांवपुषिप्रस्फुटमापदांकटाक्षै:॥ कनोतिचासितनुतेचकीर्तिमित्यादावेकाधिकरणेप्येषबहुरप

ते। नचात्रदीपकं। एतेद्विगुणक्रियायौगपद्येसमुच्चयप्रकारानियमेनकार्यकारणत्वान्ननियमविपर्ययरूपातिशयोक्ति
मूला। दीपकस्यचातिशयोक्तिमूलत्वाभावः। समाधिःसुकरंकार्यंदैवाद्वस्त्वन्तरागमात्॥यथा॥ मानमस्यानिराकर्तुंपादयो
र्मेपतिष्यतः। उपकारायदिष्ट्येदमुदीर्णघनगर्जितं। प्रत्यनीकमशक्तेनप्रतिक्रियारिपोर्यदि। तदीयस्यतिरस्कारस्तस्यैवोत्कर्ष
साधकः। तस्यैवरिपोरेव॥यथामम॥ मध्येनतनुमध्यामेमध्यंजितवतीत्ययं। इभकुंभौनिभिनत्त्यस्याःकुचकुंभनिभौहरिः। प्रसि
द्धस्योपमानस्योपमेयत्वप्रकल्पनं। निःफलत्वाभिधानंवाप्रतीपमितिकथ्यते॥क्रमेणोदाहरणं॥ यस्त्वन्नेत्रसमानकांतिसलि
लेमग्नंतदिंदीवरमित्यादि। तद्वक्त्रंयदिमुद्रिताशशिकलाहरिणाहेमस्यचेत्तत्कृतितच्चक्षुर्यदिहारितंकुवलयैस्तच्चेत्स्मितंका
सुधाधिक्कंदर्पधनुर्भ्रुवौयदिचतेकिंवाबहुब्रूमहेयत्सत्यंपुनरुक्तवस्तुविमुखःसर्गक्रमोवेधसः। अत्रवक्त्रादिभिरेवचंद्रादी
नांशोभादिवहनात्तेषांनिःफलत्वं। उत्कर्षाचास्येतमुत्कर्षमस्तूत्कृष्टस्यवस्तुनः। कल्पितेप्युपमानत्वेप्रतीपंकेचिदूचिरे। यथाअ
हमेवगुरुःसुदारुणानामितिहालाहलमास्मतातदृप्यः। ननुसंतिभवादृशानिभूयोभुवनेस्मिन्वचनानिदुर्जनानां। अत्रअ
यमप्यदिनोत्कर्षातिशयउक्तस्तदनुक्तौतुनायमलंकारः॥यथा॥ ब्रह्मैवब्राह्मणोवदतीति। मीलितंवस्तुनोगुप्तिःकेनचित्तु
ल्यलक्ष्मणा। अत्रसमानलक्षणंवस्तुक्वचित्सहजंक्वचिदागंतुकंक्रमेणयथा। लक्ष्मीवक्षोजकस्तूरीलक्ष्मवक्षःस्थलेहरेः
यस्तेनालक्षितारस्यानाम्नानीलोत्पलाभया। अत्रभगवतःश्यामकांतिःसहजासदैवशोणोपलकुंडलस्ययस्यामयूखैररु

णीकृतानि। कोपोपरक्तान्यपिकामिनीनांमुखानिशंकांविदधंतियूनां। अत्रमाणिक्यकुंडलस्यारुणिमामुखेआगंतुकः
सामान्यंप्रकृतस्यान्यतादात्म्यंसदृशैःगुणैः। यथा। मल्लिकाचितधम्मिल्लाश्चारुचंदनचर्चिताः। अविभाव्याःसुखंयांतिचंद्रिका
स्वभिसारिकाः। मीलितेउत्कृष्टगुणेननिकृष्टगुणस्यतिरोधानंइहतुतयोस्तुल्यगुणतयाभेदाग्रहः। तद्गुणःस्वगुणत्यागादत्यु
त्कृष्टगुणग्रहः॥यथा॥जगाददवदनच्छद्मपद्मपर्यंतपातिनः। नयन्मधुलिहःश्वैत्यमुदंशुदशनांशुभिः। मीलितेप्रकृतस्य
वस्तुनोवस्त्वंतरेणाछादनंइहतुवस्त्वंतरगुणेनाक्रांततावतीयतेइतिभेदः। तद्रूपाननुहारश्चेद्धेतौसत्यप्यतद्गुणः॥यथा॥
हंतसांद्रेणरागेणभृतेपिहृदयेमम। गुणगौरनिषिक्तोसिकथंनामनरज्यसि॥यथावा॥गांगमंबुसितमंबुयामुनंकज्ज-
लाभमुभयत्रमज्जतः। राजहंसतवसैवशुभ्रताचीयतेनचनचापचीयते। पूर्वत्रातिरक्तहृदयसंपर्कात्तस्यानुवदपिगुणगौ
रत्वाद्वाच्यस्यनायकस्यरक्तत्वंननिष्पन्नं। उत्तरत्राप्रस्तुतस्यहंसस्यायांविद्यमानायामपिगांगयमुनापेक्षयाप्रकृतस्यहंस
स्यगंगायमुनयोःसंगेपिनतद्रूपता। अतद्गुणग्रहणविच्छित्तिविशेषाद्विशेषोक्तेर्भेदाः वर्णांतरोत्पत्त्यभावाच्चविषमात्। सं
लक्षितस्तुसूक्ष्मोर्थआकारेणेंगितेनच। कयापिसूच्यतेभंग्यासूक्ष्मंयत्रतदुच्यते। सूक्ष्मःस्थूलमतिभिरसंलक्ष्यः। तत्राका
रेण॥यथा॥वक्त्रस्यंदिस्वेदबिंदुप्रबंधैर्दृष्ट्वाभिन्नंकुंकुमंकापिकंठे। पुंस्त्वंतन्व्याव्यंजयंतीवयस्यास्मित्वापाणौखड्गलेखांलि- १०३
लिलेख। अत्रकयाचित्कुंकुमभेदेनसंलक्षितंपुरुषायितंपाणौपुरुषचिह्नलेखालिखनेनासूचि॥इंगितेनयथा॥संके

तत्कालमनन्तसंविटंज्ञात्वा विदग्धया। दसन्नेत्रार्पितालक्तं लीलापद्मं निमीलितं। अत्र विटस्याकूतं क्केपादिनालक्षितः। सं-
केतकालाभिप्रायो रजनीकालस्ताविना पद्मनिमीलनेन प्रकाशित॥ व्याजोक्तिर्गोपनं व्याजादुद्भिन्नस्य च वस्तुनः॥ यथा
॥ शैलेन्द्रप्रतिपाद्यमानगिरिजाहस्तोपगूढोल्लसद्रोमाञ्चादिविसंस्थुलाखिलविधिव्यासंगभंगाकुलं। हा शैत्यं तुहिनाचल-
स्य करयोरित्यूचिवान्सस्मितं शैलान्तःपुरमातृमंडलगणैर्दृष्टोवताद्वः शिवः। नेयं प्रथमापह्नुतिः। अप्रकृतिकारिणो विषय-
स्यानभिधानात् द्वितीयापह्नुतेर्भेदश्च तत्रस्त्वावेदर्शितः। स्वभावोक्तिर्डिम्भादेः स्वक्रियारूपवर्णनं। डिम्भादयोः कविमा-
त्रवेद्ययोरर्थस्य डिंभादेः स्वयोस्तदेकाश्रययोश्चेष्टास्वरूपयोः॥ यथा मम॥ लांगूलेनाभिहत्य क्षितितलमसकृद्दारय-
न्नग्रपद्भ्यामात्मन्येवावलीय द्रुतमथ गगनं प्रोत्पतन्विक्रमेण। स्फूर्जद्धूत्कारघोरः प्रतिदिशमखिलान्द्रावयन्नेष जं-
तून्कोपाविष्टः प्रविष्टः प्रतिबलमथनोच्छूनचक्षुस्तरक्षुः। अत्र तस्य पदार्थस्य नूतनस्याप्यनतिविष्यतः। यस्तूत्प्रेक्षायमान-
त्वेतन्नाविकमुदाहृतं॥ यथा॥ मुनिर्जयति योगीन्द्रो महात्मा कुंभसंभवः। येनैकचुलके दृष्टौ दिव्यौ तौ मत्स्यकच्छपौ॥ यथ-
वा॥ आसीदञ्जनमत्रेति पश्यामितव लोचने। भाविभूषणसंभारां साक्षात्कुर्वे तवाकृतिं। नचायं प्रसादाख्यो गुणः। भूत-
भाविनोः प्रत्यक्षायमाणत्वे तस्याहेतुत्वात्। नचाद्भुतो रसः। विस्मयं प्रत्यजनकत्वात्। नचातिशयोक्तिरलंकारः। अध्यव-
सायाभावात्। नचभ्रांतिमान्भूतभाविनोर्भूतभावितयैव प्रकाशनात्। नचस्वभावोक्तिः। तस्या लौकिकवस्तुगतसू-

साहित्यदर्प्पणे द्मधर्मस्य तावस्यैव यथावद्वर्णनस्य रूपं । अस्य तु वस्तुनः उत्प्रेक्षायमाणरूपो विच्छित्तिविशेषोऽस्तीति । यदि तु नः स्वभा
१०४ वोक्तावप्यस्या विच्छित्तेः सत्त्वं तदानयोः संकरः । अनातपत्रोऽप्ययमत्र लक्ष्यते सितातपत्रैरिव सर्वतो वृतः । अचामरोऽप्ये
ष सदैव वीज्यते विलासवालव्यजनेन कोऽप्ययं । अत्र उत्प्रेक्षायमाणस्यैव वर्णनान्नायमलंकारः । वर्णनावशेन उत्प्रेक्षा
यमाणत्वस्यैव स्वरूपत्वात् । यस्तु नः उत्प्रेक्षायमाणस्यापि वर्णने उत्प्रेक्षायमाणत्वं तत्रायमलंकारो न विंतु युक्तः । यथो
दाहृते आसीदञ्जनमित्यादौ । लोकातिशयसंपत्तिवर्णनोदात्तमुच्यते । यद्वापि प्रस्तुतस्यांगं महतां चरितं भवेत् ॥ क्रमेणो
दाहरणं ॥ अधःकृतांभोधरमंडलायां यस्याः शशांकोपलकुट्टिमानां । ज्योत्स्नानिपाताक्षरतां पयोभिः केलीवनं वृद्धिमुरी
करोति । नाभिप्ररूढांबुरुहासनेन संस्तूयमानः प्रथमेन धात्रा । अमुं युगांतोचितयोगनिद्रः संहृत्य लोकान्पुरुषोऽधिशे
ते । रसभावौ तदाभासौ भावस्य प्रशमस्तथा । गुणीभूतत्वमायांति यदालंकृतयस्तदा । रसवत्प्रेय ऊर्जस्वि समाहि
तमिति क्रमात् । तदाभासो रसाभासो भावाभावश्च । तत्र रसयोगाद्रसवदलंकारो यथा । अयं स रसनोत्कर्षीत्यादौ । अत्र
शृंगारः करुणस्यांगं । एवमन्यत्रापि प्रकृष्टत्वात्प्रेयो यथा मम । आमीलितालसविवर्तिततारकाक्षीमत्कंठबंधनदरश्ल
थबाहुवल्ली । प्रस्वेदवारिकणिकांचितगंडबिंबा संस्मृत्य तामनिशमेति न शांतिमंतः । अत्र संभोगशृंगारः स्मरणस्य भा १०४
वस्यांगं स च विप्रलंभस्य । ऊर्जो बलं अनौचित्यप्रवृत्तौ तदत्रास्तीति ऊर्जस्वि ॥ यथा ॥ वने खिलकलासक्ताः परित्यक्तनिज

स्त्रियः । त्वद्वैरिवनितावृंदे शुलिं दाकुर्वते रतिं । अत्र शृंगाराभासो राजविषयरतिभावस्यांगं । एवं भावाभासोऽपि समाहितं
परीहारः ॥ यथा ॥ अविरलकरवालकंपनैर्भृकुटीतर्जनगर्जनैर्मुहुः । ददृशे तव वैरिणां मदः सगतः क्वापि तवेक्षणे क्षणा
त् । अत्र मदाख्यस्य भावस्य प्रशमो राजविषयरतिभावस्यांगं । भावस्य चोदये संधौ मिश्रितत्वे तदाख्यया । तदाख्यकाः इति भा
वोदयभावसंधिभावशवलनामानोऽलंकाराः ॥ क्रमेणोदाहरणं ॥ मधुपानप्रवृत्तास्ते सुहृद्भिः सह वैरिणः । श्रुत्वा कुतोऽपि त्व
न्नाम लेभिरे विषमां दशां । अत्र त्रासोदयो राजविषयरतिभावस्यांगं । जन्मांतरीयरमणस्यांगसंगसमुत्सुका । सलज्जा चांति
के सख्याः पातु नः पार्वती सदा । अत्रौत्सुक्यलज्जयोः संधिर्देवताविषयरत्यंगं । पश्येत्कश्चिच्चल चपल रे का त्वराहं कुमारी ह
स्तालंबं वितर ह ह हा व्युत्क्रमः क्वासि यासि । इत्थं पृथ्वीपरिवृढ भवद्विद्विषोऽरण्यवृत्तेः कन्या कंचित्फलकिशलयान्याददा
नाभिधत्ते । अत्र शंकासूयाधृतिस्मृतिश्रमदैन्यविबोधौत्सुक्यानां शवलता राजविषयस्यांगं ॥ इह केचिदाहुः ॥ वाच्यवाचक
रूपालंकारणमुखेन रसाद्युपकारका एवालंकाराः रसादयस्तु वाच्यवाचकाभ्यामुपकार्या एवेति न तेषामलंकारतास्त
वितुं युक्तेति । अन्ये च रसाद्युत्कर्षकत्वमात्रेणैवालंकृतिव्यपदेशो भक्त्या चिरंतनप्रसिद्ध्यांगीकार्य इति । अपरे रसाद्युप
कारमात्रेणालंकारत्वमुच्यतः रूपकादौ तु वाच्याद्युपधानं अजागलस्तनन्यायेनेति । अत्र तु युक्तास्तु व्यंजकवाच्यवाचका
द्युपकृतैरंगभूतैः रसादिभिरंगिनो रसादेर्वाच्यवाचकोपस्कारद्वारेणोपकुर्वद्भिरलंकृतो व्यपदेशो लभ्यते । समासोक्तौ ।

तु नायिकादिव्यवहारमात्रस्यैवालंकारता नास्वादस्य तस्योक्तरीतिविरोधादिति मन्यते । अत एव ध्वनिकारेणोक्तं प्रधाने
ऽन्यत्र वाक्यार्थे यत्रांगं तु रसादयः । काव्ये तस्मिन्नलंकारो रसादिरिति मे मतिः । यदि रसाद्युपकारमात्रेणालंकृतित्वं तदा वाच
कादिष्वपि तथा प्रसज्येत । एवं च यच्च कैश्चिदुक्तं रसादीनामंगित्वे रसवदाद्यलंकारस्तदपि परास्तं । यद्येत एवालंकाराः पर
स्परविमिश्रिता । तदा पृथगलंकारौ संसृष्टिः संकरस्तथा । यथा लौकिकालंकाराणामपि परस्परमिश्रणे पृथक् चारुत्वेन
पृथगलंकारत्वं तथोक्तरूपाणां काव्यालंकाराणामपि परस्परमिश्रत्वे संसृष्टिसंकराख्यौ पृथगलंकारौ तत्र । मिथोऽनपेक्ष
तेषां स्थितिः संसृष्टिरुच्यते ॥ एतेषां शब्दालंकाराणां यथा ॥ देवः पायादपायाद्वः स्मेरेंदीवरलोचनः । संसारध्वांतविध्वंसहं
सः कंसनिषूदनः । अत्र पायादपायादिति यमकं संसारेत्यादावनुप्रास इति शब्दालंकारयोः संसृष्टिः । द्वितीयपादे उपमा
द्वितीये चैव रूपकमित्यर्थालंकारयोरुभयोः स्थितत्वात् शब्दार्थालंकारसंसृष्टिः । एवं शब्दालंकारसंसृष्टेरर्थालंकारसं
सृष्टेश्च स्थितत्वात् संसृष्टिः । संकरश्च । अंगांगित्वेऽलंकृतीनां तद्वदेकाश्रयस्थितौ । संदिग्धत्वे च भवति संकरस्त्रिविधः पुनः ॥ त
त्रांगांगित्वे यथा ॥ आकृष्टिवेगविगलद्भुजगेंद्रभोगि निर्मोकपट्टपरिवेष्टनयांबुराशेः । मंथव्यथाव्युपशमार्थमिवा
शु यस्य मंदाकिनी चिरमचेष्टत पादमूले । अत्र निर्मोकपट्टापह्नवे मंदाकिन्या आरोप इत्यपह्नुतिः । सा मंदाकिन्या वस्तुवृत्त्वेन
यस्माद मूलचेष्टनं तच्चरणमूलवेष्टनमिति इति श्लेषमुत्थापयतीति तस्यांगं श्लेषः । पादमूलचेष्टनमित्यतिशयोक्तेरंगं त्र १०५

तिशयोक्तिरपि मंथव्यथास्तु पशमार्थमिवेत्युत्प्रेक्षायाश्चांगं । उत्प्रेक्षा चांबुराशिं मंदाकिन्योर्नायिकव्यवहारं गमयती
ति समासोक्तेरंगं ॥ यथा वा ॥ अनुरागवती संध्या दिवसस्तत्पुरःसरः । अहो दैवगतिश्चित्रा तथापि न समागमः ॥ अत्र समासो
क्तिर्विशेषोक्तेरंगं । संदेहसंकरो यथा । इदमाभाति गगने भिंदानं सततं तमः । अमंदनयनानंदकरं मंडलमैंदवं । अत्र किं मुख
स्य चंद्रतयाध्यवसानादतिशयोक्तिः । तत इदमिति मुखं निर्दिश्य चंद्रारोपाद्रूपकं । अथ वेदमिति मुखस्य चंद्रमंडलस्य च
द्वयोरपि प्रकृतयोरेकधर्माभिसंबंधात्तुल्ययोगिता । आहोस्विच्चंद्रस्याप्रकृतत्वाद्दीपकं । किं वा विशेषणसाम्यादप्रस्तुतस्या
र्थस्य गम्यत्वात्समासोक्तिः । यद्वात्राप्रस्तुतचंद्रवर्णनया प्रस्तुतस्य मुखस्यावगतिरित्यप्रस्तुतप्रशंसा यद्वा । मन्मथोद्दीप
नः कालः कार्येऽत्र तच्चंद्रवर्णनामुखेन वर्णित इति पर्यायोक्तमिति वक्तनामलंकाराणां संदेहात्मकरः । यथा मुखचंद्रं पश्या
मीत्यत्र किं चंद्र इवेत्युपमा उत चंद्र एवेति रूपकमिति संदेहः । साधकबाधकयोरेकतरस्य सद्भावेन न तु पुनः संदेहः ॥ यथा
मुखचंद्रश्चुंबतीत्यत्र चुंबनं मुखस्यानुकूलमित्युपमायाः साधकं चंद्रस्य तु प्रतिकूलमिति रूपकस्य बाधकं । मुखचंद्रः
प्रकाशत इत्यत्र प्रकाशाख्यो धर्मो रूपकस्य साधकः । मुखे उपचरितत्वेन प्रतीयत इति नोपमाबाधकः । राजन्नारायणं ल
क्ष्मीस्त्वामालिंगति निर्भरं । अत्र योषित आलिंगनं नायकस्य सदृशेनोचितमिति लक्ष्म्यालिंगनस्य राजन्यसंभवादुपमा
बाधकं नारायणे च संभवाद्रूपकं । एवं वदनांबुजमेणाक्षी भाति चंचललोचनं । अत्र लोचनस्य वदने संभवादुपमायाः सा

धकतांबुजे संभवाद्रूपकस्य बाधकता। एवं सुंदरं वदनांबुजमित्यादौ साधारणधर्मप्रयोगः उपमितं व्याघ्रादिभिः सा
मान्याप्रयोग इति वचनादुपमासमासो न संभवतीत्युपमायाः बाधकः। एवं चात्र मयूरव्यंसकादित्वाद्रूपकसमास एव॥ ए
काश्रयानुप्रवेशो यथा मम॥ कटाक्षेणापीषत्क्षणमपि निरीक्षेत यदि सा तदा सांद्रानंदः स्फुरति विहताशेषविषयः। स
रोमांचोदंचत्कुचकलशाभिर्भिन्नवचनः परीरंभारंभः क इव भवितांभोरुहदृशः। अत्र कटाक्षेणापीषत्क्षणमपीत्यत्र छेका
नुप्रासस्य। निरीक्षेतेत्यत्र क्षकारमादाय वृत्त्यनुप्रासस्य चैकाश्रयानुप्रवेशः। एवं चात्रैवानुप्रासार्थापत्त्यलंकारयोः।
॥यथा वा॥ संसारध्वांतविध्वंसहंस इत्यत्र रूपकानुप्रासयोः। यथा वा कुरवकारवकारणतां ययुरित्यत्र रवकार इत्ये
कमिति यमकयोः॥ यथा वा॥ अहिणवपअरसिएसु पहिअसामाइएसु दिअहेसु। सद्दइपसारिअगिआणणाणच्चिअं
मोरविंदाणं। अत्र पहिअसामाइएसु इसेकाश्रये पथिकश्यामायितेष्वित्युपमा। पथिकाः सामाजिका इवेति रूपकं च
विष्ट। श्रीचंद्रशेखरमहाकविचंद्रसूनुश्रीविश्वनाथकविराजकृतप्रबंधं। साहित्यदर्पणमिमं कवयो विलोक्य साहित्यत
त्त्वमखिलं स्वयमेव वित्त॥१॥ यावत्प्रसन्नेंदुनिभाननश्रीर्नारायणस्यांकमलंकरोति। तावन्मनः संमदयन्कवीनामेष प्र
बंधः प्रथितोऽस्तु लोके॥२॥ ॥इति श्रीमन्नारायणचरणारविंदमधुव्रतसाहित्यार्णवकर्णधारध्वनिप्रस्थानपरमा
चार्यकविसूक्तिरत्नाकराष्टादशभाषाविलासिनीभुजंगसांधिविग्रहिकमहापात्रालंकारिकश्रीविश्वनाथकवि

कुलचूडामणिकृतौ साहित्यदर्पणे काव्यस्वरूपनिरूपणो नाम दशमः परिच्छेदः ॥ १० ॥ ॥ श्रीशुभंभवतु ॥ ॥
॥ व्योमांगरन्ध्रनिधिरन्ध्रमिते समासमासे ज्येशुक्ले च मासि रविशुद्धदिने ज्ञवारे ॥ श्रीकादरस्य रसशास्त्रकृतादरस्य ॥ साहि
त्यदर्पण वपुर्लिखितं रसाय ॥ १ ॥ संरैशुरेश्वरितनूरिकामः ॥ पक्कोमधर्मसकलप्रणामिः विनोददायी कुमुदान्तिरा
मः ॥ सुधाकरश्लेषविरंचकास्तु ॥ २ ॥ दयालुतनयेनैव ॥ विक्रमपुरवासिना ॥ इदं नयनचंद्रेण ॥ लिखितं हि महात्मना ॥ ३

काव्यप्रकाशनिदर्शनटीका

३१००